www.thearyasamaj.org

संस्कृतस्वाध्यायः

चतुर्थी दीक्षा - वाङ्मयावगाहनी

# भर्तृहरिनीतिशतकम्

## ( उत्तरार्द्धम् )

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

www.thearyasamaj.org

संस्कृतस्वाध्यायः

चतुर्थी दीक्षा - वाङ्मयावगाहनी

# भर्तृहरिनीतिशतकम्

( उत्तरार्धम् )

Bhartṛharinītiśatakam
(Part - II)

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
( भारतशासन-मानवसंसाधनविकास-मन्त्रालयाधीनम् )
नवदेहली

ww.thearyasamaj.org

**प्रधानसम्पादकः**

राधावल्लभत्रिपाठी, कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**स्वाध्यायसामग्रीलेखकः**

आदिमाः अष्टपाठाः - अर्कनाथचौधरी, राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसर. राजस्थानम्
नवमः पाठः - कू. वेङ्कटेशमूर्तिः, सहायकाचार्यः, मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**पुनरीक्षकः**

ललितकुमारत्रिपाठी, सहाचार्यः
राष्ट्रियसंस्कृतसंस्थानम्, गङ्गानाथझापरिसरः, इलाहाबादम्, उत्तरप्रदेशः

**सम्पादकः**

कू. वेङ्कटेशमूर्तिः, सहायकाचार्यः, मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**सहसम्पादकौ**

त. महेन्द्रः, सहायकाचार्यः, मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली
प्रफुल्लगडपालः, सहायकाचार्यः, मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**निदेशकः**, मुक्तस्वाध्यायपीठम्
रमाकान्तपाण्डेयः, सहाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**प्रकाशकः**

के.बी.सुब्बारायुडु, कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रथमसंस्करणम् - 2013
प्रतयः - 2000

ISBN : 81-86111-49-2

मूल्यम् : 190/-

**अक्षरसंयोजनम्**
राजीवकुमारसिंहः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**मुद्रकः**
डी.वी. प्रिंटर्स
97-यू.बी., जवाहरनगरम्, दिल्ली-110 007

www.thearyasamaj.org

# पुरोवाक्

भर्तृहरिनीतिशतकस्य पूर्वार्धम् आधारीकृत्य रचिता स्वाध्यायसामग्री संस्थानेन पूर्वं प्रकाशिता आसीत्। तस्यैव उत्तरार्धस्य प्रकाशनविषयकः सङ्कल्पः अधुना साकारतां गतः।

स्वाध्याययोजनाविषये, चतुर्थदीक्षास्तरविषये, भर्तृहरिमुद्दिश्य, नीतिशतकमुद्दिश्य च पूर्वं प्रकाशितपूर्वार्धस्य पुरोवाचि निरूपितमित्यतः तत्पुनरत्र न विव्रियते।

अत्र हि उत्तारार्धे महतां स्वभाववर्णनात्मकाः पञ्च श्लोकाः, सत्सङ्गविषये सतामाचरणविषये च त्रयः श्लोकाः, परोपकारविषयिणः चत्वारः श्लोकाः, सतां मैत्रीमुद्दिश्य रचिताः षट् श्लोकाः, धीरताबोधकाः पञ्च श्लोकाः, शीलसंरक्षणविषयकाः चत्वारः श्लोकाः, विधिलीलावर्णनात्मकाः अष्टौ श्लोकाः, आपदि धैर्यधारणबोधकौ द्वौ श्लोकौ, सत्कर्मप्रशंसकाः नव श्लोकाः, तपःपुण्यफलनिरूपकाः चत्वारः, सद्गुणप्रशंसाविषयकौ द्वौ चेति आहत्य 50 श्लोकाः सङ्गृहीताः सन्ति। नीतिबोधकान् तान् महत्त्वपूर्णान् श्लोकान् आधारीकृत्य रचिता एषा स्वाध्यायसामग्री। विषयसमूहस्य आधारेण गणशः श्लोकान् विभज्य इह 11 (एकादश) पाठाः कल्पिताः।

अत्रेदम् अवधेयं यत् विभिन्नप्रकाशकैः प्रकाशितेषु भर्तृहरिनीतिशतकस्य विभिन्नसंस्करणेषु श्लोकानाम् उपस्थापनस्य अनुक्रमे भेदोऽस्ति। श्लोकानां संख्यायामपि भेदो लक्ष्यते। क्वचित् आहत्य अष्टनवति-श्लोकाः, क्वचित् शतम्, क्वचित् 102, क्वचित् इतोप्यधिकश्लोकाः इत्येवं भेदो दृश्यते। राष्ट्रियसंस्कृतसंस्थानेन तावत् अस्यां योजनायां प्रकाशिते भर्तृहरिनीतिशतकस्य पूर्वार्धे 50 श्लोकाः, सम्प्रति प्रकाश्यमाने उत्तारार्धे च 50 एव श्लोकाः स्वाध्यायसामग्रीनिर्माणाय प्रयुक्ताः। किन्तु अध्येतॄणाम् अनुसन्धातॄणां चोपयोगाय ग्रन्थान्ते अतिरिक्तश्लोकानां सङ्ग्रहः प्रदत्तः यत्र भर्तृहरिप्रणीतनीतिसुभाषितत्वेन कैश्चिद् विद्वद्भिः अभिमताः, नीतिशतकस्य विभिन्न-संस्करणेषु प्रकाशिताः (अतिरिक्त)-श्लोकाः सङ्कलिताः।

ग्रन्थस्यास्य अध्येतारः भाषाशिक्षणेन सह, संस्कृतसुभाषितसाहित्यस्य माधुरीम् आस्वादयेयुः, भाषायां प्रौढिमां प्राप्नुयुः, विभिन्नशैल्या प्रयोगसामर्थ्यं प्राप्नुयुः आशयानां विशदीकरणसामर्थ्यं च प्राप्नुयुः इत्याशासे।

सन्दर्भेऽस्मिन् अस्याः स्वाध्यायसामग्र्याः लेखन-पुनरीक्षण-सम्पादन-संयोजनादिकर्मभिः सम्बद्धान् संस्थानपरिवारसदस्यान्, मुद्रकं च अभिनन्दामि।

राधावल्लभत्रिपाठी
कुलपतिः

www.thearyasamaj.org

# विषयसूची


| पाठाः | विषयाः | | पृ.सं. |
|---|---|---|---|
| प्रथमः पाठः | महतां स्वभावः | श्लोकसङ्ख्या | 01-40 |
| | वाञ्छा सज्जनसङ्गतौ .... | 51 | |
| | विपदि धैर्यमथाभ्युदये .... | 52 | |
| | करे श्लाघ्यस्त्यागः .... | 53 | |
| | सम्पत्सु महतां .... | 54 | |
| | प्रदानं प्रच्छन्नं .... | 55 | |
| द्वितीयः पाठः | सत्सङ्गः/सताम् आचरणम् | | 41-68 |
| | सन्तप्तायसि संस्थितस्य .... | 56 | |
| | यः प्रीणयेत्सुचरितैः .... | 57 | |
| | नम्रत्वेनोन्नमन्तः परगुणकथनै .... | 58 | |
| तृतीयः पाठः | परोपकारः | | 69-105 |
| | भवन्ति नम्रास्तरवः .... | 59 | |
| | श्रोत्रं श्रुतेनैव .... | 60 | |
| | पद्माकरं दिनकरो .... | 61 | |
| | एते सत्पुरुषाः .... | 62 | |
| चतुर्थः पाठः | सतां मैत्री | | 106-160 |
| | पापान्निवारयति योजयते .... | 63 | |
| | क्षीरेणात्मगतोदकाय हि .... | 64 | |
| | इतः स्वपिति .... | 65 | |
| | तृष्णां छिन्धि भज .... | 66 | |
| | मनसि वचसि .... | 67 | |
| | किं तेन हेमगिरिणा .... | 68 | |

www.thearyasamaj.org




| | | |
|---|---|---|
| पञ्चमः पाठः **धीरता** | | 161-200 |
| रत्नैर्महाब्धेस्तुतुषुर्न .... | 69 | |
| कान्ताकटाक्षविशिखा न .... | 70 | |
| क्वचित् पृथ्वीशय्यः .... | 71 | |
| निन्दन्तु नीतिनिपुणा .... | 72 | |
| कदर्थितस्यापि हि .... | 73 | |
| षष्ठः पाठः **शीलसंरक्षणम्** | | 201-235 |
| वरं शृङ्गोत्सङ्गाद्गुरुशिखरिणः .... | 74 | |
| वह्निस्तस्य जलायते .... | 75 | |
| छिन्नोऽपि रोहति ..... | 76 | |
| ऐश्वर्यस्य विभूषणं .... | 77 | |
| सप्तमः पाठः **दैवं शरणम्/विधिलीला/आपदि धैर्यम्** | | 236-318 |
| नेता यस्य बृहस्पतिः .... | 78 | |
| भग्नाशस्य करण्डपिण्डिततनोर्म्लानेन्द्रियस्य .... | 79 | |
| खल्वाटो दिवसेश्वरस्य .... | 80 | |
| गजभुजङ्गविहङ्गमबन्धनं .... | 81 | |
| सृजति तावदशेषगुणाकरं .... | 82 | |
| येनैवाम्बरखण्डेन संवीतो .... | 83 | |
| अयममृतनिधानं नायकोऽप्योषधीनाम् .... | 84 | |
| प्रियसख ! विपद्दण्डाघातप्रपातपरम्परा- .... | 85 | |
| विरम विरमायासादस्माद् .... | 86 | |
| दैवेन प्रभुणा स्वयं .... | 87 | |
| अष्टमः पाठः **कर्मफलम्/सत्कर्मप्रशंसा/पुण्यफलम्** | | 319-420 |
| नमस्यामो देवान्नु .... | 88 | |
| ब्रह्मा येन कुलालवन्नियमितो .... | 89 | |
| या साधूंश्च खलान् .... | 90 | |
| शुभ्रं सद्म सविभ्रमा .... | 91 | |
| कर्मायत्तं फलं पुंसां .... | 92 | |

www.thearyasamaj.org




| | | | |
|---|---|---|---|
| | गुणवदगुणवद्वा कुर्वता कार्यजातं .... | 93 | |
| | स्थाल्यां वैदूर्यमय्यां पचति .... | 94 | |
| | नैवाकृतिः फलति नैव .... | 95 | |
| | मज्जत्वम्भसि यातु मेरुशिखरं .... | 96 | |
| | वने रणे शत्रुजलाग्निमध्ये .... | 97 | |
| | भीमं वनं भवति .... | 98 | |
| नवमः पाठः | **सद्गुणप्रशंसा** | | 421-425 |
| | अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः .... | 99 | |
| | लज्जागुणौघजननीं जननीमिव .... | 100 | |
| परिशिष्टम् | 1. **अतिरिक्तश्लोकाः** | | 426-428 |
| | 2. **भर्तृहरिनीतिशतकात् उद्धृताः विशिष्टाः सूक्तयः** | | 429-430 |
| | 3. **अकारादिक्रमेण श्लोकसूची** | | 431-432 |


◆◆◆

www.thearyasamaj.org

## सङ्केताक्षरसूची

**वचनम्**

| | | |
|---|---|---|
| एक. | – | एकवचनम् |
| द्वि. | – | द्विवचनम् |
| बहु. | – | बहुवचनम् |

**विभक्तिः**

| | | |
|---|---|---|
| प्र. | – | प्रथमा |
| द्विती. | – | द्वितीया |
| तृ. | – | तृतीया |
| चतु. | – | चतुर्थी |
| पं. | – | पञ्चमी |
| षष्ठी | – | षष्ठी |
| सप्त. | – | सप्तमी |
| सम्बो.प्र. | – | सम्बोधनप्रथमा |

**पुरुषः**

| | | |
|---|---|---|
| प्रपु. | – | प्रथमपुरुषः |
| मपु. | – | मध्यमपुरुषः |
| उपु. | – | उत्तमपुरुषः |

**लिङ्गम्**

| | | |
|---|---|---|
| पुं. | – | पुंलिङ्गः |
| स्त्री. | – | स्त्रीलिङ्गः |
| नपुं. | – | नपुंसकलिङ्गः |
| त्रि. | – | त्रिलिङ्गः |

**समासः**

| | | |
|---|---|---|
| द्विती. तत्पु. | – | द्वितीयातत्पुरुषः |
| तृ. तत्पु. | – | तृतीयातत्पुरुषः |
| चतु. तत्पु. | – | चतुर्थीतत्पुरुषः |
| पं. तत्पु. | – | पञ्चमीतत्पुरुषः |
| षष्ठी तत्पु. | – | षष्ठीतत्पुरुषः |
| सप्त. तत्पु. | – | सप्तमीतत्पुरुषः |
| नञ् तत्पु. | – | नञ् तत्पुरुषः |

**अन्त्यवर्णनिर्देशः**

| | | |
|---|---|---|
| अ. | – | अकारान्तः |
| द. | – | दकारान्तः |

एवमेव अन्येषामपि अजन्तानां हलन्तानां च।

**सन्धिः**

| | | |
|---|---|---|
| स.दी.सन्धिः | – | सवर्णदीर्घसन्धिः |

**सूत्रम्**

| | | |
|---|---|---|
| पा.सू. | – | पाणिनीयसूत्रम् |

**अन्यः सङ्केतः**

| | | |
|---|---|---|
| सर्व. | – | सर्वनामशब्दः |
| वि.लि. | – | विधिलिङ् |
| क्रि. वि. | – | क्रियाविशेषणम् |
| वि. | – | विशेषणम् |
| समस्तम् | – | समस्तपदम् |
| आत्म. | – | आत्मनेपदी |
| परस्मै. | – | परस्मैपदी |
| उभय. | – | उभयपदी |
| भू. क. कृ. | – | भूतकालिक-कर्मणि-कृदन्तम् |
| वि. पू. कर्म. | – | विशेषण-पूर्वपद-कर्मधारयः |
| वि. उ. कर्म. | – | विशेषण-उभयपद-कर्मधारयः |
| अव पू.कर्म. | – | अवधारणा-पूर्वपद-कर्मधारयः |

* एवमेव अन्येषाम् अजन्तानां हलन्तानाञ्च। अन्यः सङ्केतः।

www.thearyasamaj.org

## प्रथमः पाठः – महतां स्वभावः

**श्लोकः**

वाञ्छा सज्जनसङ्गतौ परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खलै-
रेते येषु वसन्ति निर्मलगुणास्तेभ्यो महद्भ्यो नमः ॥ 51 ॥*

**पदच्छेदः**

वाञ्छा सज्जन-सङ्गतौ पर-गुणे प्रीतिः गुरौ नम्रता
विद्यायाम् व्यसनम् स्वयोषिति रतिः लोकापवादात् भयम् ।
भक्तिः शूलिनि शक्तिः आत्म-दमने संसर्गमुक्तिः खलैः
एते येषु वसन्ति निर्मलगुणाः तेभ्यः महद्भ्यः नमः ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| वाञ्छा | आ. स्त्री. प्र. एक. | शूलिनि | शूलिन्- न. पुं. सप्त. एक. |
| सज्जनसङ्गतौ | इ. स्त्री. सप्त. एक. | शक्तिः | इ. स्त्री. प्र. एक. |
| परगुणे | अ. पुं. सप्त. एक. समस्तम् | आत्मदमने | अ. नपुं. सप्त. एक. समस्तम् |
| प्रीतिः | इ. स्त्री. प्र. एक. | संसर्गमुक्तिः | इ. स्त्री. प्र. एक. समस्तम् |
| गुरौ | उ. पुं. सप्त. एक. | खलैः | अ. पुं. तृ. बहु. |
| नम्रता | आ. स्त्री. प्र. एक. | एते | एतद्- द. पुं. प्र. बहु. सर्व. |
| विद्यायाम् | आ. स्त्री. सप्त. एक. | येषु | यद्- द. पुं. सप्त. बहु. सर्व. |
| व्यसनम् | अ. नपुं. प्र. एक. | वसन्ति | वस्- लट्. प्रपु. बहु. (क्रियापदम्) |
| स्वयोषिति | त. स्त्री. सप्त. एक. समस्तम् | निर्मलगुणाः | अ. पुं. प्र. बहु. |
| रतिः | इ. स्त्री. प्र. एक. | तेभ्यः | तद्- द. पुं. चतु. बहु. सर्व. (वि.) |
| लोकापवादात् | अ. पुं. पं. एक. | | |

* पूर्वार्धे 50 श्लोकाः प्रस्तुताः । अत्र ततोऽग्रे 51, 52 इत्यादिक्रमेण क्रमसङ्ख्या श्लोकान्ते उल्लिखिता ।

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| भयम् | अ. नपुं. प्र. एक. | महद्भ्यः | त. पुं. चतु. बहु. (वि.) |
| भक्तिः | इ. स्त्री. प्र. एक. | नमः | अव्ययम् |

## आकाङ्क्षा

**नमः (अस्तु)।**

केभ्यः नमः अस्तु ? — महद्भ्यः नमः (अस्तु)।

केभ्यः महद्भ्यः नमः ? — निर्मलगुणाः येषु वसन्ति तेभ्यः महद्भ्यः नमः।

के निर्मलगुणाः ? — सज्जनसङ्गतौ वाञ्छा, परगुणे प्रीतिः, गुरौ नम्रता, विद्यायां व्यसनम्, स्वयोषिति रतिः, लोकापवादाद् भयम्, शूलिनि भक्तिः, आत्मदमने शक्तिः, खलैः संसर्गमुक्तिः (इति) एते निर्मलगुणाः।

## अन्वयः

सज्जन-सङ्गतौ वाञ्छा, परगुणे प्रीतिः, गुरौ नम्रता, विद्यायां व्यसनम्, स्वयोषिति रतिः, लोकापवादात् भयम्, शूलिनि भक्तिः, आत्मदमने शक्तिः, खलैः (सह) संसर्ग-मुक्तिः (इति) एते निर्मलगुणाः येषु वसन्ति तेभ्यः महद्भ्यः नमः।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| सज्जनसङ्गतौ | सज्जनसङ्गमे | सज्जनों की संगति में | in the company of virtuous |
| वाञ्छा | अभिलाषः | अभिलाषा | desire |
| परगुणे | अन्यगुणे | दूसरों के गुण में | in quality of others |
| प्रीतिः | प्रसन्नता | प्रसन्नता | happiness |
| गुरौ | श्रेष्ठे | गुरु में | in elders |
| नम्रता | नम्रव्यवहारः | नम्र व्यवहार | modesty |
| विद्यायाम् | विद्याप्राप्तौ | विद्या प्राप्त करने में | in learning |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| व्यसनम् | आसक्तिः | आसक्ति | indulgence |
| स्वयोषिति | स्वपत्न्याम् | अपनी पत्नी में | in own wife |
| रतिः | अनुरागः | अनुराग | affection |
| लोकापवादात् | लोकनिन्दायाः | लोक निन्दा से | from malicious talk |
| भयम् | भीतिः | भय | fear |
| शूलिनि | शिवे | शिव में | in *Śiva* |
| भक्तिः | श्रद्धा | श्रद्धा | devotion |
| आत्मदमने | स्वनियन्त्रणे | अपने पर नियन्त्रण में | in self-control |
| शक्तिः | बलम् | शक्ति | power |
| खलैः (सह) | दुर्जनैः (सह) | दुर्जनों (के साथ) | of wicked person |
| संसर्गमुक्तिः | सङ्गत्यागः | संगति का त्याग | shunning association |
| एते | इमे | ये | these |
| निर्मलगुणाः | स्वच्छगुणाः | निर्मल गुण | pure qualities |
| येषु | येषु जनेषु | जिन लोगों में | in those people |
| वसन्ति | तिष्ठन्ति | रहते हैं | live |
| तेभ्यः | तेभ्यः (सज्जनेभ्यः) | उन (लोगों) को | to those (people) |
| महद्भ्यः | श्रेष्ठेभ्यः | श्रेष्ठों को | to elders |
| नमः | प्रणामः (अस्ति) | नमस्कार (है) | salutation |

**भावार्थः**

**संस्कृतम्–** सज्जन-संसर्गे अभिलाषः, अन्यगुणे प्रसन्नता, श्रेष्ठे नम्रभावः, ज्ञानार्जने आसक्तिः, स्वभार्यायाम् अनुरागः, लोकनिन्दायाः भीतिः, शिवे भक्तिः, स्वनियन्त्रणे शक्तिः, दुर्जनसङ्गत्यागः इत्येते स्वच्छगुणाः येषु भवन्ति ते पुरुषश्रेष्ठाः भवन्ति, तेभ्यो निर्मलश्रेष्ठगुणेभ्यो नमोऽस्तु।

**हिन्दी–** सज्जनों की संगति में इच्छा, दूसरे के गुणों में प्रसन्नता, श्रेष्ठ लोगों के प्रति नम्रता, विद्या में लगाव, अपनी पत्नी पर अनुराग, लोकनिन्दा से भय, शिव में भक्ति, अपने पर नियन्त्रण करना, दुर्जनों का साथ छोड़ना इत्यादि अच्छे गुण जिनमें रहते हैं, उन श्रेष्ठ लोगों को नमस्कार है।

www.thearyasamaj.org



**आङ्ग्लम्**– Salutation to those great persons, who own these pure qualities desire for the company of the virtuous, attraction towards the quality of others, modesty towards elders, indulgence in learning, affection to own wife, fear of malicious talk, devotion in lord *Śiva*, power of self control and shunning from contact of wicked persons.

## निदर्शनम्

(i) व्याकरणम्

**(क) सन्धिः**

| | | |
|---|---|---|
| प्रीतिर्गुरौ | – | प्रीतिः + गुरौ (विसर्ग-सन्धिः) |
| रतिर्लोकापवादाद् | – | रतिः + लोकापवादाद् (विसर्ग-सन्धिः) |
| लोकापवादादभयम् | – | लोकापवादात् + भयम् (जश्त्व-सन्धिः) |
| शक्तिरात्मदमने | – | शक्तिः + आत्मदमने (विसर्ग-सन्धिः) |
| खलैरेते | – | खलैः + एते (विसर्ग-सन्धिः) |
| निर्मलगुणास्तेभ्यः | – | निर्मलगुणाः + तेभ्यः (विसर्ग-सन्धिः) |
| महद्भ्यो नमः | – | महद्भ्यः + नमः (विसर्ग-सन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| सज्जनसङ्गतौ | – | सज्जनानां सङ्गतिः सज्जनसङ्गतिः (षष्ठी तत्पु.) तस्याम् |
| परगुणे | – | परस्य गुणः परगुणः (षष्ठी तत्पु.) तस्मिन् |
| स्वयोषिति | – | स्वस्य योषित् स्वयोषित् (षष्ठी तत्पु.) तस्याम् |
| लोकापवादात् | – | लोकानाम् अपवादः लोकापवादः (षष्ठी तत्पु.) तस्मात् |
| आत्मदमने | – | आत्मनः दमनम् आत्मदमनम् (षष्ठी तत्पु.) तस्मिन् |
| संसर्गमुक्तिः | – | संसर्गात् मुक्तिः संसर्गमुक्तिः (पं. तत्पु.) |
| निर्मलगुणाः | – | निर्मलाः गुणाः येषु ते निर्मलगुणाः (बहुव्रीहिः) |

**(ग) तद्धितः**

| | | |
|---|---|---|
| शूलिनि | – | शूलम् अस्ति यस्येत्यर्थे शूल + इन् – शूलिन्, सप्त. एक. रूपम् |

www.thearyasamaj.org



यथा– अर्थ + इन् = अर्थित् तस्मिन् अर्थिनि

(घ) **कारकम्**

महद्भ्यो नमः – नमः योगे महच्छब्दात् चतुर्थी विभक्तिः।

(ii) **पर्यायशब्दाः**

| | | |
|---|---|---|
| वाञ्छा | – | इच्छा, अभिलाषः |
| गुरुः | – | श्रेष्ठः, ज्येष्ठः |
| योषित् | – | स्त्री, अबला, पत्नी |
| रतिः | – | अनुरागः, प्रेम, स्नेहः |
| शूली | – | शिवः, रुद्रः, भवः, त्रिशूली |

(iii) **छन्दः** – शार्दूलविक्रीडितम्

**लक्षणम्** – "सूर्याश्वैर्यदि मस्तताः सगुरवः शार्दूलविक्रीडितम्।" (अस्मिन् छन्दसि प्रतिपादे एकोनविंशतिः वर्णाः भवन्ति।)

(iv) **विशेषः** – अस्मिन् पद्ये सज्जनानां गुणाः निर्दिष्टाः सन्ति। वयमपि एतान् गुणान् स्वस्मिन् संयोज्य महान्तो भवितुमर्हाः।

---

## अभ्यासः – 1
## श्लोकः – 51

1. **यथोचितं सन्धिं विसन्धिं वा कुरुत–**

(i) प्रीतिर्गुरौ – .................... ....................

(ii) लोकापवादाद् भयम् – .................... ....................

(iii) शक्तिरात्मदमने – .................... ....................

(iv) गुणास्तेभ्यो नमः – .................... ....................

www.thearyasamaj.org



(v) .................... – शक्तिः आत्मदमने

(vi) .................... – महद्भ्यः नमः

2. समाधत्त–

(i) नम्रता कुत्र प्रदर्शनीया ? ....................

(ii) शक्तिः कुत्र भवेत् ? ....................

(iii) कैः संसर्ग-मुक्तिः अपेक्षिता ? ....................

(iv) शूलिनि भक्तिः, विद्याव्यसनं परगुणे प्रीतिश्च केन नाम्ना उच्यन्ते ?

....................

(v) कविः कं नौति ? ....................

3. कोष्ठकात् यथोचितरूपं स्वीकृत्य वाक्यं पूरयत–

(i) येषु वसन्ति .................... तेभ्यो नमः। (दुर्गुणाः/निर्मलगुणाः)

(ii) रतिः ....................। (स्वयोषिति/अन्यस्त्रियाम्)

(iii) सज्जनसङ्गतौ .................... भवेत्। (इच्छा/नम्रता)

4. श्लोके रतिः शब्दः रम् + क्तिन् इत्यनेन निष्पन्नः। रिक्तस्थाने अन्यान् एतादृशान् शब्दान् लिखत–

(i) .................... (ii) .................... (iii) ....................

(iv) .................... (v) .................... (vi) ....................

5. कोष्ठके प्रदत्तस्य निर्देशस्य अनुसारं रिक्तस्थाने उचितं पदप्रयोगं कुरुत–

यथा– (i) मम शिवे <u>भक्तिः</u> अस्ति। (भज् + क्तिन् प्र. एक.)

(ii) तव सज्जनानां .................... वाञ्छा भवेत्। (सम्-गम् + क्तिन्, सप्त. एक.)

(iii) दुर्जनसंसर्गात् .................... आवश्यिकी। (मुच् + क्तिन् प्र. एक.)

(iv) श्रेष्ठेभ्यो .................... नमः। (जन चतु. बहु.)

(v) देवाः + सन्ति ....................। (सन्धिं कुरुत)

www.thearyasamaj.org



(vi) विद्यायाम् + व्यसनम् + भवतु .................. । (सन्धिं कुरुत)

(vii) विष्णुः .................. देवोऽस्ति (सर्वेषां प्रियः समस्तम्)

(viii) सर्वे देवाः स्वर्गे .................. । (वस् + लट् प्रपु. बहु.)

(ix) ते बालकाः कथं .................. । (हस् + लट् प्रपु. बहु.)

6. अधः प्रदत्तशब्दानां सहाय्येन प्रश्नानामुत्तराणि लिखत–

(i) महान्तो जनाः के भवन्ति ? ..................

(ii) केषां सङ्गतौ वाञ्छा करणीया ? ..................

(iii) भयं कस्मात् करणीयं जनैः ? ..................

(iv) अस्मिन् पद्ये शूली कः उक्तः ? ..................

(v) अस्मात् श्लोकात् का शिक्षा लभ्यते ? ..................

उत्तरसङ्केतः–

| | | |
|---|---|---|
| 1. निर्मलगुणाः | 2. सज्जनः | 3. लोकापवादः |
| 4. शिवः | 5. गुणयुक्ताः स्याम | |

7. यथोचितविभक्तिप्रयोगेण वाक्यं पूरयत–

(i) मम .................. व्यसनमस्ति। (विद्या)

(ii) परगुणे .................. भवेत्। (प्रीति)

(iii) जनानां .................. अतीव भक्तिरस्ति। (शूलिन्)

(iv) अनुरागः .................. कर्तव्यः। (स्वयोषित्)

(v) येषु निर्मलगुणाः भवन्ति ते .................. भवन्ति। (महत्/महान्/महान्तः)

(vi) तस्मै .................. .................. नमः। (श्रेष्ठ, देव)

8. 'शूलिन्' शब्दः इनि-प्रत्ययान्तः अस्ति, एतादृशान् त्रीन् शब्दान् लिखत–

.................. .................. ..................

9. 'महत्' शब्दस्य रूपाणि पुंलिङ्गे यथानिर्देशं लिखत–

प्रथमा महान् .................. ..................

www.thearyasamaj.org



षष्ठी .................... .................... ....................

10. शुद्धेन शब्देन वाक्यं पूरयत–

(i) शिवः .................... कथितः । (शूली/शूलिनि/शूलिनः)

(ii) .................... जनात् सर्वस्य भयं भवति । (शूलिनः/शूलिने/शूलिभ्यः)

(iii) सर्वे .................... जनानां आदरं कुर्वन्ति । (महतः/महतां/महति)

(iv) इमौ देवौ .................... स्तः । (महान्तः/महान्/महान्तौ)

11. (क) समस्त-पदानां विग्रहवाक्यं लिखत–

(i) निर्मलगुणाः – ....................

(ii) आत्मदमनम् – ....................

(iii) सज्जनसङ्गति – ....................

(iv) व्याघ्रभयम् – ....................

(ख) समस्तं पदं समासनाम च लिखत–

(i) अन्यस्य दोषः – ....................

(ii) रामस्य योषित्, तस्याम् – ....................

(iii) चोरात् भीतिः, तया – ....................

(iv) निर्गतं व्यसनं यस्मात् सः – ....................

12. अस्य श्लोकस्य भावार्थं संस्कृतभाषया लिखत–

....................

....................

....................

....................

....................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**विपदि धैर्यमथाभ्युदये क्षमा**
**सदसि वाक्पटुता युधि विक्रमः।**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ**
**प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ 52 ॥**

**पदच्छेदः**

विपदि धैर्यम् अथ अभ्युदये क्षमा
सदसि वाक्-पटुता युधि विक्रमः।
यशसि च अभिरुचिः व्यसनम् श्रुतौ
प्रकृति-सिद्धम् इदम् हि महात्मनाम् ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| विपदि | विपद्- द. स्त्री. सप्त. एक. | च | अव्ययम् |
| धैर्यम् | अ. नपुं. प्र. एक. | अभिरुचिः | इ. स्त्री. प्र. एक. |
| अथ | अव्ययम् | व्यसनम् | अ. नपुं. प्र. एक. |
| अभ्युदये | अ. पुं. सप्त. एक. | श्रुतौ | श्रुति- इ. स्त्री. सप्त. एक. |
| क्षमा | आ. स्त्री. प्र. एक. | प्रकृतिसिद्धम् | प्रकृतिसिद्ध- अ. नपुं. प्र. एक. |
| सदसि | सदस्- स. नपुं. सप्त. एक. | | (समस्तम्) |
| वाक्पटुता | आ. स्त्री. प्र. एक. (समस्तम्) | इदम् | इदम्- म. नपुं. प्र. एक. सर्व. |
| युधि | युध्- ध. स्त्री. सप्त. एक. | हि | अव्ययम् |
| विक्रमः | अ. पुं. प्र. एक. | महात्मनाम् | महात्मन्- न. पुं. षष्ठी बहु. |
| यशसि | यशस्- स. नपुं. सप्त. एक. | | |

**आकाङ्क्षा**

**इदं (भवति)।**

किम् इदं भवति ? प्रकृतिसिद्धम् इदं भवति।

www.thearyasamaj.org



| | |
|---|---|
| तत् प्रकृतिसिद्धं किम् ? | विपदि धैर्यम् अथ अभ्युदये क्षमा, सदसि वाक्पटुता, युधि विक्रमः, यशसि च अभिरुचिः, श्रुतौ व्यसनं (च) प्रकृतिसिद्धं भवति। |
| विपदि धैर्यम् ............ इदं (गुणजातं) कस्य प्रकृतिसिद्धं भवति ? | विपदि धैर्यम् ............ इदं (गुणजातं) महात्मनां प्रकृतिसिद्धं भवति। |

## अन्वयः

विपदि धैर्यम् अथ अभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः यशसि च अभिरुचिः श्रुतौ व्यसनम् इदं हि (गुणजातं) महात्मनां प्रकृति-सिद्धं (भवति)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| विपदि | आपदि | विपत्ति में | in affliction |
| धैर्यम् | धीरता | धैर्य रखना | to have patience |
| अथ | तथा | और | and |
| अभ्युदये | उन्नतौ | उन्नति काल में | in prosperity |
| क्षमा | सहिष्णुता | सहिष्णुता रखना | to have endurance |
| सदसि | सभायाम् | सभा में | in assembly |
| वाक्पटुता | वाणीचातुर्यम् | वाणी की चतुराई | eloquence |
| युधि | युद्धे | युद्ध में | in war |
| विक्रमः | पराक्रमः | पराक्रम दिखाना | to show bravery |
| यशसि | कीर्तौ | यश के विषय में | for fame |
| च | तथा | और | and |
| अभिरुचिः | रुचिः | रुचि | liking |
| श्रुतौ | शास्त्रे | शास्त्र में | in *Śāstras* |
| व्यसनम् | आसक्ति | आसक्ति, लगाव रखना | having devotion |
| हि | निश्चयेन | निश्चय ही | surely |
| इदम् | उपर्युक्तं सर्वम् | उपर्युक्त ये सब | all above-said |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| महात्मनाम् | महानुभावानाम् | महात्माओं का | of great persons |
| प्रकृति-सिद्धम् | स्वभावसिद्धम् | स्वभाव से सिद्ध गुण | congenital/ qualities |
| भवति | अस्ति | है | is |

भावार्थः

**संस्कृतम्–** श्रेष्ठपुरुषाणां प्रकृति-सिद्धाः एते गुणाः भवन्ति यत् ते विपत्तौ धैर्यं धारयन्ति, अथ उन्नतिकाले सहिष्णुतां प्रदर्शयन्ति, सदसि वाक्चातुर्यं युद्धे च पराक्रमं दर्शयन्ति, तेषां यशसि अधिका रुचिर्भवति शास्त्रे च आसक्तिः भवति।

**हिन्दी–** विपत्ति में धैर्य रखना और उन्नति काल में सहिष्णुता रखना, सभा में वाक्पटुता एवं युद्ध में पराक्रम दिखाना, यश में रुचि रखना एवं शास्त्र में आसक्ति रखना, ये सब गुण महान् लोगों में स्वाभाविक रूप से होते हैं।

**आङ्ग्लम्–** Patience in affliction, endurance in prosperity, eloquence in assemble, bravery in wars, desire of fame and highly devoted to study of *Vēdaśāstras*, (these) are congenital qualities of great people.

## निदर्शनम्

(i) व्याकरणम्

(क) सन्धिः

अथाभ्युदये – अथ + अभ्युदये (स.दी.सन्धिः)

चाभिरुचिः – च + अभिरुचिः (स.दी.सन्धिः)

इदं हि – इदम् + हि (अनुस्वार-सन्धिः)

अभ्युदये – अभि + उदये (यण्-सन्धिः)

(ख) कृदन्तः

विपदि – वि-पद् + क्विप् - विपद् - क्विप् प्रत्ययान्तः स्त्रीलिङ्गो भवति।

www.thearyasamaj.org



(ख) **तद्धितः**

| | | |
|---|---|---|
| वाक्पटुता | – | वाक्पटोः भावः वाक्पटुता |
| | | वाक्पटु + तल् + टाप् |

(ii) **छन्दः** – वंशस्थवृत्तम् ।

**लक्षणम्** – जतौ तु वंशस्थमुदीरितं जरौ ।

(iii) **पर्यायशब्दाः**

| | | |
|---|---|---|
| विपत् | – | विपत्तिः, आपत्, आपत्तिः |
| क्षमा | – | क्षान्तिः |
| यशः | – | कीर्तिः |

---

## अभ्यासः – 2
## श्लोकः – 52

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

विपदि .................................. क्षमा

.................. वाक्पटुता ............ ............... ।

यशसि ..................................व्यसनं श्रुतौ

प्रकृति-सिद्धमिदं हि .............................. ॥

2. **यथोचितं सन्धिं विसन्धिं वा कुरुत–**

(i) धैर्यमथाभ्युदये – ..............................

(ii) चाभिरुचिः – ..............................

(iii) व्यसनम् + श्रुतौ – ..............................

(iv) प्रकृतिसिद्धम् इदम् हि – ..............................

www.thearyasamaj.org



**3. श्लोके प्रयुक्तान् सप्तमीविभक्तिकान् हलन्तशब्दान् चित्वा लिखत–**

**यथा–** युधि

.................... .................... ....................

**4. श्लोकस्थ-प्रथमान्तपदानि लिखत–**

.................... .................... .................... ....................

.................... .................... .................... ....................

**5. श्लोकानुसारं यथोचितं योजयत–**

**यथा–**

| | | | |
|---|---|---|---|
| (i) | श्रुतौ | (क) | धैर्यम् |
| (ii) | सदसि | (ख) | वाक्पटुता |
| (iii) | विपदि | (ग) | अभिरुचिः |
| (iv) | अभ्युदये | (घ) | व्यसनम् |
| (v) | यशसि | (ङ) | क्षमा |

**6. प्रश्नानाम् उत्तरं लिखत–**

(i) युधि विक्रमं के प्रदर्शयन्ति ? ....................

(ii) सदसि का प्रदर्शनीया ? ....................

(iii) श्रुतौ व्यसनं यशसि च का भवेत् ? ....................

(iv) प्रकृतिसिद्धगुणाः के के भवन्ति ? ....................

**7. यथोचितपदेन रिक्तस्थानं पूरयत–**

(i) .................... क्षमा। (अभ्युदये/विपदि)

(ii) श्रुतौ ....................। (अभिरुचिः/व्यसनम्)

(iii) इदं हि महात्मनाम् .................... स्वभावः। (कृत्रिमः/प्रकृति-सिद्धः)

www.thearyasamaj.org



8. अधोलिखित-शब्दानां लिङ्ग-विभक्ति-वचनानि लिखत–

| | | | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| (i) | विपदि | – | ........ | ........ | ........ |
| (ii) | यशसि | – | ........ | ........ | ........ |
| (iii) | महात्मनाम् | – | ........ | ........ | ........ |
| (iv) | वाक्पटुता | – | ........ | ........ | ........ |

9. सन्धिविच्छेदं कुरुत–

| | | | | | |
|---|---|---|---|---|---|
| (i) | अथाभ्युदये | – | ........ | ........ | ........ |
| (ii) | चाभिरुचिः | – | ........ | ........ | |
| (iii) | वैर्यमथाभ्युदये | – | ........ | ........ | ........ |
| (iv) | प्रकृतिसिद्धमिदं हि | – | ........ | ........ | ........ |

10. क्विप्-प्रत्ययं संयोज्य निष्पन्नं रूपं लिखत–

(i) क्षुध् + क्विप् – ........

(ii) सम्-पद् + क्विप् – ........

(iii) वि-पद् + क्विप् – ........

11. यथोचितं समस्तं पदं विग्रहवाक्यं वा लिखत–

(i) महान् आत्मा यस्य सः – ........

(ii) युद्धे निपुणः, तेन – ........

(iii) धर्मात्मा – ........

(iv) वाक्यसंयमः – ........

12. यथोदाहरणम् अधोलिखितशब्दानां रूपाणि प्रथमायां सप्तम्यां च लिखत–

| | | | | |
|---|---|---|---|---|
| यथा– विपद् | प्र. | विपद् | विपदौ | विपदः |
| | सप्त. | विपदि | विपदोः | विपत्सु |

www.thearyasamaj.org



| | | | | |
|---|---|---|---|---|
| युध् | प्र. | .................... | .................... | .................... |
| | सप्त. | .................... | .................... | .................... |
| सम्पद् | प्र. | .................... | .................... | .................... |
| | सप्त. | .................... | .................... | .................... |
| क्षुध् | प्र. | .................... | .................... | .................... |
| | सप्त. | .................... | .................... | .................... |

13. यथोचितपदेन रिक्तस्थानं पूरयत–

(i) मम .................... च्युतं न भवति। (धैर्यम्/विपत्)

(ii) तव इयं .................... कठिना। (रोगः/विपत्तिः)

(iii) ममाभिरुचिः .................... अस्ति। (देहस्य/यशसि)

(iv) महात्मसु .................... केचन गुणाः भवन्ति। (स्वतः सिद्धाः/कृत्रिमाः)

14. अस्य श्लोकस्य भावार्थं स्वगिरा लिखत–

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता**
**मुखे सत्या वाणी विजयिभुजयोर्वीर्यमतुलम् ।**
**हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयो-**
**र्विनाऽप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥ 53 ॥**

**पदच्छेदः**

करे श्लाघ्यः त्यागः शिरसि गुरुपाद-प्रणयिता
मुखे सत्या वाणी विजयि भुजयोः वीर्यम् अतुलम् ।
हृदि स्वच्छा वृत्तिः श्रुतम् अधिगतम् च श्रवणयोः
विना अपि ऐश्वर्येण प्रकृति-महताम् मण्डनम् इदम् ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| करे | अ. पुं. सप्त. एक. | स्वच्छा | आ. स्त्री. प्र. एक. वि. |
| श्लाघ्यः | अ. पुं. प्र. एक. | वृत्तिः | वृत्ति- इ. स्त्री. प्र. एक. |
| त्यागः | अ. पुं. प्र. एक. | श्रुतम् | श्रुत- अ. नपुं. प्र. एक. |
| शिरसि | शिरस्- स. नपुं. सप्त. एक. | अधिगतम् | अधिगत- अ. नपुं. प्र. एक. |
| गुरुपादप्रणयिता | आ. स्त्री. प्र. एक. समस्तम् | | अव्ययम् |
| मुखे | अ. नपुं. सप्त. एक. | च | अव्ययम् |
| सत्या | आ. स्त्री. प्र. एक. वि. | श्रवणयोः | श्रवण- अ. नपुं. सप्त. द्वि. |
| वाणी | ई. स्त्री. प्र. एक. विशेष्यम् | विना | अव्ययम् |
| विजयि | विजयिन्- न. नपुं. प्र. एक. | अपि | अव्ययम् |
| भुजयोः | भुज- अ. पुं. सप्त. द्वि. | ऐश्वर्येण | ऐश्वर्य- अ. नपुं. तृ. एक. |
| वीर्यम् | अ. नपुं. प्र. एक. विशेष्यम् | प्रकृतिमहताम् | प्रकृतिमहत्- त. पुं. षष्ठी बहु. |
| अतुलम् | अ. नपुं. प्र. एक. | मण्डनम् | अ. नपुं. प्र. एक. |
| हृदि | हृदय- अ. नपुं. सप्त. एक. | इदम् | म. नपुं. प्र. एक. सर्व. |

www.thearyasamaj.org



## आकाङ्क्षा

**इदं मण्डनं (भवति)।**

| | |
|---|---|
| किम् इदं मण्डनं भवति ? | करे श्लाघ्यः त्यागः, शिरसि गुरुपादप्रणयिता, मुखे सत्या वाणी, विजयिभुजयोः अतुलं वीर्यम्, हृदि स्वच्छा वृत्तिः, श्रवणयोः अधिगतं श्रुतं मण्डनं भवति। |
| केन विनापि इदं मण्डनं भवति ? | ऐश्वर्यं विनापि इदं मण्डनं भवति। |
| ऐश्वर्यं विनापि इदं केषां मण्डनं भवति ? | ऐश्वर्यं विनापि इदं प्रकृतिमहतां मण्डनं भवति। |

## अन्वयः

करे श्लाघ्यः त्यागः, शिरसि गुरुपादप्रणयिता, मुखे सत्या वाणी, भुजयोः विजयि अतुलं वीर्यम्, हृदि स्वच्छा वृत्तिः, श्रवणयोः अधिगतं श्रुतम् च ऐश्वर्येण विना अपि इदं (पूर्वोक्तं सर्वं) प्रकृतिमहताम् मण्डनं भवति।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| करे | हस्ते | हाथ में | in hand |
| श्लाघ्यः | प्रशस्यः | प्रशंसनीय | praiseworthy |
| त्यागः | दानम् | दान | charity |
| शिरसि | मस्तके | शिर में | in head |
| गुरुपादप्रणयिता | गुरोः चरणयोः अभिवादनम् | गुरु के चरणों में प्रेमभाव या अभिवादन | praying regards to teachers/elders feet or respect for elders with love |
| मुखे | आनने | मुख में | in mouth |
| सत्या वाणी | सत्या वाक् | सच्ची वाणी | true words |
| भुजयोः | बाह्वोः | भुजाओं में | in arms |
| विजयि | विजयदायि | विजय प्रदान करने वाला | victorious |
| अतुलम् | अतुलनीयम् | अतुलनीय | incomparable |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| वीर्यम् | बलम् | बल | valour, power |
| हृदि | हृदये | हृदय में | in heart |
| स्वच्छा | विशुद्धा | साफ-सुथरा | pure, pious |
| वृत्तिः | व्यापारः | व्यवहार | behaviour |
| श्रवणयोः | कर्णयोः | कानों में | in ears |
| अधिगतम् | प्राप्तम् | प्राप्त | obtained, got |
| श्रुतम् | शास्त्रम् | शास्त्र | scriptures |
| च | अथ | और | and |
| ऐश्वर्येण विना | विभूत्या विना | सम्पत्ति के विना | without wealth |
| अपि | अपि | भी | also |
| इदम् | (सत्या वाक्, बलम् इत्यादि) उपर्युक्तम् | यह (पूर्व प्रतिपादित सत्य वाणी, बल आदि) | (above-said of great people) |
| प्रकृतिमहताम् | स्वतःश्रेष्ठानाम् | स्वभाव से श्रेष्ठ, लोगों का | of people who are great by nature |
| मण्डनम् | अलङ्कारः | अलंकार | are ornaments |
| (भवति) | (अस्ति) | है | is |

**भावार्थः**

**संस्कृतम्–** स्वभावतो महतां जनानां कराभ्यां प्रशस्तं दानम्, गुरुचरणे शिरसोऽवनमनम्, मुखे सत्या वाक् भुजयोः विजयदायकं अतुलनीयं बलं, हृदये स्वच्छाचारः, श्रवणाभ्यां प्राप्तं शास्त्रं च ऐश्वर्येण विनैव भूषणानि भवन्ति। अर्थात् येषां हस्तौ दानेन प्रशस्तौ, गुरुचरणयोः नतिः, मुखे सत्या वाणी, बाहू अद्भुतबले, हृदयं स्वच्छं श्रवणे च शास्त्राधिगमने तत्परे स्तः, ते स्वभावसिद्धाः महापुरुषाः भवन्ति।

**हिन्दी–** हाथों में प्रशंसनीय दान, गुरुचरणों में सिर झुकाकर प्रेम प्रदर्शन, मुख में सत्य वाणी, भुजाओं में अतुलनीय विजय प्रदान करने वाला बल, हृदय में स्वच्छाचरण और श्रवणों में अधीत शास्त्र धनसम्पत्ति के विना भी भूषण हैं इन गुणों वाले स्वभावसिद्ध महापुरुष हैं।

**आंङ्ग्लम्–** Praiseworthy charity for the hand, bowing head towards elders feet with love, truth for the mouth, purity for the heart, knowledge of scriptures for the ears, all these are ornaments of good natured great people even though they have no wealth.

www.thearyasamaj.org



## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

| | | |
|---|---|---|
| श्लाघ्यस्त्यागः | – | श्लाघ्यः + त्यागः (विसर्गसन्धिः) |
| विनापि | – | विना + अपि (स.दी.सन्धिः) |
| विनाप्यैश्वर्येण | – | विनापि + ऐश्वर्येण (यण्-सन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| गुरुपादप्रणयिता | – | गुरोः पादौ गुरुपादौ (षष्ठी तत्पु.) गुरुपादयोः प्रणयिता गुरुपादप्रणयिता (षष्ठी तत्पु.) प्रणयिता, प्रणयः अस्ति अस्मिन् प्रणयिन्, प्रणयिनः भावः प्रणयिता। |
| प्रकृतिमहताम् | – | प्रकृत्या महान् प्रकृतिमहान् (तृ. तत्पु.) तेषाम् यथा– स्वभावेन सुन्दरः स्वभावसुन्दरः। |

**(ग) कारकम्**

| | | |
|---|---|---|
| ऐश्वर्येण विना | – | विना इत्यस्य योगे तृतीयाऽस्ति। विना योगे द्वितीयाऽपि भवति। **यथा–** धनेन विना/धनं विना अपि गुणाः भूषणानि भवन्ति। |

**(घ) कृदन्तः**

| | | |
|---|---|---|
| श्लाघ्यः | – | श्लाघ् + ण्यत् (कर्मणि) |
| अधिगतम् | – | अधि + गम् + क्त (कर्मणि) |

### (ii) पर्यायशब्दाः

| | | |
|---|---|---|
| करः | – | हस्तः |
| वीर्यम् | – | बलम्, पराक्रमः, विक्रमः |
| भुजः | – | बाहुः, दोः, प्रवेष्टः |
| श्रवणम् | – | कर्णः, श्रोत्रम्, श्रुतिः, श्रवः, शास्त्रम् |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| | हृदयम् | – | चेतः, चित्तम्, स्वान्तम्, हृत् |
| | मण्डनम् | – | भूषणम्, अलङ्करणम्, अलङ्कारः |
| (iii) | **छन्दः** | – | शिखरिणी छन्दः। |
| | **लक्षणम्** | – | रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी। |
| | **अलङ्कारः** | – | विभावना। कारणं विना यत्र कार्योत्पत्तिरस्ति तत्र विभावनालङ्कारः भवति। |

---

## अभ्यासः – 3
## श्लोकः – 53

**1. श्लोकानुसारम् उचितेन पदेन रिक्तस्थानं पूरयत–**

करे श्लाघ्यस्त्यागः .................... गुरुपादप्रणयिता
मुखे सत्या वाणी ....................मतुलम्।
हृदि .................... .................... श्रुतमधिगतं च ....................
.................... प्रकृतिमहतां ....................मिदम्॥

**2. यथोचितं सन्धिं विसन्धिं वा कुरुत–**

(i) श्लाघ्यस्त्यागः – ....................
(ii) भुजयोर्वीर्यमतुलम् – ....................
(iii) श्रुतम् + अधिगतम् + च – ....................
(iv) विना + अपि + ऐश्वर्येण – ....................

**3. श्लोकात् नपुंसकलिङ्ग-शब्दान् चित्वा लिखत–**

.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................

www.thearyasamaj.org



**4. श्लोकस्थान् स्त्रीलिङ्गशब्दान् संकलय्य लिखत–**

.................... .................... .................... ....................

....................

**5. वीर्यम् इत्यस्य विशेषणे लेख्ये ?**

.................... ....................

**6. अस्मिन् श्लोके प्रयुक्तानि सप्तम्यन्तपदानि लिखत–**

.................... .................... ....................

.................... .................... ....................

**7. समाधानं लिखत–**

(i) करस्य भूषणं किम् अस्ति ? ....................

(ii) गुरुचरणप्रणयिता कस्मिन् भवेत् ? ....................

(iii) भुजयोः कीदृशं बलं वर्णितम् ? ....................

(iv) श्रवणयोः भूषणं किमस्ति ? ....................

(v) प्रकृतिमहतां केन विना इदं भूषणम् ? ....................

(vi) प्रकृतिमहतां कति गुणाः अत्र वर्णिताः ? ....................

**8. यथाश्लोकं विशेषणविशेष्ये योजयत–**

| | | | |
|---|---|---|---|
| (i) | त्यागः | (क) | सत्या |
| (ii) | वाणी | (ख) | अतुलं विजयि |
| (iii) | वीर्यम् | (ग) | स्वच्छा |
| (iv) | वृत्तिः | (घ) | अधिगतम् |
| (v) | श्रुतम् | (ङ) | श्लाघ्यः |

www.thearyasamaj.org



9. मञ्जूषातः यथोचितरूपं स्वीकृत्य वाक्यं पूरयत–

| सत्या वाणी, सच्छास्त्रम्, प्रणयि, निष्कलङ्का |
|---|

(i) मुखे .................................... भवेत् ।

(ii) कर्णयोः .................................... भूषणमस्ति ।

(iii) हृदयस्य वृत्तिः .................................... भवेत् ।

(iv) शिरः गुरुचरणयोः .................................... भवेत् ।

10. प्रत्ययं संयोज्य पदं लिखत–

(i) वद् + ण्यत् – ..........................

(ii) धृ + ण्यत् – ..........................

(iii) विजय + इनि – ..........................

(iv) धन + इनि – ..........................

11. प्रश्नानामुत्तराणि लिखत–

(i) ऐश्वर्येण विना महापुरुषाणां कांश्चन त्रीन् गुणान् कथयत ?

..........................................................................................

(ii) किम् अधिगतं श्रवणभूषणं भवति ?

..........................................................................................

(iii) प्रकृतिमहतां हृदये कीदृशी वृत्तिः भवति ?

..........................................................................................

(iv) कस्य भुजयोराधेकं विजयि बलं भवति ?

..........................................................................................

(v) जनानां भूषणानि केन विना भवितुमर्हन्ति ?

..........................................................................................

www.thearyasamaj.org



12. अधः प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत–

| |
|---|
| करे, मुखे, भुजयोः, हृदि, श्रवणयोः, प्रकृतिमहताम् |

(i) सत्या वाणी .................... भवतु ।

(ii) स्वच्छा वृत्तिः .................... भवतु ।

(iii) अतुलं वीर्यम् .................... भवतु ।

(iv) श्रुतम् अधिगतम् .................... भवतु ।

(v) मण्डनमिदम् .................... भवति ।

(vi) श्लाघ्यस्त्यागः .................... भवतु ।

13. यथोचितं समस्तपदं विग्रहवाक्यं वा लिखत–

(i) मनसा पवित्रम् – ....................

(ii) यशसि अभिलाषः – ....................

(iii) प्रकृत्या कृपणः – ....................

(iv) हृदयस्य इच्छा – ....................

(v) मनःपूतम् – ....................

(vi) धर्माभिलाषः – ....................

(vii) स्वभावसुन्दरः – ....................

(viii) कोमलहृदयः – ....................

14. 'विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम्' इत्यस्याशयं संस्कृतभाषायां लिखत–

....................

....................

....................

....................

....................

www.thearyasamaj.org



15. अभ्यस्यत–

**सकारान्तः नपुंसकलिङ्गः "शिरस्"-शब्दः–**

| | | | |
|---|---|---|---|
| शिरः | शिरसी | शिरांसि | प्रथमा |
| " | " | " | द्वितीया |
| शिरसा | शिरोभ्याम् | शिरोभिः | तृतीया |
| शिरसे | " | शिरोभ्यः | चतुर्थी |
| शिरसः | " | " | पञ्चमी |
| " | शिरसोः | शिरसाम् | षष्ठी |
| शिरसि | " | शिरस्सु | सप्तमी |
| हे शिरः ! | हे शिरसि ! | हे शिरांसि ! | सम्बोधनम् |

एवमेव छन्दस्, पयस्, यशस्, सदस् इत्येतेषां रूपाणि भवन्ति। तानि रूपाणि पृथक् लिखत।

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम् ।**
**आपत्सु च महाशैलशिलासङ्घातकर्कशम् ॥ 54 ॥**

**पदच्छेदः**

सम्पत्सु महताम् चित्तम् भवति उत्पलकोमलम् ।
आपत्सु च महा-शैल-शिला-सङ्घात-कर्कशम् ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| सम्पत्सु | सम्पद्- द. स्त्री. सप्त. बहु. | आपत्सु | आपद्- द. स्त्री. सप्त. बहु. |
| महताम् | महत्- त. पुं. षष्ठी बहु. | च | अव्ययम् |
| चित्तम् | अ. नपुं. प्र. एक. | महाशैलशिला-सङ्घातकर्कशम् | अ. नपुं. प्र. एक. समस्तम् |
| भवति | भू- कर्तरि लट् प्रपु. एक. | | |
| उत्पलकोमलम् | अ. नपुं. प्र. एक. समस्तम् | | |

**आकाङ्क्षा**

**उत्पलकोमलं भवति ।**

| | |
|---|---|
| किं उत्पलकोमलं भवति ? | चित्तं उत्पलकोमलं भवति । |
| केषां चित्तं उत्पलकोमलं भवति ? | महतां चित्तं उत्पलकोमलं भवति । |
| महतां चित्तम् कदा उत्पलकोमलं भवति ? | महतां चित्तं सम्पत्सु (सतीषु) उत्पलकोमलं भवति । |

**महाशैलशिलासङ्घात-कर्कशं भवति ।**

| | |
|---|---|
| महाशैलशिलासङ्घात-कर्कशं किं भवति ? | चित्तं महाशैलशिलासङ्घात-कर्कशं भवति । |
| केषां चित्तं महाशैलशिलासङ्घात-कर्कशं भवति ? | महतां चित्तं महाशैलशिलासङ्घात-कर्कशं भवति । |
| महतां चित्तं कदा महाशैलशिलासङ्घात-कर्कशं भवति ? | आपत्सु (सतीषु) महतां चित्तं महाशैलशिलासङ्घात-कर्कशं भवति । |

www.thearyasamaj.org



**अन्वयः**

सम्पत्सु महतां चित्तम् उत्पलकोमलं भवति। आपत्सु च महाशैलशिलासङ्घातकर्कशं (भवति)।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| सम्पत्सु | सम्पत्तिकाले/अभ्युदये | सम्पत्ति काल में/ अभ्युदय काल में | in prosperity |
| महताम् | श्रेष्ठानां जनानाम् | श्रेष्ठ लोगों का | of high-souled people |
| चित्तम् | मनः | मन | mind |
| उत्पलकोमलम् | कमलवन्मृदु | कमल जैसा कोमल | soft like lotus |
| भवति | जायते | होता है | becomes |
| आपत्सु च | विपत्तौ च | और विपत्ति काल में | and in affliction |
| महाशैलशिला-सङ्घातकर्कशम् | विशालपर्वतानां प्रस्तर-समूहवत् कठोरम् | महापर्वत की शिला-समूह के समान कठोर | hard like the rocks of great mountain |
| (भवति) | (जायते) | (होता है) | (becomes) |

**भावार्थः**

**संस्कृतम्**– महाजनानां मनः अभ्युदयसमये कमलवत् कोमलं विकसितञ्च भवति, विपत्तिकाले च तेषां मनः महतः पर्वतस्य शिलाखण्डपुञ्जमिव कठोरं जायते।

**हिन्दी**– अभ्युदय के समय महान् लोगों का मन कमल के समान कोमल होता है (अर्थात् वे सदय एवं सहानुभूतिपूर्ण हो जाते हैं)। तथा विपत्तिकाल में उनका मन महापर्वत की चट्टानों के सदृश कठोर हो जाता है। (अर्थात् विपत्ति काल में कष्ट सहने हेतु उनका मन दृढ़ एव अविचल रहता है)।

**आङ्ग्लम्**– During prosperity, the mind of high-souled persons becomes soft like a lotus and in affiction it becomes hard like the rocks of a great mountain.

www.thearyasamaj.org



## निदर्शनम्

(i) व्याकरणम्

(क) सन्धिः

| | | |
|---|---|---|
| महतां चित्तम् | – | महताम् + चित्तम् (अनुस्वार-सन्धिः) |

(ख) कृदन्तः

| | | |
|---|---|---|
| सम्पत्सु | – | सम् + पद् + क्विप् - सम्पद् |
| आपत्सु | – | आ + पद् + क्विप् - आपद् |

(ग) समासः

| | | |
|---|---|---|
| उत्पलकोमलम् | – | उत्पलम् इव कोमलम् (कर्मधारयः) यथा– शिरीषमृदुलम् - शकुन्तलायाः शरीरं शिरीषमृदुलम् आसीत् । |
| महाशैलशिलासङ्घातकर्कशम् | – | महान् चासौ शैलश्च - महाशैलः (कर्मधारयः) महाशैलस्य शिलाः - महाशैलशिलाः (षष्ठी तत्पु.) महाशैलशिलानां सङ्घातः - महाशैलशिला-सङ्घातः, (षष्ठी तत्पु.) महाशैलशिलासङ्घात इव कर्कशम् - महाशैलशिलासङ्घातकर्कशम् (कर्मधारयः) |

(ii) पर्यायशब्दाः

| | | |
|---|---|---|
| आपतः | – | विपत्, विपत्तिः, आपत्तिः |
| कोमलम् | – | मृदु, मृदुलम्, पेशलम् |
| कर्कशम् | – | कठोरः, कठिनः, रूक्षः |
| शैलः | – | पर्वतः, भूधरः, महीधरः |

| | | |
|---|---|---|
| (iii) छन्दः | – | अनुष्टुप् छन्दः |
| लक्षणम् | – | श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघुपञ्चमम् । द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥ |
| (iv) अलङ्कारः | – | उत्पलकोमलं महाशैलशिलासङ्घातकर्कशम् इत्यनयोः उपमालङ्कारः |

www.thearyasamaj.org



(v) विशेषः – सम्पत्तौ अस्माभिरुदारैर्भाव्यम्। विपत्तौ च दुःखसहनाय मनः कठोरं कृत्वा दृढता प्रदर्शनीया। महाशैलशिलासङ्घातकर्कशम् इति उपमानवाची कर्मधारयः।

---

## अभ्यासः – 4

### श्लोकः – 54

1. **उत्तराणि लिखत–**

(i) श्लोके मुख्यं क्रियापदं किम् ? – ..........

(ii) सप्तम्यन्तं पदमत्र लिखत – ..........

(iii) समस्तपदमत्र लिखत – ..........

(iv) नपुंसकलिङ्गस्य शब्दान् एकत्र लिखत – ..........

2. **समाधत्त–**

(i) उन्नतिकाले महतां मनः कीदृशं भवति ? ..........

(ii) शिलासमूहवत् कठोरं कदा जायते ? ..........

(iii) सम्पत्तौ महतां मनः कोमलं कथं भवति ? ..........

3. **अधोलिखितपदानां परिचयं लिखत–**

(i) महताम् – .......... .......... .......... ..........

(ii) सम्पत्तौ – .......... .......... .......... ..........

(iii) आपत्सु – .......... .......... .......... ..........

(iv) भवति – .......... .......... .......... ..........

4. **प्रथमान्तपदानि चित्वा लिखत–**

.......... .......... .......... ..........

www.thearyasamaj.org



**5. अधोलिखितशब्दानां षष्ठ्यां सप्तम्यां च रूपाणि लिखत–**

| | | | | | |
|---|---|---|---|---|---|
| यथा– (i) | विपद् – | षष्ठी | विपदः | विपदोः | विपदाम् |
| | | सप्तमी | विपदि | विपदोः | विपत्सु |
| (ii) | महत् – | षष्ठी | ............ | ............ | ............ |
| | | सप्तमी | ............ | ............ | ............ |
| (iii) | आपत् – | षष्ठी | ............ | ............ | ............ |
| | | सप्तमी | ............ | ............ | ............ |
| (iv) | सम्पत् – | षष्ठी | ............ | ............ | ............ |
| | | सप्तमी | ............ | ............ | ............ |

**6. विग्रहवाक्यं समासनाम च लिखत–**

(i) शिरीषमृदुलम् – ............

(ii) पुष्पपेशलम् – ............

(iii) पर्वतशिलासमूहकठोरम् – ............

**7. प्रश्नयोः उत्तरे लिखत–**

(i) **सम्पत्तौ कमलकोमलं चेतः कस्य भवति ?**

............

(ii) **विपत्तौ कथं व्यवहारः कर्तव्यः ?**

............

**8. कोष्ठके निर्दिष्टस्य विग्रहस्य समस्तपदं विधाय रिक्तस्थले पूरयत–**

(i) उदाराणां चित्तं ............ भवति। (कमलम् इव फुल्लम्)

(ii) ............ येन गतः स पन्थाः। (महान् चासौ जनश्च)

www.thearyasamaj.org



(iii) ............................ मालां रचयति मालाकारः। (पुष्पाणां चयः तैः

(iv) वनदेव्याः अङ्गानि ............................ आसन्। (पल्लवानि इव पेशलानि)

9. **अधोनिर्दिष्टशब्दानां प्रातिपदिक-लिङ्ग-विभक्ति-वचनानि लिखत–**

| | | | प्रातिपदिकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| (i) | महतोः | – | ............ | ............ | ............ | ............ |
| (ii) | आपदाम् | – | ............ | ............ | ............ | ............ |
| (iii) | चेतसाम् | – | ............ | ............ | ............ | ............ |
| (iv) | धावत्सु | – | ............ | ............ | ............ | ............ |
| (v) | गच्छतः | – | ............ | ............ | ............ | ............ |

10. **उपर्युक्तान् शब्दान् उपयुक्तस्थले पूरयत–**

(i) श्रीरामचन्द्रः ............................ अपहन्ता अस्ति।

(ii) ............................ स्खलनं क्वापि भवत्येव प्रमादतः।

(iii) ............................ जनयोः इमे कार्ये स्तः।

(iv) वैराग्येण ............................ विकाराः नश्यन्ति।

11. **"चेतस्" शब्दस्य रूपाणि सर्वासु विभक्तिषु लिखत–**

| | | | | |
|---|---|---|---|---|
| प्र. | – | ............ | ............ | ............ |
| द्विती. | – | ............ | ............ | ............ |
| तृ. | – | ............ | ............ | ............ |
| चतु. | – | ............ | ............ | ............ |
| पं. | – | ............ | ............ | ............ |
| षष्ठी | – | ............ | ............ | ............ |
| सप्त. | – | ............ | ............ | ............ |
| सम्बो. प्र. | – | ............ | ............ | ............ |

www.thearyasamaj.org



12. पर्यायशब्दान् लिखत–

| | | | |
|---|---|---|---|
| (i) चित्तम् – | .................... | (ii) विपत् – | .................... |
| (iii) कर्कशः – | .................... | (iv) शैलः – | .................... |

◆◆◆

www.thearyasamaj.org



**श्लोकः**

प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः।
अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ 55 ॥

**पदच्छेदः**

प्रदानम् प्रच्छन्नम् गृहम् उपगते सम्भ्रम-विधिः
प्रियम् कृत्वा मौनम् सदसि कथनम् च अपि उपकृतेः।
अनुत्सेकः लक्ष्म्यां निरभिभवसाराः पर-कथाः
सताम् केन उद्दिष्टम् विषमम् असि-धाराव्रतम् इदम् ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| प्रदानम् | अ. नपुं. प्र. एक. कृदन्तम् | लक्ष्याम् | लक्ष्मी ई. स्त्री. सप्त. एक. |
| प्रच्छन्नम् | अ. नपुं. प्र. एक. वि. | निरभिभवसाराः | आ. स्त्री. प्र. बहु. वि. समस्तम् |
| गृहम् | अ. नपुं. द्विती. एक. | | |
| उपगते | अ. नपुं./पुं. सप्त. एक. | परकथाः | आ. स्त्री. प्र. बहु. विशेष्यम्, समस्तम् |
| सम्भ्रमविधिः | इ. पुं. प्र. एक. समस्तम् | | |
| प्रियम् | अ. पुं. द्विती. एक. | सताम् | सत्- त. पुं. षष्ठी बहु. |
| कृत्वा | कृदन्तम् अव्ययम् | केन | किम्- म. पुं. तृ. एक. सर्व. |
| मौनम् | अ. नपुं. प्र. एक. | उद्दिष्टम् | अ. पुं. प्र. एक. कृदन्तक्रियापदम् |
| सदसि | सदस्- स. नपुं. सप्त. एक. | | |
| कथनम् | अ. नपुं. प्र. एक. | विषमम् | अ. नपुं. प्र. एक. वि. |
| च, अपि | अव्ययपदे | असिधाराव्रतम् | अ. नपुं. प्र. एक. विशेष्यम् |
| उपकृतेः | उपकृति- इ. स्त्री. षष्ठी एक. | इदम् | इदम्- म. नपुं. प्र. एक. सर्व. |
| अनुत्सेकः | अ. पुं. प्र. एक. समस्तम् | | |

www.thearyasamaj.org



## आकाङ्क्षा

**उद्दिष्टम् ।**

| | |
|---|---|
| किम् उद्दिष्टम् ? | असिधाराव्रतम् उद्दिष्टम् । |
| किम् इदम् असिधाराव्रतम् उद्दिष्टम् ? | प्रच्छन्नं प्रदानं, गृहम् उपगते (सति) सम्भ्रमविधिः, प्रियं कृत्वा मौनं, सदसि च उपकृतेः कथनम्, लक्ष्म्यां (सत्याम्) अपि अनुत्सेकः, परकथाः निरभिभवसाराः (इति) इदम् (सर्वम्) असिधाराव्रतम् उद्दिष्टम् । |
| कीदृशम् इदम् असिधाराव्रतम् उद्दिष्टम् ? | विषमम् इदम् असिधाराव्रतम् उद्दिष्टम् । |
| केषां (कृते) इदं विषमम् असिधाराव्रतम् उद्दिष्टम् ? | सतां (कृते) विषमम् इदम् असिधाराव्रतम् उद्दिष्टम् । |
| सतां (कृते) इदं विषमम् असिधाराव्रतं केन उद्दिष्टम् ? | (न केनापि । किञ्च एतादृशव्रतपालनं सतां स्वभाव एव) |

## अन्वयः

प्रच्छन्नं प्रदानं, गृहम् उपगते (सति) सम्भ्रमविधिः, प्रियं कृत्वा मौनं, सदसि च उपकृतेः कथनम्, लक्ष्म्यां (सत्याम्) अपि अनुत्सेकः, परकथाः निरभिभवसाराः, इदं (सर्वं) विषमम् असिधाराव्रतं सतां (कृते) केन उद्दिष्टम् (न केनापि) ।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| प्रच्छन्नम् | गुप्तम् | गुप्त | hidden/without advertisement |
| प्रदानम् | दानम् | दान करना | to donate |
| गृहम् | भवनम्/वासस्थलम् | घर पर | at home |
| उपगते | प्राप्ते | किसी के आने पर | on coming |
| सम्भ्रमविधिः | प्रत्युत्थानादिना सत्कारः | उठकर अभिवादनादि द्वारा सत्कार | hospitality/ welcome |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| प्रियम् | हितम् | दूसरे का हित/प्रिय | good for others |
| कृत्वा | विधाय | करके | having done |
| मौनम् | तूष्णींभावः | चुप रहना | to keep silence |
| सदसि च | सभायाञ्च | और सभा में | and in assembly |
| उपकृतेः | परकृतस्य उपकारस्य | दूसरे द्वारा किये गए उपकार का | of good done by others |
| कथनम् | ख्यापनम् | कहना | proclamation |
| अपि लक्ष्म्याम् | धनादिविषये | और धनसम्पत्ति के विषय में | and in matter of wealth |
| अनुत्सेकः | गर्वाभावः | गर्व न करना | prideless |
| परकथाः | अन्यसम्बन्धिचर्चाः | अन्य से सम्बन्धित चर्चाएँ | conversation regarding others |
| निरभिभवसाराः | निन्दारहिताः स्युः | निन्दा रहित हो | devoid of speaking ill |
| इदम् (सर्वम्) | एतत् (सर्वम्) | यह (सब) | this (all) |
| विषमम् | कठिनम् | कठिन | difficult |
| असिधाराव्रतम् (अस्ति, तत्) | खड्गधारोपरि चलनम् इव आचरणम् विद्यते, तत् व्रतम् | तलवार की धार पर चलने के समान जो आचरण | pledge like walking on edge of sword |
| सताम् | सज्जनानाम् | सज्जनों को | to virtuous persons |
| केन | केन जनेन | किसके द्वारा | who |
| उद्दिष्टम् | उपदिष्टम् | उपदेश दिया गया | taught |

**भावार्थः**

**संस्कृतम्–** दानं गुप्तं स्यात्, गृहं प्राप्ते अतिथौ उत्थानाभिवादनादिभिः सत्करणम्, अन्यस्य उपकारं कृत्वा तत्र मौनाश्रयणं, परकृतस्य उपकारस्य सभायां ख्यापनं, धनविषये अगर्विता, परकथाविषये निन्दावचनं न प्रयोक्तव्यमिति सर्वं कठिनम् आचरणं सज्जनेभ्यः न केनापि उपदिष्टम्। तेषामेतत् सर्वं स्वतः सिद्धमाचरणमस्ति। सज्जनानाम् एतानि असाधारणानि आचरणानि सन्ति।

www.thearyasamaj.org



**हिन्दी–** गुप्त रूप से दान करना, घर आये अतिथि का उठकर अभिवादन आदि द्वारा सत्कार करना, दूसरे का उपकार करके न बोलना, अन्य द्वारा किये गये उपकार को सभा में कहना, धनसम्पत्ति के विषय में गर्व न करना, दूसरे की कथा (चर्चा) में निन्दा न करना, ये सब अत्यन्त कठिन असिधारा पर चलने के समान आचरण योग्य व्रत हैं। इन्हें सज्जनों को किसी ने नहीं बताया, उनमें ये स्वतः सिद्ध हैं।

**आङ्ग्लम्–** Charity without advertisement, hospitality to guest, silence after doing good for others, publicly proclamation of good done by others, pridelessness during prosperity, no insulting conversation regarding others in their absence - all these are difficult like walking on the edge of sword and no one taught this to virtuous persons. These are self-evident in them.

## निर्दशनम्

### (i) व्याकरणम्

**(क) सन्धिः**

| | | |
|---|---|---|
| चाप्युपकृतेः | – | च + अपि (स.दी.सन्धिः) |
| | | चापि + उपकृतेः (यण्-सन्धिः) |
| केनोद्दिष्टम् | | केन + उद्दिष्टम् (गुण-सन्धिः) |
| प्रदानं प्रच्छन्नं गृहम् | – | प्रदानम् + प्रच्छन्नम् + गृहम् (अनुस्वार-सन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| सम्भ्रमविधिः | – | सम्भ्रमस्य विधिः (षष्ठी तत्पु.) |
| अनुत्सेकः | – | न उत्सेकः (नञ्-समासः) नञ् समासे न इत्यस्य लोपो भवति। यदि अजादिरग्रिमशब्दो भवति तदा नकारः (नुट्) आयाति। यथा– न आदिः - अनादिः। न अन्तम् - अनन्तम्। |
| निरभिभवसाराः | – | निर्गतः अभिभवः यस्मात् सः निरभिभवः निरभिभवः सारः यासु ताः (बहुव्रीहिः) यथा– निरभिमानजना (सभा) निर्गतम् अभिमानं येभ्यः, ते निरभिमानाः, निरभिमानाः जनाः यस्यां सा। |

www.thearyasamaj.org



| | | |
|---|---|---|
| गृहम् उपगते | – | न लोकाव्ययेति गृहशब्दात् द्वितीयैव। |

(ग) **कृदन्तः**

| | | |
|---|---|---|
| कृत्वा | – | कृ + क्त्वा प्रत्ययः, यथा– हृत्वा, धृत्वा। |
| प्रदानम् | – | प्र + दा + ल्युट् (अन) कृत् प्रत्ययः। |
| प्रच्छन्नम् | – | प्र + छद् + क्त - प्रछन्नः, तुगागमः प्रशब्दस्यान्ते। तस्य श्चुत्वम्। यथा– वि ✓ छिद् + क्त - विच्छिन्नम्। |
| उपकृतिः | – | उप + कृ + क्तिन् (षष्ठ्यैकवचने उपकृतेः इति) |

(ii) **पर्यायशब्दाः**

| | | |
|---|---|---|
| प्रच्छन्नम् | – | गुप्तम्, गुह्यम्, निगूढम्, गोप्यम् |
| सम्भ्रमः | – | सत्कारः, पूजा, स्वागतम् |
| अभिभवः | – | निरादरः, निन्दा, तिरस्क्रिया, तिरस्कारः |

(iii) **छन्दः** – शिखरिणी

(iv) **विशेषः** – उत्तमजनगुणाः आचरणानि च अत्र वर्ण्यन्ते।

---

## अभ्यासः – 5
## श्लोकः – 55

1. **पदच्छेदं पूरयत–**

प्रदानं .................... गृहम्.................... ....................विधिः

.................... .................... मौनं सदसि कथनं .................... .................... उपकृतेः।

अनुत्सेकः .................... निरभिभवसाराः ....................

सतां .................... उद्दिष्टम् .................... असिधाराव्रतम् इदम्॥

www.thearyasamaj.org



2. **सन्धिं विसन्धिं वा कुरुत–**

(i) प्रदानं प्रच्छन्नं गृहं – ..........

(ii) चाप्युपकृतेः – ..........

(iii) निः + अभिभवसाराः – ..........

(iv) केन + उद्दिष्टम् – ..........

3. **अकारान्तनपुंसकशब्दानां प्रथमान्तरूपाणि एकत्र लिखत–**

..........

..........

4. **आकारान्तशब्दान् चित्वा एकत्र लिखत–**

..........

5. **पदानां लिङ्गविभक्तिवचनादिनिर्देशं कुरुत–**

| पदानि | | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (i) गृहम् | – | .......... | .......... | .......... |
| (ii) उपगते | – | .......... | .......... | .......... |
| (iii) प्रियम् | – | .......... | .......... | .......... |
| (iv) उपकृतेः | – | .......... | .......... | .......... |
| (v) लक्ष्म्या | – | .......... | .......... | .......... |
| (vi) प्रच्छन्नम् | – | .......... | .......... | .......... |

6. **प्रश्नानाम् उत्तरं लिखत–**

(i) दानं कीदृशं भवेत् ? ..........

(ii) गृहमागते जने कथं व्यवहरणीयम् ? ..........

www.thearyasamaj.org



(iii) प्रियं कृत्वा किं कर्तव्यम् ? ..........

(iv) कुत्र गर्वो न कर्तव्यः ? ..........

(v) विषमं व्रतं कीदृशमस्ति ? ..........

7. **यथोचितं योजयत–**

| | | | |
|---|---|---|---|
| (i) | प्रच्छन्नम् | (क) | व्रतम् |
| (ii) | उपकृतेः | (ख) | लक्ष्म्याम् |
| (iii) | अनुत्सेकः | (ग) | सदसि कथनम् |
| (iv) | परकथाः | (घ) | दानं भवेत् |
| (v) | इदम् | (ङ) | निन्दारहिताः भवेयुः |

8. **प्रश्नानामुत्तराणि लिखत–**

(i) **अस्मिन् श्लोके सज्जनानां कति गुणाः वर्णिताः ?**

..........

(ii) **परकथायां कीदृशम् आचरणीयम् ?**

..........

(iii) **कस्योपकारः सदसि कथनीयः ?**

..........

(iv) **कुत्र अनुत्सेको विधेयः ?**

..........

9. **समुचितविभक्त्या कोष्ठकस्थशब्दैः रिक्तस्थानानि पूरयत–**

(i) रामः सहसा .......... आगतः। (ग्राम)

(ii) दुर्जनः .......... प्राप्तोऽस्ति। (दुर्बुद्धि)

(iii) राजानः .......... हतवन्तः। (शत्रु)

(iv) छात्राः गुरोः .......... अर्जितवन्तः। (ज्ञान)

www.thearyasamaj.org



10. यथोदाहरणं रूपाणि लिखत–

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| यथा– | भिद् | + | क्तः | | | – | भिन्नः |
| (i) | नुद् | + | क्तः | | | – | ........................ |
| (ii) | उत् | + | छिद् | + | क्तः | – | ........................ |
| (iii) | वि | + | भिद् | + | क्तः | – | ........................ |
| (iv) | वि | + | पद् | + | क्तः | – | ........................ |
| (v) | सम् | + | पद् | + | क्तः | – | ........................ |

11. कोष्ठकस्थशब्दानां नञ्-समासरूपेण रिक्तस्थानानि पूरयत–

(i) देवस्य ........................ माहात्म्यम् अस्ति। (न अन्तम्)

(ii) तस्य जनस्य ........................ पुत्राः सन्ति। (न एकः)

(iii) यस्य कीर्तिस्तस्य ........................ भवति। (न निधनम्)

(iv) बालक! ........................ निवर्तस्व। (न कार्यम्, तस्मात्)

12. सन्धिं कृत्वा वाक्यं पुनः लिखत–

यथा– (i) त्वम् मम प्रियम् मित्रम् असि। – त्वं मम प्रियं मित्रम् असि।

(ii) त्वया अपि अत्र कार्यम् करणीयम्। – ........................

(iii) देवः प्रसन्नः भूत्वा अद्य आगतः। – ........................

(iv) इति उक्त्वा एवम् दत्वा अद्य गच्छतु। – ........................

(v) सः पन्थाः उत्तमः न अस्ति। – ........................

13. विग्रहवाक्यं लिखत–

(i) अनुत्सेकः – ........................

(ii) असिधाराव्रतम् – ........................

(iii) सम्भ्रमविधिः – ........................

(iv) निर्ग्रामः – ........................

(v) निरभिमानः – ........................

www.thearyasamaj.org



**14. क्त्वा-प्रत्ययं संयोज्य वाक्यं पूरयत–**

(i) अहं कार्यं .................................... आगतः । (कृ + क्त्वा)

(ii) बालकाः पाठं .................................... गताः । (पठ् + क्त्वा)

(iii) ते चलचित्रं .................................... गमिष्यन्ति । (दृश् + क्त्वा)

(iv) रामः माम् .................................... एवमकरोत् । (वच् + क्त्वा)

(v) नृपः ब्राह्मणाय गाम् .................................... अवचोत् । (दा + क्त्वा)

◆◆◆

www.thearyasamaj.org

# द्वितीयः पाठः – सत्सङ्गः/सताम् आचरणम्

श्लोकः

सन्तप्तायसि संस्थितस्य पयसो नामापि न श्रूयते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमजुषामेवंविधा वृत्तयः ॥ 56 ॥

पदच्छेदः

सन्तप्त-अयसि संस्थितस्य पयसः नाम अपि न श्रूयते
मुक्ताऽकारतया तद् एव नलिनी-पत्र-स्थितम् राजते ।
स्वात्याम् सागर-शुक्ति-मध्य-पतितम् तत् मौक्तिकम् जायते
प्रायेण अधम-मध्यम-उत्तमजुषाम् एवंविधाः वृत्तयः ॥

पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| सन्तप्तायसि | सन्तप्तायस्- स. नपुं. सप्त. एक. समस्तम् | राजते | राज्- लट् प्रपु. एक. क्रियापदम् |
| संस्थितस्य | अ. पुं. षष्ठी एक. वि. कृदन्तम् | स्वात्यम् | ई. स्त्री. सप्त. एक. |
| | | सागरशुक्तिमध्य-पतितम् | अ. नपुं. प्र. एक. वि., समस्तम् |
| पयसः | पयस्- स. नपुं. षष्ठी एक. विशेष्यम् | तत् | तद्- द. नपुं. प्र. एक. सर्व., वि. |
| नाम | नामन्- न. नपुं. प्र. एक. | | |
| अपि, न | अव्ययपदे | मौक्तिकम् | अ. नपुं. प्र. एक. |
| श्रूयते | श्रु- कर्मणि लट् प्रपु. एक. क्रियापदम् | जायते | जन्- लट् प्रपु. एक. |
| | | प्रायेण | प्राय- अ. पुं. तृ. एक. |
| मुक्ताकारतया | आं. स्त्री. तृ. एक. | अधममध्यमोत्तम-जुषाम् | स्त्री. षष्ठी बहु. समस्तम् वि. |
| तत् | तद्- द. नपुं. प्र. एक. सर्व. | | |
| एव | अव्ययम् | एवंविधाः | एवंविधा- आ. स्त्री. प्र. बहु. वि. |

www.thearyasamaj.org



| | |
|---|---|
| नलिनीपत्रस्थितम् अ. नपुं. प्र. एक. वि. समस्तम् | वृत्तयः वृत्ति- इ. स्त्री. प्र. बहु. विशेष्यम् |

## आकाङ्क्षा

**न श्रूयते ।**

| | |
|---|---|
| किम् अपि न श्रूयते ? | नाम अपि न श्रूयते । |
| कस्य नाम अपि न श्रूयते ? | सन्तप्तायसि संस्थितस्य पयसः नाम अपि न श्रूयते । |

**राजते ।**

| | |
|---|---|
| किं राजते ? | तत् एव (पयः) राजते । |
| कुत्र स्थितं (कीदृशं) तत् राजते ? | नलिनी पत्रस्थितं राजते । |
| केन प्रकारेण तत् राजते ? | मुक्ताकारतया राजते । |

**जायते ।**

| | |
|---|---|
| तत् (पयः) किं जायते ? | तत् (पयः) मौक्तिकं जायते । |
| कुत्र पतितं तत् मौक्तिकं जायते ? | सागरशुक्तिमध्यपतितं तत् मौक्तिकं जायते । |
| कदा सागरशुक्तिमध्यपतितं तत् मौक्तिकं जायते ? | स्वात्यां सागरशुक्तिमध्यपतितं तत् मौक्तिकं जायते । |

**भवन्ति ।**

| | |
|---|---|
| काः भवन्ति ? | वृत्तयः भवन्ति । |
| केषां वृत्तयः भवन्ति ? | अधम-मध्यम-उत्तमजुषां वृत्तयः भवन्ति । |
| प्रायेण अधम-मध्यम-उत्तमजुषां किंविधाः वृत्तयः भवन्ति ? | प्रायेण अधम-मध्यम-उत्तमजुषाम् वृत्तयः एवंविधाः [सन्तप्त-अयसि संस्थितस्य पयसः नाम अपि न श्रूयते, मुक्ता-कारतया तदेव-नलिनीपत्रस्थितं राजते । स्वात्यां सागर-शुक्ति-मध्य-पतितं तत् मौक्तिकं जायते- इत्येवं विधाः अर्थात् स्वगुणानुरूपं स्वसंसर्गे आगतानां परिवर्तनक्षमाः] भवन्ति । |

www.thearyasamaj.org



## अन्वयः

सन्तप्तायसि संस्थितस्य पयसः नाम अपि न श्रूयते, तत् एव (पयः) नलिनीपत्रस्थितं (सत्) मुक्ताकारतया राजते। स्वात्यां तत् सागरशुक्तिमध्यपतितं मौक्तिकं जायते, प्रायेण अधममध्यमोत्तमजुषाम् एवं विधाः वृत्तयः (भवन्ति)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| सन्तप्तायसि | तप्तलौहे | गरम लोहे पर | on hot iron |
| संस्थितस्य | स्थापितस्य | डाले गए/रखे गए | placed |
| पयसः | जलस्य | जल का | of water |
| नाम अपि | नाम चापि | नाम भी | even name |
| न श्रूयते | न आकर्ण्यते | सुनाई नहीं पड़ता | is not heard |
| तत् एव | तत् एव (पयः) | वही (जल) | same (water) |
| नलिनीपत्रस्थितं | पद्मपत्रे | कमल के पत्ते पर | lying on lotus leaf |
| (सत्) | विद्यमानम् | पड़ा हुआ (होने पर) | existance |
| मुक्ताकारतया | मुक्ताकृतिरूपेण | मोतियों के आकार जैसा | like pearls |
| राजते | सुशोभते (दृश्यते वा) | सुशोभित होता है | shines |
| स्वात्याम् | स्वातिनामके नक्षत्रे | स्वाति नामक नक्षत्र में | in *Swāti nakśatra* |
| तत् | तत् (जलम्) | वह (जल) | that (water) |
| सागरशुक्तिमध्य-पतितम् | समुद्रशुक्त्यन्तःपतितम् | सागर की सीपी के मध्य गिरने पर | falling in the oyster-shell of sea |
| मौक्तिकम् | मुक्ता | मोती | pearl |
| जायते | भवति | हो जाता है | becomes |
| प्रायेण | प्रायशः | प्रायः | generally |
| अधम-मध्यमोत्तमजुषाम् | निम्नमध्यमश्रेष्ठ-जनसेविनाम् | अधम, मध्यम एवं उत्तम लोगों के साथ रहने वालों का | of people who associate themselves with mean, mediocre & excellent persons |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| एवंविधाः | जलसदृशाः | जल के समान | like water |
| वृत्तयः | व्यापाराः | प्रवृत्तियाँ | trends |
| (भवन्ति) | (जायन्ते) | (हो जाती हैं) | becomes |

## भावार्थः

**संस्कृतम्–** तप्ते लौहपिण्डे पतितं जलं नाममात्रेणापि न दृष्टं भवति किन्तु तदेव जलं कमलपत्रे स्थितं यदि भवति तदा मुक्तासदृशं राजते, स्वातिनक्षत्रे च तदेव जलं यदि सागरस्य शुक्तिमध्ये पतति तदा तत् मौक्तिकं भवति। प्रायशः अधम-मध्यम-उत्तमजन-संसर्गिणां प्रवृत्तयः पयोवत् भवन्ति। अर्थात् अधमसंसर्गेण जनाः तप्ते अयसि पतितं जलमिव पूर्णतः नश्यन्ति, मध्यमजनसंसर्गेण जनाः पद्मपत्रे स्थितं जलमिव शोभमानाः भवन्ति, उत्तमजनसंसर्गेण च जनाः स्वातिनक्षत्रे शुक्तौ पतितं जलमिव मौक्तिकरूपेण गुणसम्पन्नाः आकर्षकाः च भवन्ति।

**हिन्दी–** गरम लोहे पर डाले गये जल का नामोनिशान नहीं होता है, किन्तु वही जल कमल पत्र पर स्थित हुआ मोतियों जैसा सुशोभित होता है या दिखाई पड़ता है। स्वाति नक्षत्र में वही जल सागर की सीपियों के मध्य गिरने पर मोती बन जाता है। प्रायः अधम, मध्यम एवं उत्तम जनों के साथ रहने वालों की यही दशा होती है। आशय यह है कि अधम, मध्यम एवं उत्तम बनने में प्रायः संसर्ग महत्त्वपूर्ण होता है। हमें श्रेष्ठ दशा प्राप्त करने हेतु श्रेष्ठ लोगों के सम्पर्क में रहना चाहिये।

**आङ्ग्लम्–** Not even the sign of water is traced when it falls on some hot iron, while lying on a lotus leaf the same water shines like the pearl and when it falls in mouth of an oyster-sheel of sea during *Swātī nakśatra* it becomes a pearl. Generally the low, medium & high degrees come with association of persons having these merits. These lines show that we should associate ourselves with pious & great persons.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

| | | |
|---|---|---|
| सन्तप्तायसि | – | सन्तप्त + अयसि (स.दी.सन्धिः) |
| नामापि | – | नाम + अपि (स.दी.सन्धिः) |
| मुक्ताकारतया | – | मुक्त + आकारतया (स.दी.सन्धिः) |
| प्रायेणाधम | – | प्रायेण + अधम (स.दी.सन्धिः) |
| तदेव | – | तत् + एव (जश्त्व-सन्धिः) |

www.thearyasamaj.org



| | | |
|---|---|---|
| तन्मौक्तिकम् | – | तद् + मौक्तिकम् (परसवर्ण-सन्धिः) |
| एवंविधा वृत्तयः | – | एवंविधाः + वृत्तयः (विसर्ग-सन्धिः) |
| पयसो नामापि | – | पयसः + नामापि (विसर्ग-सन्धिः) |

(ख) **समासः**

| | | |
|---|---|---|
| सन्तप्तायसि | – | सन्तप्तं च तत् अयश्च सन्तप्तायः, (कर्मधारयः) तस्मिन् |
| मुक्ताकारतया | – | मुक्तायाः आकारः मुक्ताकारः (षष्ठी तत्पु.) तस्य भावः इत्यर्थे तल् + टाप्, तृ. एक. |
| सागरशुक्तिमध्यपतितम् | – | सागरे शुक्तिः सागरशुक्तिः (सप्त. तत्पु.) सागरशुक्त्याः मध्यः सागरशुक्तिमध्यः, तत्र पतितम्। (सर्वत्र तत्पु. समासः) |
| अधममध्यमोत्तमजुषाम् | – | अधमाश्च मध्यमाश्च उत्तमाश्च इति अधमम-ध्यमोत्तमाः (द्वन्द्वसमासः) जुषते इति जुट् ते, जुषः - जुष् + क्विप्। अधममध्यमोत्तमानां जुषः, तेषाम् इति। (षष्ठी तत्पु.) |

(ii) **पर्यायः**

| | | |
|---|---|---|
| सन्तप्तम् | – | अत्युष्णम्, तप्तम्, ज्वलितम् |
| पयः | – | जलम्, कीलालम्, अमृतम् |
| मुक्ता | – | मौक्तिकम्, विद्रुमः, प्रवालः |
| नलिनी | – | बिसिनी, पद्मिनी, कमलिनी |
| सागरः | – | समुद्रः, पारावारः, उदधिः, जलधिः |

(iii) **छन्दः** – शार्दूलविक्रीडितं छन्दः

www.thearyasamaj.org



## अभ्यासः – 6
### श्लोकः – 56

1. यथोचितं सन्धिं विसन्धिं वा कुरुत–

(i) सन्तप्तायसि – ..........

(ii) नामापि – ..........

(iii) मुक्ता आकारतया – ..........

(iv) प्रायेण अधममध्यम उत्तमजुषाम् – ..........

2. विशेषण-पदानि लिखत–

.......... .......... .......... ..........

.......... .......... .......... ..........

3. विशेष्यपदानि लिखत–

.......... .......... ..........

4. क्रियापदानि लिखत–

.......... .......... ..........

5. समस्तपदानि लिखत–

.......... .......... .......... ..........

6. षष्ठ्यन्त-सप्तम्यन्तपदानि पृथक्-पृथक् लिखत–

| षष्ठ्यन्तम् | सप्तम्यन्तम् |
|---|---|
| .......... | .......... |
| .......... | .......... |
| .......... | .......... |

www.thearyasamaj.org



7. प्रश्नानामुत्तराणि लिखत–

(i) कुत्र संस्थितस्य पयसः नाम अपि न श्रूयते ?

..............................

(ii) कुत्र स्थितं जलं राजते ?

..............................

(iii) कुत्र पतितं जलं मौक्तिकं जायते ?

..............................

(iv) जलसदृशवृत्तयः केषां भवन्ति ?

..............................

8. श्रूयते, राजते, जायते इत्येषां क्रियापदानां वाक्येषु प्रयोगं कुरुत–

(i) दुर्जनसंसर्गस्थितस्य जनस्य अभिधानमपि न .................. ।

(ii) हिमालये सूर्यरश्मिना हिमः रजतम् इव .................. ।

(iii) शुक्तिमध्यपतितं जलं मौक्तिकम् .................. ।

9. "पयस्" शब्दस्य रूपाणि भवान् जानाति, तद्वत् "अयस्" शब्दस्य रूपाणि यथानिर्देशं लिखत–

प्र. .................. .................. ..................

तृ. .................. .................. ..................

षष्ठी .................. .................. ..................

सप्त. .................. .................. ..................

10. सन्धिं कुरुत–

(i) नाम + अपि – ..................

www.thearyasamaj.org



(ii) मुक्ता + आकारः – ..............................

(iii) तद् + मा ब्रूहि – ..............................

(iv) एतत् + एव – ..............................

(v) बालकाः + गच्छन्ति – ..............................

**11. समस्तं पदं लिखत–**

(i) सुवर्णस्य आकारः, तस्य भावः – ..............................

(ii) कमलस्य पत्रे स्थितम् – ..............................

(iii) तटाकस्य मध्ये पतितम् – ..............................

(iv) नीचश्च श्रेष्ठश्च – ..............................

**12. अधोलिखित-शब्दानां साहाय्येन वाक्यं रचयत–**

संस्थितस्य, राजते, बलाका, बिसीनीपत्रे, तप्तायसि, जलस्य, न श्रूयते, अन्तः सागरशुक्तिमध्यपतितं, जायते, नामापि, जलम्, मौक्तिकम्

..............................

..............................

..............................

**13. उत्तराणि लिखत–**

(i) **जलसदृश्यः वृत्तयः केषां भवन्ति ?**

..............................

(ii) **मुक्ताकारतया किं परिवर्तते ?**

..............................

(iii) **जलं सागरशुक्तिमध्यपतितं कदा मौक्तिकं जायते ?**

..............................

(iv) **अस्मिन् पद्ये कस्य महत्त्वं वर्णितवान् कविः ?**

..............................

www.thearyasamaj.org



**14. "राजते" इत्यात्मनेपदि लटि रूपम् ध्यायत–**

| | | | |
|---|---|---|---|
| प्रपु. | राजते | राजेते | राजन्ते |
| मपु. | राजसे | राजेथे | राजध्वे |
| उपु. | राजे | राजावहे | राजामहे |

**एवमेव जन् धातोः जायते इति रूपं भवति। उपरिवत् तस्य रूपाणि लिखत।**

| | | |
|---|---|---|
| ................ | ................ | ................ |
| ................ | ................ | ................ |
| ................ | ................ | ................ |

**15. विग्रहं प्रदर्श्य समासनाम लिखत–**

(i) समासनाम – ................................

(ii) सुवर्णाकृतिसुन्दरः – ................................

(iii) वटवृक्षस्थितशुकः – ................................

(iv) आगममध्यपतितः – ................................

**16. कोष्ठकस्थैः उपयुक्तक्रियापदैः वाक्यानि पूरयत–**

**दृश्यन्ते, भवन्ति, श्रूयते, राजते, जायते**

(i) लोभात् मोहः – ................................

(ii) एवंविधा वृत्तयो – ................................

(iii) हिमालये शिवः – ................................

(iv) अत्र कस्यापि नाम न – ................................

(v) अस्माभिः चित्राणि न – ................................

www.thearyasamaj.org



**17. प्रदत्तपदानां लिङ्गविभक्तिवचननिर्देशं कुरुत–**

| | | | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| (i) | संस्थितस्य | – | ............ | ............ | ............ |
| (ii) | सन्तप्तायसि | – | ............ | ............ | ............ |
| (iii) | मुक्ताकारतया | – | ............ | ............ | ............ |
| (iv) | वृत्तयः | – | ............ | ............ | ............ |
| (v) | मौक्तिकम् | – | ............ | ............ | ............ |
| (vi) | पयसः | – | ............ | ............ | ............ |

**18. समस्तं पदं लिखत–**

(i) रजतस्य आकारः, तस्य भावः तया– ............................

(ii) आम्रस्य वृक्षे स्थितम् – ............................

(iii) देवस्य आलये वर्तमानः – ............................

(iv) कमलस्य पत्राणां सुगन्धिः – ............................

(v) गच्छन्तश्च ते पुरुषाः, तेषाम् – ............................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

यः प्रीणयेत्सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत् कलत्रम्।
तन्मित्रमापदि सुखे च समक्रियं यद्-
एतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ 57 ॥

**पदच्छेदः**

यः प्रीणयेत् सुचरितैः पितरं सः पुत्रः
यत् भर्तुः एव हितम् इच्छति तत् कलत्रम्।
तत् मित्रम् आपदि सुखे च समक्रियम् यद् -
एतत् त्रयम् जगति पुण्यकृतः लभन्ते ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| यः | यत्- द. पुं. प्र. एक. सर्व. | तत् | तद्- द. नपुं. प्र. एक. सर्व., वि. |
| प्रीणयेत् | प्रीण्- वि.लि., प्रपु. एक. तिङन्तक्रियापदम् | मित्रम् | अ. नपुं. प्र. एक. वि. |
| | | आपदि | आपद्- द. स्त्री. सप्त. एक. |
| सुचरितैः | सुचरित- अ. नपुं. तृ. एक. | सुखे | अ. नपुं. सप्त. एक. |
| पितरम् | पितृ- ऋ. पुं. द्विती. एक. | च | अव्ययम् |
| सः | तत्- द. पुं. प्र. एक. सर्व., वि. | समक्रियम् | अ. नपुं. प्र. एक. वि. समस्तम् |
| पुत्रः | अ. पुं. प्र. एक. | यद् | यद्- द. नपुं. प्र. एक. सर्व., वि. |
| यत् | यत्- द. नपुं. प्र. एक. सर्व. | एतत् | द. नपुं. द्विती. एक. सर्व. |
| भर्तुः | भर्तृ- ऋ. पुं. षष्ठी एक. | त्रयम् | अ. नपुं. द्विती. एक. तद्धितान्तपदम् |
| एव | अव्ययम् | | |
| हितम् | अ. नपुं. प्र. एक. | जगति | जगत्- त. नपुं. सप्त. एक. |
| इच्छति | इष्- लट्, प्रपु. एक. तिङन्तक्रियापदम् | पुण्यकृतः | पुण्यकृत्- त. पुं. प्र. बहु. |
| | | लभन्ते | लभ्- लट्, प्रपु. बहु. तिङन्तक्रियापदम् |
| तत् | तद्- द. नपुं. प्र. एक. सर्व., वि. | | |
| कलत्रम् | अ. नपुं. प्र. एक. विशेष्यम् | | |

www.thearyasamaj.org



## आकाङ्क्षा

**प्रीणयेत् ।**

| | |
|---|---|
| कं प्रीणयेत् ? | पितरं प्रीणयेत् । |
| कैः पितरं प्रीणयेत् ? | सुचरितैः पितरं प्रीणयेत् । |
| यः सुचरितैः पितरं प्रीणयेत् सः कः ? | यः सुचरितैः पितरं प्रीणयेत् सः (वस्तुतः) पुत्रः । |

**इच्छति ।**

| | |
|---|---|
| किम् इच्छति ? | हितम् एव इच्छति । |
| कस्य हितम् एव इच्छति ? | भर्तुः हितम् एव इच्छति । |
| यत् भर्तुः हितम् एव इच्छति तत् किम् ? | यत् भर्तुः हितम् एव इच्छति तत् (वस्तुतः) कलत्रम् । |

**समक्रियम् (भवति) ।**

| | |
|---|---|
| कदा कदा समक्रियम् (भवति) ? | आपदि सुखे च समक्रियम् (भवति) । |
| यत् आपदि सुखे च समक्रियं भवति तत् किम् ? | यत् आपदि सुखे च समक्रियं (भवति) तत् (वस्तुतः) मित्रम् । |

## अन्वयः

यः सुचरितैः पितरं प्रीणयेत् सः पुत्रः, यद् भर्तुरेव हितम् इच्छति तत् कलत्रम्, यद् आपदि सुखे च समक्रियं तत् मित्रम्, जगति एतत् त्रयं पुण्यकृतः लभन्ते ।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| यः | यः (जनः) | जो (व्यक्ति) | who |
| सुचरितैः | सुचरित्रैः | अच्छे चरितों से | by good conducts |
| पितरम् | जनकम् | पिता को | (his) father |
| प्रीणयेत् | प्रसादयेत् | प्रसन्न करें | please |
| सः | स एव | वही | he only |
| पुत्रः | (वस्तुतः) पुत्रः | (वस्तुतः) पुत्र है | is actually son |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| यद् | या स्त्री | जो स्त्री | that wife |
| भर्तुः एव | स्वामिनः एव | पति का ही | of (her) husband |
| हितम् | कल्याणम् | हित | only |
| इच्छति | वाञ्छति | चाहती है | desires |
| तत् | सा (एव) स्त्री | वह (ही) स्त्री | that wife (only) |
| कलत्रम् | पत्नी | पत्नी (कहलाने योग्य) है | is wife |
| यद् | यो जनः | जो व्यक्ति | that person |
| आपदि | सङ्कटे | आपत्ति काल में | in affliction |
| सुखे | सुखकाले | सुख के समय | in prosperity |
| समक्रियम् | समानव्यापारः | समान व्यवहार करता है | behaves alike |
| तत् | सः जनः | वह व्यक्ति | that person |
| मित्रम् | सुहृत् | मित्र होता है | is friend |
| जगति | संसारे | संसार में | in the world |
| एतत् | इदम् | इस | this |
| त्रयम् | पुत्रं, कलत्रं, मित्रं च | पुत्र, पत्नी एवं मित्र | son, wife & friend |
| पुण्यकृतः | पुण्यभाजो जनाः | पुण्य करने वाले लोग | pious people |
| लभन्ते | आप्नुवन्ति | प्राप्त करते हैं | gets |

**भावार्थः**

**संस्कृतम्–** यो जनः सुन्दराचरणैः जनकं प्रसादयति स एव पुत्रो भवति, या च स्त्री पत्युः एव हितं कामयते सा एव कलत्रम् इति भवति, यश्च आपत्तिकाले सुखकाले च समानरूपेण आचरति स एव मित्रम् अस्ति, पुण्यशालिनो जनाः एव एतादृशगुणयुक्तं पुत्रं कलत्रं मित्रञ्च लभन्ते।

**हिन्दी–** जो अपने अच्छे आचरणों से पिता को प्रसन्न करे, वस्तुतः वही पुत्र है। जो स्त्री पति का ही कल्याण चाहे, वस्तुतः वही कलत्र कहलाती है और जो व्यक्ति सुख और दुःख में समान व्यवहार करने वाला हो, वस्तुतः वही मित्र कहलाता है। (विरले) पुण्यशाली लोग ही इस प्रकार के पुत्र, कलत्र और मित्र को प्राप्त करते हैं।

www.thearyasamaj.org



**आङ्ग्लम्**– He is the son who pleases his father by his good behavious; she is the wife who always wishes good of her husband; he is the friend who behaves alike in affliction & prosperity. They are righteous persons who obtain all these three in this world.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

| | | |
|---|---|---|
| भर्तुरेव | – | भर्तुः + एव (विसर्ग-सन्धिः) |
| स पुत्रः | – | सः + पुत्रः (विसर्ग-सन्धिः) |
| पुण्यकृतो लभन्ते | – | पुण्यकृतः + लभन्ते (विसर्ग-सन्धिः) |

(ख) **समासः**

| | | |
|---|---|---|
| सुचरितैः | – | सु शोभनानि चरितानि (प्रादिसमासः, तत्पुरुषः) तैः |
| समक्रियम् | – | समाना क्रिया यस्य तत् (बहुव्रीहिः) यथा– रूपवती भार्या यस्य सः - रूपवद्भार्यः) |

(ग) **कृदन्तः**

| | | |
|---|---|---|
| पुण्यकृतः | – | पुण्यं करोति इत्यर्थे पुण्यपदात् कृ धातोः क्विप् तुगागमः - पुण्यकृत्, प्र. बहुवचने रूपम् यथा– सुकृत्-सुशोभनं करोति इति सुकृत् धर्मकृत् |
| त्रयम् | – | त्रयः अवयवाः यस्य इत्यर्थे त्रिशब्दात् तयप्, तयपः अयच् इत्यादेशः - त्रयम् प्र. एक. नपुं.। यथा– द्वयम्। |

www.thearyasamaj.org



(ii) **पर्यायशब्दाः**

| | | |
|---|---|---|
| सुचरितम् | – | सुव्यवहारः, सुचरित्रम् |
| पुत्रः | – | तनयः, आत्मजः, सूनुः |
| पुण्यकृत् | – | पुण्यात्मा, पुण्यशाली, पुण्यवान् |

(iii) **छन्दः** – वसन्ततिलका-छन्दः

**लक्षणम्** – उक्ता वसन्ततिलका तभजा जगौ गः

---

## अभ्यासः – 7
## श्लोकः – 57

1. **यथाश्लोकं रिक्तं स्थानं पूरयत–**

यः ................ सुचरितैः ............ ............ ............

................ हितमिच्छति ............ ............ ।

तन्मित्र............ ............ च ............ यद्

................ जगति ................ लभन्ते ॥

2. **सन्धिं विसन्धिं वा कुरुत–**

(i) स पुत्रः – ................

(ii) भर्तुरेव – ................

(iii) तत् मित्रम् आपदि – ................

(iv) हितम् + इच्छति – ................

3. **तिङन्तक्रियापदानि एकत्रीकृत्य लिखत–**

................ ................ ................

4. **द्वितीयान्तपदानि लिखत–**

................ ................ ................

www.thearyasamaj.org



5. सप्तम्यन्तपदानि एकत्रीकृत्य लिखत–

........................ ........................ ........................

6. उत्तराणि लिखत–

(i) कीदृशः पुत्रः पुत्र इत्युच्यते ?

........................................................................

(ii) कलत्रपदभाक् का भवति ?

........................................................................

(iii) सुखे दुःखे च समक्रियं किं भवति ?

........................................................................

(iv) पुण्यवन्तः किं लभन्ते ?

........................................................................

7. कोष्ठकात् यथोचितं पदं स्वीकृत्य वाक्यं पूरयत–

| |
|---|
| सुचरितैः, जगति, सः सुहृत्, कामयते, पुत्रो गुणशाली |

(i) सुखे आपदि च यो न जहाति ........................ ।

(ii) यद् पत्युरेव सुखं ........................ तत् कलत्रम् ।

(iii) पुण्यकृतः सर्वं ........................ लभन्ते ।

(iv) सः ........................ जनकं तर्पयेत् ।

(v) यः प्रीणयेत् सः ........................ ।

8. प्रीणयेत्, इच्छति, आचरति, लभन्ते - एतैः क्रियापदैः वाक्यानि पूरयत–

(i) अपत्यस्य कर्तव्यम् यदसौ पितरौ ........................ ।

(ii) सखा उत्सवे व्यसने च एकरूपेण ........................ ।

(iii) भार्या सैव भवति या भर्तुः हितम् ........................ ।

www.thearyasamaj.org



(iv) विद्यावन्तः विदेशे यशांसि .................... ।

**9. मूलशब्दं (प्रातिपदिकं) विभक्तिं वचनं च लिखत–**

| | | | |
|---|---|---|---|
| (i) पितरम् | .................... | .................... | .................... |
| (ii) भर्तुः | .................... | .................... | .................... |
| (iii) पुण्यकृतः | .................... | .................... | .................... |
| (iv) यः | .................... | .................... | .................... |

**10. पूर्वपाठे 'राजते' इत्यस्य रूपाणि अभ्यासे दत्तानि। तदनुसारम्- 'लभ्' धातोः लटि रूपाणि लिखत–**

| | | | |
|---|---|---|---|
| **प्रपु.** | .................... | .................... | .................... |
| **मपु.** | .................... | .................... | .................... |
| **उपु.** | .................... | .................... | .................... |

**11. प्रश्नानामुत्तराणि देयानि–**

(i) सुपुत्रस्य आचरणं कीदृशं भवेत् ? ....................

(ii) कलत्रं कस्य हितम् इच्छति ? ....................

(iii) आपदि सुखे च कः समानं तिष्ठति ? ....................

(iv) पुण्यवन्तो जनाः के भवन्ति ? ....................

**12. यथोचितविभक्तिं संयोज्य वाक्यं पूरयत–**

(i) तनयः .................... प्रीणयति। (पितृ)

(ii) सेवकः .................... हितं करोति। (भर्तृ)

(iii) मित्रं रात्रिन्दिवम् .................... भवति। (समक्रिय)

(iv) एतत् कार्यं कस्यापि .................... अस्ति। (पुण्यकृत्)

**13. प्रीण्-धातोः लटि रूपाणि लिखत–**

| | | | |
|---|---|---|---|
| **प्रपु.** | प्रीणयति | .................... | .................... |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| मपु. | ........................ | ........................ | ........................ |
| उपु. | ........................ | ........................ | ........................ |

प्रीणयेत् इति विधिलिङ्-रूपमस्ति। तस्य रूपाणि एवं भवन्ति–

| | | | |
|---|---|---|---|
| प्रपु. | प्रीणयेत् | प्रीणयेताम् | प्रीणयेयुः |
| मपु. | प्रीणयेः | प्रीणयेतम् | प्रीणयेत |
| उपु. | प्रीणयेयम् | प्रीणयेव | प्रीणयेम |

14. "प्रसादि" इति धातोः रूपाणि लिखत–

| | | | |
|---|---|---|---|
| प्रपु. | प्रसादयेत् | ........................ | ........................ |
| मपु. | ........................ | ........................ | ........................ |
| उपु. | ........................ | ........................ | ........................ |

15. रेखाङ्कितस्य स्थाने पर्यायशब्दं उपयुज्य वाक्यं लिखत–

(i) यः प्रीणयेत् स पुत्रः। – ........................

(ii) एतत्त्रयं पुण्यकृतो लभन्ते। – ........................

(iii) सुचरितैः रामो रामो जातः। – ........................

16. 'एतत्त्रयं जगति पुण्यकृतो लभन्ते' इत्यस्याशयं लिखत–

........................................................................................

........................................................................................

........................................................................................

........................................................................................

........................................................................................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान्गुणान् ख्यापयन्तः**
**स्वार्थान्सम्पादयन्तो विततपृथुतरारम्भयत्नाः परार्थे ।**
**क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान्दुर्जनान्दुःखयन्तः**
**सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्चनीयाः ॥ 58 ॥**

**पदच्छेदः**

नम्रत्वेन उन्नमन्तः पर-गुण-कथनैः स्वान् गुणान् ख्यापयन्तः
स्वार्थान् सम्पादयन्तः वितत-पृथुतर-आरम्भयत्नाः परार्थे ।
क्षान्त्या एव आक्षेपरूक्ष-अक्षर-मुखर-मुखान् दुर्जनान् दुःखयन्तः
सन्तः साश्चर्यचर्या जगति बहुमताः कस्य न अभ्यर्चनीयाः ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| नम्रत्वेन | अ. नपुं. तृ. एक. | एव | अव्ययम् |
| | त्वप्रत्ययान्तशब्दः भाववाचकः | आक्षेपरूक्षाक्षर- | अ. पुं. द्विती. बहु. वि. |
| उन्नमन्तः | उन्नमत्- त. पुं. प्र. बहु. | मुखरमुखान् | |
| | शत्रन्तं वि. | दुर्जनान् | अ. पुं. द्विती. बहु. |
| परगुणकथनैः | अ. नपुं. तृ. बहु. समस्तम् | | विशेष्यम् |
| स्वान् | अ. पुं. द्विती. बहु. वि. | दुःखयन्तः | त. पुं. प्र. बहु. शत्रन्तं |
| गुणान् | अ. पुं. द्विती. बहु. विशेष्यम् | | वि. |
| ख्यापयन्तः | ख्यापयत्- त. पुं. प्र. बहु. | सन्तः | त. पुं. प्र. बहु. विशेष्यम् |
| | शतृप्रत्ययान्तशब्दः | साश्चर्यचर्याः | अ. पुं. प्र. बहु. वि. |
| स्वार्थान् | अ. पुं. द्विती. बहु. वि. | | समस्तम् |
| सम्पादयन्तः | त. पुं. प्र. बहु. शत्रन्तपदं, | जगति | त. नपुं. सप्त. एक. |
| | वि. | बहुमताः | अ. पुं. प्र. बहु. वि. |
| विततपृथुतरारम्भ- | अ. पुं. प्र. बहु. समस्तम् वि. | कस्य | किम्- सर्व. पुं. षष्ठी एक. |
| यत्नाः | | न | अव्ययम् |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| परार्थे | अ. नपुं. सप्त. एक. समस्तम् | अभ्यर्चनीयाः | अ. पुं. प्र. बहु. कृदन्त-क्रियापदम् |
| क्षान्त्या | इ. स्त्री. तृ. एक. | | |

## आकाङ्क्षा

(भवन्ति ।)

| | |
|---|---|
| के (भवन्ति) ? | सन्तः भवन्ति । |
| सन्तः कीदृशाः भवन्ति ? | सन्तः कस्य न अभ्यर्चनीयाः न भवन्ति । (सर्वस्यैव अभ्यर्चनीयाः भवन्ति) |
| कीदृशाः सन्तः अभ्यर्चनीयाः भवन्ति ? | नम्रत्वेन उन्नमन्तः सन्तः अभ्यर्चनीयाः भवन्ति । |
| पुनश्च कीदृशाः (ते) सन्तः अभ्यर्चनीयाः भवन्ति ? | परगुणकथनैः स्वान् गुणान् ख्यापयन्तः सन्तः अभ्यर्चनीयाः भवन्ति । |
| पुनश्च कीदृशाः (ते) सन्तः अभ्यर्चनीयाः ? | परार्थे विततपृथुतरारम्भयत्नाः (सन्तः एव) स्वार्थान् सम्पादयन्तः, आक्षेप-रूक्ष-अक्षर-मुखर-मुखान् दुर्जनान् क्षान्त्या एव दुःखयन्तः, (अत एव) साश्चर्यचर्याः जगति बहुमताः सन्तः अभ्यर्चनीयाः । |

## अन्वयः

नम्रत्वेन उन्नमन्तः, परगुणकथनैः स्वान् गुणान् ख्यापयन्तः, परार्थे विततपृथुतरारम्भयत्नाः (सन्तः एव) स्वार्थान् सम्पादयन्तः, आक्षेपरूक्षाक्षरमुखरमुखान् दुर्जनान् क्षान्त्या एव दुःखयन्तः (अत एव) साश्चर्यचर्याः जगति बहुमताः सन्तः कस्य न अभ्यर्चनीयाः ? (सर्वस्यैव अभ्यर्चनीयाः सन्ति) ।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| नम्रत्वेन | नम्रभावेन | नम्रता के साथ | with politeness |
| उन्नमन्तः | उन्नतिं लभमानाः | उन्नति प्राप्त करते हुए | getting promotion |
| परगुणकथनैः | अन्यगुणवचनैः | दूसरों के गुणों के कथन द्वारा | by saying others merits |
| स्वान् | आत्मीयान् | अपने | one's own |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| गुणान् | सद्विचारान् | गुणों को | merits |
| ख्यापयन्तः | प्रसारयन्तः | प्रकट करते हुए | showing |
| परार्थे | अन्यार्थे | अन्य व्यक्ति के लिए | for other person |
| विततपृथुतरा- | विस्तृतदीर्घतर- | विस्तृत एवं विशाल कार्य | extensive & great |
| रम्भयत्नाः | कार्ये यत्नवन्तः | को प्रारम्भ करने वाले | starting deeds |
| स्वार्थान् | स्वप्रयोजनानि | अपने प्रयोजनों को | own purposes |
| सम्पादयन्तः | साधयन्तः | सिद्ध करते हुए | fulfilling |
| आक्षेपरूक्षाक्षर- | निन्दाकठोरवचन- | निन्दारूपी कठोर | harsh words of |
| मुखरमुखान् | वाचालान् | वचनों को कहने में मुखर | censure outspoken in saying |
| दुर्जनान् | असज्जनान् | दुर्जनों को | to wicked persons |
| क्षान्त्या एव | क्षमाशीलतया एव | क्षमाशील रहकर ही | by forgiveness only |
| दुःखयन्तः | कष्टयन्तः | कष्ट पहुँचाते हुए | by distressing |
| (अत एव) | (अस्मादेव कारणात्) | (अतएव) | (so) |
| साश्चर्यचर्याः | आश्चर्ययुक्ताचारवन्तः | आश्चर्यजनक आचरण वाले | wondrous behaviour |
| जगति | संसारे | जगत् में | in world |
| बहुमताः | सम्मान्याः | सम्मानित | esteemed |
| सन्तः | सज्जनपुरुषाः | सज्जन पुरुष | good people |
| कस्य | कस्य (जनस्य) | किस (व्यक्ति) के | whose |
| अभ्यर्चनीयाः | पूजनीयाः | पूजनीय | adorable |
| न | न (सन्ति) (अर्थात् सर्वैः पूज्याः भवति) | नहीं (हैं) (अर्थात् सब के द्वारा पूज्य हैं) | (are) not |

**भावार्थः**

**संस्कृतम्–** नम्रभावेन उन्नतिं प्राप्नुवन्तः, अन्येषां सद्गुणकथनेन स्वकीयसौजन्यादीन् गुणान् प्रकटयन्तः, परार्थसाधने विशालं दीर्घकालपूरणीयं कार्यम् आरभमाणाः (उत्साहिनः) स्वप्रयोजनान् निष्पादयन्तः निन्दारूपकठोरभाषिणः दुर्जनान् क्षमाभावेनैव दूषयन्तः, अत एव आश्चर्याचरणवन्तः

www.thearyasamaj.org



संसारे अतिसम्मानिताः सज्जनपुरुषाः कस्य पूज्याः न भवन्ति। अर्थात् ते स्वगुणैः सर्वेषां पूज्याः भवन्ति।

**हिन्दी–** नम्रता से उन्नति प्राप्त करने वाले, दूसरों के सद्गुणों को कहते हुए अपने सौजन्यादि गुणों को प्रकट करने वाले, पर प्रयोजन की सिद्धि के लिए विस्तृत एवं बड़े कार्य को आरम्भ करने वाले, अपने प्रयोजनों को पूर्ण करते हुए निन्दा रूपी कठोर वचनों को बोलने में वाचाल दुर्जनों को क्षमाभाव से तिरस्कृत करने वाले, अत एव आश्चर्य भरे आचरण वाले और संसार में अति सम्मानित सज्जन पुरुष किसके पूजनीय नहीं होते हैं। अर्थात् सबके द्वारा पूज्य होते हैं।

**आङ्ग्लम्–** Rising by politeness, showing their merits by revealing merits of others, fulfilling their own purpose by starting extensive and great deeds for others, reproving the wicked persons whose tongue is full of harsh words by forgiveness, such type of highly esteemed good people with wondrous behaviour are adorable in the world.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

नम्रत्वेनोन्नमन्तः – नम्रत्वेन + उन्नमन्तः (गुण-सन्धिः)

पृथुतरारम्भयत्नाः – पृथुतर + आरम्भयत्नाः (स.दी.सन्धिः)

क्षान्त्यैवाक्षेपरूक्षाक्षरः – क्षान्त्या + एव + आक्षेपरुक्षाक्षरः
(क्षान्त्या + एव: वृद्धि-सन्धिः) (एव + आक्षेपरुक्षाक्षरः: स.दी.सन्धिः)

#### (ख) समासः

परगुणकथनैः – परेषां गुणाः परगुणाः, तेषां कथनं परगुणकथनं (उभयत्र षष्ठी तत्पु.) तैः परगुणकथनैः

विततपृथुतरारम्भयत्नाः – पृथुतरः आरम्भः पृथुतरारम्भः, विततश्चासौ पृथुतरारम्भश्च इति विततपृथुतरारम्भः (कर्मधारयः) विततपृथुतरारम्भे यत्नः येषाम्, ते (बहुव्रीहिः)

परार्थे – परस्मै इदम्, परार्थम्, (चतु. तत्पु.) तस्मिन्

www.thearyasamaj.org



| | | |
|---|---|---|
| स्वार्थान् | – | स्वस्य अर्थाः स्वार्थाः (षष्ठी तत्पु.) |
| आक्षेपरूक्षाक्षरमुखरमुखान् | – | रूक्षाणि च तानि अक्षराणि इति रूक्षाक्षराणि, आक्षेपे रूक्षाक्षराणि - आक्षेपरूक्षाक्षराणि, तेषु मुखराणि मुखानि येषां ते, (कर्मधारयः, सप्त. तत्पु., बहुव्रीहिश्च) तान् |
| साश्चर्यचर्याः | – | आश्चर्येण सह वर्तन्ते इति साश्चर्याः, साश्चर्याः चर्याः येषां ते (बहुव्रीहिः) |
| बहुमताः | – | बहुषु (जनेषु) मताः - बहुमताः |

(ग) **प्रत्ययः**

| | | |
|---|---|---|
| नम्रत्वेन | – | नम्रस्य भावः इत्यर्थे नम्र + त्व प्रत्ययः - नम्रत्वम्, तृ. एक. |
| उन्नमन्तः | – | उत् + नम् + (लटः स्थाने) शतृ - उन्नमत् प्र. बहु. |
| ख्यापयन्तः | – | ख्या + णिच् - ख्यापि + शतृ (लटः स्थाने) ख्यापयत् प्र. बहु. |
| सम्पादयन्तः | – | सम् + पद् + णिच् - सम्पादि + शतृ - सम्पादयत् प्र. बहु. |
| दुःखयन्तः | – | दुःखि इति नामधातुः, दुःखि + शतृ - दुःखयत्, प्र. बहु. |

(घ) **पर्यायः**

| | | |
|---|---|---|
| नम्रत्वम् | – | नम्रता, नम्रभावः, विनम्रता, विनयः |
| क्षान्तिः | – | क्षमा, क्षमाभावः, धैर्यम् |
| रूक्षः | – | पुरुषः, कठोरः, कठिनः |
| आक्षेपः | – | निन्दा, तिरस्कारः, अवज्ञा |

(ii) **छन्दः** – स्रग्धरावृत्तम्

www.thearyasamaj.org



## अभ्यासः – 8
### श्लोकः – 58

1. श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–

नम्रत्वेनोन्नमन्तः परगुणकथनैः .................... ख्यापयन्तः
.................... विततपृथुतरारम्भयत्नाः .................... ।
.................... दुर्जनान् ....................
सन्तः .................... जगति .................... .................... .................... ॥

2. सन्धिं सन्धिच्छेदं वा कृत्वा लिखत–

(i) नम्रत्वेन + उन्नमन्तः – ....................
(ii) क्षान्त्या + एव + आक्षेपः – ....................
(iii) नाभ्यर्चनीयाः – ....................
(iv) पृथुतरारम्भयत्नाः – ....................

3. तिङन्तक्रियापदानि एकत्रीकृत्य लिखत–

.................... .................... ....................

4. सन्तः इत्यस्य बहूनि विशेषणानि श्लोके सन्ति, तानि चित्वा लिखत–

....................
....................

5. दुर्जनान् इति विशेषणम्, अस्य विशेष्यं लिखत–

....................

6. तृतीयान्तं पदं पृथक्कृत्य लिखत–

.................... ....................

www.thearyasamaj.org



7. द्वितीयान्तपदानि लिखत–

..............................................................................

..............................................................................

8. समाधत्त–

(i) सन्तः केन रूपेण उन्नतिं प्राप्नुवन्ति ?

..............................................................................

(ii) स्वगुणं कथं ख्यापयन्ति सत्पुरुषाः ?

..............................................................................

(iii) सज्जनाः दुर्जनान् केन प्रकारेण दुःखयन्ति ?

..............................................................................

(iv) साश्चर्यचर्यां कुत्र बहुमताः भवन्ति ?

..............................................................................

9. अधोलिखितशब्देषु प्रकृतिप्रत्ययादिकं निर्दिशत–

(i) उन्नमन्तः – .................. ..................

(ii) स्वान् – .................. ..................

(iii) परार्थे – .................. ..................

(iv) जगति – .................. ..................

(v) सम्पादयन्तः – .................. ..................

10. उन्नमन्तः, ख्यापयन्तः, सम्पादयन्तः, दुःखयन्तः इति शतृप्रत्ययान्तानि रूपाणि सन्ति। एवमेव निम्नलिखितधातुभिः रूपाणि रचयत–

(i) खाद् + शतृ प्रथमा बहुवचने – ..................................

(ii) दृश् + णिच् (दर्शि) शतृ, प्रथमैकवचने – ..................................

www.thearyasamaj.org



(iii) साधि + शतृ, प्र. बहु. – ..........

(iv) स्थापि + शतृ, प्र. एक. – ..........

(v) पठ् + शतृ, प्र. द्वि. – ..........

11. **कोष्ठकस्थसमुचितपदैः रिक्तस्थानानि पूरयत–**

| |
|---|
| **परार्थे, परगुणकथनैः, सन्तः, दुर्जनान्, सम्पादयन्तः** |

(i) .......... स्वान् गुणान् ख्यापयन्तः ।

(ii) स्वार्थान् .......... ।

(iii) मुखरमुखान् .......... दुःखयन्तः ।

(iv) .......... साश्चर्यचर्याः ।

(v) विततपृथुतरारम्भयत्नाः .......... ।

12. **प्रश्नानामुत्तराणि लिखत–**

(i) स्वान् गुणान् केन प्रकारेण ख्यापयन्तः सन्ति सन्तः ?

..........

(ii) सन्तः परार्थे कीदृशयत्नवन्तः सन्ति ?

..........

(iii) सन्तः दुर्जनान् केन प्रकारेण पीडयन्ति ?

..........

(iv) सन्तः कीदृशाः भवन्ति ?

..........

13. **अधोलिखितशब्दानां विग्रहं प्रदर्शयत–**

(i) परगुणकथनैः – ..........

(ii) स्वार्थान् – ..........

(iii) आक्षेपरूक्षाक्षरमुखरमुखान् – ..........

(iv) परार्थे – ..........

www.thearyasamaj.org



14. श्लोकस्थान् शतृप्रत्ययान्तान् शब्दान् अत्र लिखत–

........................ ........................ ........................

15. विशेषणं विशेष्येण सह योजयत–

| | | | |
|---|---|---|---|
| (i) | स्वान् | (क) | धर्मात्मानः |
| (ii) | निन्दावचनमुखरान् | (ख) | सन्तः |
| (iii) | असाधारणगुणाः | (ग) | दुर्जनान् |
| (iv) | परान् आत्मीयान् च | (घ) | गुणान् |
| (v) | धर्मपरायणाः भवन्ति | (ङ) | जनान् |

टिप्पणम्– शतृप्रत्ययान्तः शब्दः तकारान्तो भवति। तस्य रूपाणि स्मरत–

उन्नमत्– पुंलिङ्गशब्दः

| | | | |
|---|---|---|---|
| प्र. | उन्नमन् | उन्नमन्तौ | उन्नमन्तः |
| द्विती. | उन्नमन्तम् | उन्नमन्तौ | उन्नमतः |

16. एवमेव प्रदत्तपदानां रूपाणि लिखत–

| | | | |
|---|---|---|---|
| प्र. | ख्यापयत् | .................. | .................. |
| द्विती. | .................. | .................. | .................. |
| प्र. | गच्छत् | .................. | .................. |
| द्विती. | .................. | .................. | .................. |
| प्र. | सम्पादयत् | .................. | .................. |
| द्विती. | .................. | .................. | .................. |

शतृप्रत्ययान्तस्य शेषविभक्तौ महत्, भवत् इत्यादिवत् रूपाणि भवन्ति। तानि स्मरत।

17. किं शुद्धं ☑ किम् अशुद्धमिति ☒ यथोचितं चिह्नेन निर्दिशत–

(i) कठोरतया उन्नमन्तः महान्तो भवन्ति। ☐

www.thearyasamaj.org



(ii) नम्रतया उन्नमन्तः महान्तो भवन्ति । ☐

(iii) सज्जनाः रूक्षवचनदक्षान् दुर्जनान् भर्त्सनया दूषयन्ति । ☐

(iv) सज्जनाः रूक्षवचनदक्षान् दुर्जनान् क्षान्त्या दूषयन्ति । ☐

(v) गुणवन्तः सन्तः परगुणकथनैः आत्मानं न ख्यापयन्ति । ☐

(vi) गुणवन्तः सन्तः परगुणकथनैरात्मानं ख्यापयन्ति । ☐

**18. नम्रत्वेन इति भावार्थक-त्वप्रत्ययनिष्पन्नं पदं तृतीयाविभक्तौ अस्ति । एवमेव अधोलिखितानां पदानां रूपाणि रिक्ते स्थाने लिखत–**

| गुरु, देव, मनुष्य, कोमल, सुन्दर |
|---|

**यथा–** (i) स <u>**गुरुत्वेन**</u> पूज्यो भवति ।

(ii) मनुष्यः .................................. महान् भवति ।

(iii) रामः .................................. ख्यातिं प्राप्तवान् ।

(iv) कमलं .................................. दर्शनीयम् ।

(v) कामः .................................. जगति विख्यातः ।

**19. स्रग्धरा-छन्दसः लक्षणमत्र लिखत–**

..................................................................................................................

**20. "सन्तः साश्चर्यचर्याः जगति बहुमताः कस्य नाभ्यर्चनीयाः" इत्यस्याः पङ्क्तेराशयं लिखत–**

..................................................................................................................

..................................................................................................................

..................................................................................................................

..................................................................................................................

..................................................................................................................

..................................................................................................................

◆◆◆

www.thearyasamaj.org

# तृतीयः पाठः – परोपकारः

**श्लोकः**

**भवन्ति नम्रास्तरवः फलोद्गमैः**
**नवाम्बुभिर्दूरविलम्बिनो घनाः।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः**
**स्वभाव एवैष परोपकारिणाम्॥ 59॥**

**पदच्छेदः**

भवन्ति नम्राः तरवः फल-उद्गमैः
नव-अम्बुभिः दूर-विलम्बिनः घनाः।
अनुद्धताः सत्-पुरुषाः समृद्धिभिः
स्वभावः एव एषः परोपकारिणाम्॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| भवन्ति | भू- कर्तरि लट् प्रपु. बहु. | सत्पुरुषाः | अ. पुं. प्र. बहु. विशेष्यं समस्तञ्च |
| नम्राः | अ. पुं. बहु. एक. वि. | समृद्धिभिः | इ. स्त्री. तृ. बहु. |
| तरवः | उ. पुं. बहु. विशेष्यम् | स्वभावः | अ. पुं. प्र. एक. विशेष्यम् |
| फलोद्गमैः | अ. पुं. तृ. बहु. समस्तम् | एव | अव्ययम् |
| नवाम्बुभिः | उ. पुं. तृ. बहु. समस्तम् | एषः | एतद्- सर्व., द. पुं. प्र. एक. |
| दूरविलम्बिनः | न. पुं. प्र. बहु. समस्तम् | परोपकारिणाम् | न. पुं. षष्ठी बहु. समस्तम् |
| घनाः | अ. पुं. प्र. बहु. विशेष्यम् | | |
| अनुद्धताः | अ. पुं. प्र. बहु. वि. समस्तम् | | |

**आकाङ्क्षा**

**नम्राः भवन्ति।**

के नम्राः भवन्ति ? तरवः नम्राः भवन्ति।

www.thearyasamaj.org



| | |
|---|---|
| तरवः कैः (कथं) नम्राः भवन्ति ? | तरवः फलोद्गमैः नम्राः भवन्ति । |
| घनाः कीदृशाः भवन्ति ? | दूरविलम्बिनः भवन्ति । |
| घनाः कैः दूरविलम्बिनो भवन्ति ? | नवाम्बुभिः दूरविलम्बिनो भवन्ति । |
| के अनुद्धताः भवन्ति ? | सत्पुरुषाः अनुद्धताः भवन्ति । |
| सत्पुरुषा काभिः अनुद्धताः भवन्ति ? | समृद्धिभिः अनुद्धताः भवन्ति । |
| एषः केषां स्वभावः एव ? | एषः परोपकारिणां स्वभावः एव । |

**अन्वयः**

तरवः फलोद्गमैः नम्राः भवन्ति, घनाः नवाम्बुभिः दूरविलम्बिनो (भवन्ति)। सत्पुरुषाः समृद्धिभिः अनुद्धताः (भवन्ति)। परोपकारिणाम् एषः स्वभावः एव (भवति)।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| तरवः | वृक्षाः | वृक्ष | trees |
| फलोद्गमैः | फलानां प्रादुर्भावैः (फलभारैः इत्यर्थः) | फलों के लगने से | on induction of fruits |
| नम्राः | नताः (अधोनताः) | नम्र (झुकते हैं) | bent down |
| भवन्ति | जायन्ते | हो जाते हैं | becomes |
| घनाः | मेघाः | मेघ | clouds |
| नवाम्बुभिः | नवजलैः | नूतन जल से | with new water |
| दूरविलम्बिनः | दूरं व्याप्यमानाः | दूर तक लटकने वाले | hang very low |
| सत्पुरुषाः | श्रेष्ठजनाः | सज्जन पुरुष | pious persons |
| समृद्धिभिः | वैभवैः | समृद्धियों से | by wealth |
| अनुद्धताः | गर्वहीनाः, नम्राः | विनम्र | gentle |
| (भवन्ति) | (जायन्ते) | (हो जाते हैं) | (becomes) |
| परोपकारिणाम् | परोपकार-परायणानाम् | परोपकारी लोगों का | benevolent persons |
| एषः | पूर्वोक्तनम्रत्वादिगुणः | यह (नम्रता आदि गुण) | this (gentleness) |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| स्वभावः एव (भवति) | निसर्ग एव (जायते) | स्वभावसिद्ध ही (हो जाता है) | by nature (becomes) |

**भावार्थः**

**संस्कृतम्–** वृक्षाः फलभारैः नम्राः भवन्ति, मेघाः नवजलैः दूरपर्यन्तं भूमौ अतिनीचैः यावत् लम्बमानाः भवन्ति, ऐश्वर्यादिभिश्च सज्जनपुरुषाः गर्वहीनाः नम्राश्च जायन्ते। अयं पूर्वोक्त-नम्रत्वादिगुणः परोपकारपरायणानां जनानां स्वभावसिद्धो भवति।

**हिन्दी–** वृक्ष फलों के आने से झुक जाते हैं, मेघ नवजलकणों से भूमि पर (वर्षा के लिए) दूर तक लटक कर फैल जाते हैं, धन वैभवों से सज्जन-पुरुष गर्वहीन (नम्र) हो जाते हैं। वस्तुतः यह नम्रता आदि परोपकार करने वालों का स्वभाव ही होता है।

**आङ्ग्लम्–** Trees bent down on induction of fruits. Clouds hang down very low and spread with new water, wealth makes pious persons gentle. In fact, this gentleness is nature of benevolent persons.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

| | | |
|---|---|---|
| नम्रास्तरवः | – | नम्राः + तरवः (विसर्ग-सन्धिः) |
| फलोद्गमैः | – | फल + उद्गमैः (गुण-सन्धिः) यथा– जलोदयः, ज्ञानोदयः, गङ्गोद्गमः |
| नवाम्बुभिः | – | नव + अम्बुभिः (दीर्घ-सन्धिः) |
| विलम्बिनो घनाः | – | विलम्बिनः + घनाः (विसर्गस्थानिकरेफस्य उत्वम्, गुणश्च) यथा– रामः + भवति - रामो भवति। देवः याति = देवो याति। |
| एवैष परोपकारिणाम् | – | एव + एषः + परोपकारिणाम् (वृद्धिसन्धिः एतत् इत्यस्य सोर्लोपश्च) यथा– एषः पन्थाः = एष पन्थाः। |

www.thearyasamaj.org



(ख) **समासः**

| | | |
|---|---|---|
| फलोद्गमैः | – | फलानाम् उद्गमः फलोद्गमः, तैः (षष्ठी तत्पु.) |
| नवाम्बुभिः | – | नवञ्च तत् अम्बु नवाम्बु (कर्मधारयः) तैः |
| दूरविलम्बिनः | – | दूरं यावत् विलम्बन्ते, तच्छीलाः इत्यर्थे दूर bR qinkr~b✓लम्ब + णिनिः, उपपदसमासः दूरविलम्बिन् इति। (प्र. बहु.) |
| अनुद्धता | – | न उद्धताः (नञ्-समास) |
| सत्पुरुषाः | – | सन्तश्च ते पुरुषाः (कर्मधारयः) |
| परोपकारिणाम् | – | परान् उपकुर्वन्ति तच्छीलाः इत्यर्थे परोप-पदात् उप✓कृ + णिनि = परोपकारिन् (उपपदसमासः) यथा– अन्योपकारी, हितकारी, धनकारी। |

(ii) **पर्यायशब्दाः**

| | | |
|---|---|---|
| तरुः | – | वृक्षः, महीरुहः शाखी, विटपः, पादपः |
| अम्बु | – | वारि, जलम्, पानीयम्, तोयः, पयः |

(iii) **छन्दः** – वंशस्थ-छन्दः

(iv) **अलङ्कारः** – अर्थान्तरन्यासः

(v) **विशेषः** – महान्तः जनाः परोपकाराय स्वकष्टं न विचारयन्ति। नम्रता, गर्वहीनता उपकारिता च तेषां स्वभावसिद्धः गुणः।

---

## अभ्यासः – 9
### श्लोकः – 59

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

भवन्ति नम्रास्तरवः ..................................................

.................................................................. घनाः।

www.thearyasamaj.org



.................... सत्पुरुषाः ....................
स्वभाव .................... परोपकारिणाम् ॥

2. **यथोचितं सन्धिं विसन्धिं वा कुरुत–**

(i) नम्राः + तरवः – ....................
(ii) फल + उद्गमैः – ....................
(iii) नवाम्बुभिर्दूरविलम्बिनो घनाः – ....................
(iv) एवैष – ....................

3. (i) **पद्ये चत्वारि विशेषणानि विशेष्याणि च सन्ति तानि लिखत–**

| **विशेषणम्** | | **विशेष्यम्** |
|---|---|---|
| .................... | – | .................... |
| .................... | – | .................... |
| .................... | – | .................... |
| .................... | – | .................... |

(ii) **पद्ये आगतानि तृतीयान्तपदानि लिखत–**

....................

(iii) **पद्ये आगतं नकारान्तं पदं लिखत–**

....................

4. **समाधत्त–**

(i) तरवः कथं नम्राः भवन्ति ? ....................
(ii) घनाः नवाम्बुभिः कीदृशाः भवन्ति ? ....................
(iii) काभिः सत्पुरुषाः भवन्ति ? ....................
(iv) परोपकारिणां स्वभावः कीदृशो भवति ? ....................

www.thearyasamaj.org



5. तृतीयचतुर्थप्रश्नाभ्यां पदानि आदाय वाक्यानि रचयत। अत्र क्रियापदानि अन्यच्च आवश्यकं पदं दीयते–

(i) अयम् ................................ अधिकारी आसीत्।

(ii) इमे जनाः सर्वदा ................................ भवन्ति। (हितकारिन्)

(iii) यान्ति कष्टं दूरं ................................।

(iv) अत्र ................................ जनाः चकिताः जाताः।

(v) अयं ................................ अस्ति।

(vi) अस्मिन् जने ................................ विद्यते।

(vii) अत्र आगताः सर्वे ................................ सन्ति।

6. मूलशब्द-विभक्तिवचनलिङ्गनिर्देशं कुरुत–

(i) तरवः – ................................

(ii) नवाम्बुभिः – ................................

(iii) समृद्धिभिः – ................................

7. यथोचितं सन्धिं विसन्धिं वा कुरुत–

(i) वृक्षाः + तृणाः – ................................

(ii) रामः + तत्रः – ................................

(iii) घनोद्गमः – ................................

(iv) जलोर्मिः – ................................

8. विग्रहवाक्यं लिखत–

(i) पुष्पोद्गमः – ................................

(ii) हितकारी – ................................

(iii) अनुपहतः – ................................

(iv) नवजलधरः – ................................

www.thearyasamaj.org



9. उत्तराणि लिखत–

(i) परोपकारिणां कः स्वभावः ?

..............................

(ii) फलभारैः वृक्षाः कीदृशाः भवन्ति ?

..............................

(iii) घनाः दूरं यावत् नवाम्बुभिः कथं विलम्बन्ते ?

..............................

10. प्रदत्तपदप्रयोगेण तृतीयान्तपदैः वाक्यानि पूरयत–

| समृद्धिः, पल्लवोद्गमः, नूतनवारिः |
|---|

(i) वृक्षाणां शोभा .............................. वर्धते।

(ii) आषाढे मेघाः .............................. पूर्णाः भवन्ति।

(iii) .............................. सुजनाः गर्विताः न भवन्ति।

11. णिनिप्रत्यय-प्रयोगेण पदं निष्पादयत–

यथा– (i) परोपकारी – परान् उपकरोति तच्छीलः

(ii) कार्यकारी – ..............................

(iii) हितकारी – ..............................

(iv) श्रमकारी – ..............................

(v) सूर्यावलम्बी – ..............................

12. यथोचितं विग्रहं समस्तपदं वा लिखत–

(i) सुखोद्भूतैः – ..............................

(ii) जलोदयैः – ..............................

www.thearyasamaj.org



(iii) आकाशदेशम् अवलम्बते तच्छीलः – ..........

(iv) न उत्सेकः – ..........

(v) विशिष्टश्चासौ जनश्च – ..........

**13. कोष्ठकात् शब्दमादाय रिक्तस्थलं पूरयत–**

| स्वभाव एष, गर्वहीनाः भवन्ति, दूरविलम्बिनो जायन्ते, नम्राः भवन्ति |
|---|

(i) तरवः फलोद्गमैः .......... ।

(ii) नवाम्बुभिः घनाः .......... ।

(iii) समृद्धिभिः श्रेष्टपुरुषाः .......... ।

(iv) परोपकरणे संलग्नानां .......... ।

**14. सन्धिं कृत्वा सन्धिनाम लिखत–**

(i) तरवः + फलोद्गमैः – ..........

(ii) सत्पुरुषाः + समृद्धिभिः – ..........

(iii) नवाम्बुभिः + घनाः – ..........

(iv) पर + उपकारिणाम् – ..........

(v) एष + रम्यः + देशः – ..........

(vi) एतेषाम् + अयम् + स्वभावः + एव – ..........

**15. 'स्वभाव एवैष परोपकारिणाम्' इत्यस्याशयं संस्कृतेन लिखत–**

..........

..........

..........

..........

..........

www.thearyasamaj.org



**16. अस्य श्लोकस्य भावार्थं लिखत–**

..........

..........

..........

..........

**17. प्रदत्तशब्दरूपाणां विभक्तिं लिखत–**

(i) विलम्बिनः – ..........

(ii) विलम्बिनोः – ..........

(iii) विलम्बिना – ..........

(iv) विलम्बिनि – ..........

**18. अस्मिन् पद्ये द्वौ नकारान्तशब्दौ स्तः- विलम्बिन्, परोपकारिन् च। अनयोरेकस्य रूपाणि लिख्यन्ते; स्मरत–**

| | | | |
|---|---|---|---|
| **प्र.** | परोपकारी | परोपकारिणौ | परोपकारिणः |
| **द्विती.** | परोपकारिणम् | परोपकारिणौ | परोपकारिणः |
| **तृ.** | परोपकारिणा | परोपकारिभ्याम् | परोपकारिभिः |
| **चतु.** | परोपकारिणे | परोपकारिभ्याम् | परोपकारिभ्यः |
| **पं.** | परोपकारिणः | परोपकारिभ्याम् | परोपकारिभ्यः |
| **षष्ठी** | परोपकारिणः | परोपकारिणोः | परोपकारिणाम् |
| **सप्त.** | परोपकारिणि | परोपकारिणोः | परोपकारिषु |
| **सम्बो.प्र.** | हे परोपकारिन् ! | हे परोपकारिणौ ! | हे परोपकारिणः ! |

**एवमेव विलम्बिन्, मन्त्रिन्, धनिन्, यशस्विन्, मेधाविन् इत्यादीनां पदानां रूपाणि लिखत।**

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**श्रोत्रं श्रुतेनैव न कुण्डलेन**
**दानेन पाणिर्न तु कङ्कणेन।**
**विभाति कायः करुणापराणां**
**परोपकारैर्न तु चन्दनेन॥ 60॥**

**पदच्छेदः**

श्रोत्रम् श्रुतेन एव न कुण्डलेन
दानेन पाणिः न तु कङ्कणेन।
विभाति कायः करुणा-पराणाम्
पर-उपकारैः न तु चन्दनेन॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| श्रोत्रम् | अ. नपुं. प्र. एक. | कङ्कणेन | अ. नपुं. तृ. एक. |
| श्रुतेन | अ. नपुं. तृ. एक. | विभाति | वि + भा लट्., प्रपु. एक. क्रियापदम् |
| एव | अव्ययम् | | |
| न | अव्ययम् | कायः | अ. पुं. प्र. एक. |
| कुण्डलेन | अ. नपुं. तृ. एक. | करुणापराणाम् | अ. पुं. षष्ठी बहु. समस्तम् |
| दानेन | अ. नपुं. तृ. एक. | परोपकारैः | अ. पुं. तृ. बहु. समस्तम् |
| पाणिः | इ. पुं. प्र. एक. | न, तु | अव्ययपदे |
| न, तु | अव्ययपदे | चन्दनेन | अ. नपुं. तृ. एक. |

**आकाङ्क्षा**

**विभाति।**

किं विभाति। — श्रोत्रं विभाति।
श्रोत्रं केन विभाति ? — श्रोत्रं श्रुतेन विभाति।

www.thearyasamaj.org



| | |
|---|---|
| श्रोत्रं केन न विभाति ? | श्रोत्रं कुण्डलेन न विभाति। |
| पाणिः केन विभाति ? | पाणिः दानेन विभाति। |
| पाणिः केन न विभाति ? | पाणिः कङ्कणेन न विभाति। |
| केषां कायः विभाति ? | करुणापराणां कायः विभाति। |
| करुणापराणां कायः कैः विभाति ? | करुणापराणां कायः परोपकारैः विभाति। |
| करुणापराणां कायः केन न विभाति ? | करुणापराणां कायः चन्दनेन न विभाति। |

## अन्वयः

करुणापराणां श्रोत्रं श्रुतेन एव विभाति कुण्डलेन न (विभाति), पाणिः दानेन (विभाति), न तु कङ्कणेन। कायः परोपकारैः (विभाति) न तु चन्दनेन।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| करुणापराणाम् | दयाकुलानां जनानाम् | करुणा से परिपूर्ण लोगों का | filled by pity |
| श्रोत्रम् | कर्णः | कान | ear |
| श्रुतेन एव | शास्त्रेण एव | शास्त्र से ही | by *Śāstras* |
| (विभाति) | (सुशोभते) | (शोभित होता है) | (decorated) |
| न तु कुण्डलेन | न च सुवर्णालङ्करणेन/ कर्णवेष्टनेन | न कि स्वर्णनिर्मित कुण्डल से | not by ear ring |
| विभाति | सुशोभते | सुशोभित होता है | (decorated) |
| पाणिः | करः | हाथ | hand |
| दानेन | प्रदानेन | दान देने से | by charity |
| (विभाति) | (सुशोभते) | (शोभित होता है) | decorated |
| न तु कङ्कणेन | न च वलयेन | न कि कङ्गन से | not by bracelets |
| कायः | शरीरम् | शरीर | body |
| परोपकारैः | परेषामुपकारैः | परोपकार करने से | by kindness |
| (विभाति) | (शोभते) | (शोभा पाता है) | (decorated) |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| न तु चन्दनेन | न च चन्दनलेपनेन | न कि चन्दन के लेपने से | not by sandal paste |

**भावार्थः**

**संस्कृतम्–** करुणायुतानां कर्णः शास्त्राभ्यासेन विभाति न तु कुण्डलधारणेन, तेषां हस्तः सत्पात्रेभ्यः दानेन शोभते न तु कङ्कणधारणेन, करुणापराणाञ्च शरीरं चन्दनलेपनेन न विभाति अपितु परेषामुपकारकरणेन शोभते।

**हिन्दी–** करुणा से परिपूर्ण लोगों के कान शास्त्राभ्यास से ही शोभित होते हैं, कुण्डलधारण करने से नहीं, उनका हाथ दान से शोभा पाता है, कङ्गन धारण करने से नहीं तथा उनका शरीर परोपकार करने से शोभा पाता है, चन्दन लेपने से नहीं।

**आङ्ग्लम्–** The ear of a great men is decorated by Śāstra-knowledge only not by an ear-ring, the hand is decorated by charity only not by bracelets, the body of kind persons is decorated by their kindness only not by sandal paste.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

| | | |
|---|---|---|
| श्रुतेनैव | – | श्रुतेन + एव (वृद्धि-सन्धिः) |
| पाणिर्न | – | पाणिः + न (विसर्ग-सन्धिः) |
| परोपकारैः | – | पर + उपकारैः (गुण-सन्धिः) |

(ख) **समासः**

| | | |
|---|---|---|
| करुणापराणाम् | – | करुणायां पराः करुणापराः (सप्त. तत्पु.) तेषाम् |
| परोपकारैः | – | परेषाम् उपकारः परोपकारः, (षष्ठी-तत्पु.) तैः |

(ii) **पर्यायशब्दाः**

| | | |
|---|---|---|
| श्रोत्रम् | – | कर्णः, शब्दग्रहः, श्रवणम् |
| कुण्डलम् | – | कर्णवेष्टनम्, कर्णिका, तालपत्रम् |
| कङ्कणम् | – | करभूषणम्, वलयम् |

www.thearyasamaj.org



| | | |
|---|---|---|
| चन्दनम् | – | घनसारः, मलयजः, भद्रश्रीः, सिताभ्रः |
| (iii) छन्दः | – | उपजातिः । उपेन्द्रवज्रा + इन्द्रवज्रयोः एकस्मिन् पद्ये मेलनेन उपजाति-छन्दो भवति । |

---

## अभ्यासः – 10
## श्लोकः – 60

1. श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–

श्रोत्रं .................... न ....................

.................... .................... तु कङ्कणेन ।

विभाति .................... ....................

.................... तु चन्दनेन ॥

2. पदच्छेदं कुरुत–

(i) श्रोत्रं श्रुतेनैव – ....................

(ii) पाणिर्न – ....................

(iii) परोपकारैर्न तु – ....................

3. 'विभाति' इति कीदृशं पदम् अस्ति ?

....................

4. तृतीयान्तपदानि एकत्र सङ्कलय्य लिखत–

....................

5. प्रथमान्तं पदमधो लिखत–

....................

www.thearyasamaj.org



6. समाधत्त–

(i) शास्त्राभ्यासश्रवणाभ्यां किं विभाति ?

..........................................................................................

(ii) कङ्कणेन को न विभाति, कैः च विभाति ?

..........................................................................................

(iii) केषां कायः विभाति ?

..........................................................................................

(iv) चन्दनेन केषां कायो न विभाति ?

..........................................................................................

(v) परोपकारः केषां गुणो वर्तते ?

..........................................................................................

7. अधोलिखितेन तृतीयान्तपदेन उपयुक्तं प्रथमान्तं पदं योजयत–

(i) परोपकारैः – ..........................................

(ii) दानेन – ..........................................

(iii) श्रुतेन – ..........................................

8. शुद्धं अशुद्धं वा यथोचितचिह्नेन सूचयत–

(i) श्रोत्रं कुण्डलेन विभाति। ☐

(ii) पाणिः परोपकारैः विभाति। ☐

(iii) कायः परोपकारैः विभाति। ☐

(iv) पाणिः दानेन विभाति। ☐

(v) श्रोत्रं श्रुतेन विभाति। ☐

(vi) पाणिः चन्दनेन विभाति। ☐

www.thearyasamaj.org



9. विभाति, श्रुतेन, पाणिः, कङ्कणेन एतेषां पदानां परिचयं अधो लिखत–

| मूलशब्दः/धातुः | विभक्तिः/पुरुषः | वचनम् |
|---|---|---|
| ............ | ............ | ............ |
| ............ | ............ | ............ |
| ............ | ............ | ............ |
| ............ | ............ | ............ |

10. आकारान्तो धातुः वि✓भा इति अदादिगणस्थः। तस्य लटि रूपाणि पठत–

| | | | |
|---|---|---|---|
| प्रपु. | विभाति | विभातः | विभान्ति |
| मपु. | विभासि | विभाथः | विभाथ |
| उपु. | विभामि | विभावः | विभामः |

एवमेव प्र✓या धातोः रूपाणि लिखत–

| | | | |
|---|---|---|---|
| प्रपु. | ............ | ............ | ............ |
| मपु. | ............ | ............ | ............ |
| उपु. | ............ | ............ | ............ |

11. तृतीयैकवचने रूपाणि लिखत योजयत च–

(i) कर – ............ दानं देयम्।

(ii) करिन् – ............ करेण जलं पीयते।

(iii) करुणा – ............ ते ओत-प्रोताः सन्ति।

(iv) धनप्रदान – ............ यशः लभस्व।

(v) पयस् – ............ मिश्रितं जलं देहि।

12. प्रश्नानामुत्तराणि लिखत–

(i) श्रोत्रं केन शोभते ?

............................................................

www.thearyasamaj.org



(ii) कुण्डलेन किं न शोभते ?

..............................................................................................

(iii) पाणिः केन विभाति ?

..............................................................................................

(iv) कायः केन न विभाति ?

..............................................................................................

(v) परोपकारिणाम् आभूषणानि कानि सन्ति ?

..............................................................................................

**13. पद्यं स्मृत्वा पूरयत–**

श्रोत्रं .................................. न ..................................

.............................. पाणिर्न तु .................................. ।

विभाति .......................... ..................................

........................................................ तु चन्दनेन ॥

**14. आ√ख्या-धातोः प्रयोगेण वाक्यं पूरयत–**

(i) वपुः .................................. भोजनम् ।

(ii) भाषणं देशम् .................................. ।

(iii) त्वं किम् .................................. ।

(iv) अहम् .................................. रामाय वचनम् ।

(v) तौ शब्दान् .................................. ।

(vi) बालकाः शास्त्राणि .................................. ।

(vii) युवां वेदमन्त्रम् .................................. ।

(viii) वयं धर्मम् .................................. ।

www.thearyasamaj.org



15. विभाति, प्रयाति, वाति इत्येतेषां रूपाणि लिखत–

(i) विभाति .................... ....................
(ii) प्रयाति .................... ....................
(iii) वाति .................... ....................

16. ✓भा धातुवत् लटि पा-धातोः रूपाणि लिखत–

प्रपु. .................... .................... ....................
मपु. .................... .................... ....................
उपु. .................... .................... ....................

17. यथोचितं विग्रहवाक्यं समस्तपदं वा विलिख्य समासनाम निर्दिशत–

(i) भक्तिपराः – ....................
(ii) कर्तव्यपराः – ....................
(iii) मनुष्याणाम् उपकारः – ....................
(iv) छात्राणाम् उपकारः, तेन – ....................

18. पर्यायशब्दान् लिखत–

(i) कर्णवेष्टनम् – ....................
(ii) कङ्कणम् – ....................
(iii) घनसारः – ....................

19. अस्य श्लोकस्यार्थं संस्कृतभाषया लिखत–

....................
....................
....................
....................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**पद्माकरं दिनकरो विकचं करोति***
**चन्द्रो विकासयति कैरवचक्रवालम् ।**
**नाभ्यर्थितो जलधरोऽपि जलं ददाति**
**सन्तः स्वयं परहिते विहिताभियोगाः ॥ 61 ॥**

**पदच्छेदः**

पद्माकरम् दिनकरः विकचम् करोति
चन्द्रः विकासयति कैरवचक्रवालम् ।
न अभ्यर्थितः जलधरः अपि जलम् ददाति
सन्तः स्वयम् पर-हिते विहित-अभियोगाः ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| पद्माकरम् | अ. पुं. द्विती. एक. विशेष्यम् | जलधरः | अ. पुं. प्र. एक. समस्तम् |
| दिनकरः | अ. पुं. प्र. एक. | अपि | अव्ययम् |
| विकचम् | अ. पुं. द्विती. एक. वि. | जलम् | अ. नपुं. द्विती. एक. |
| करोति | कृ कर्तरि लट् प्रपु. एक. | ददाति | दा कर्तरि लट् प्रपु. एक. |
| चन्द्रः | अ. पुं. प्र. एक. | सन्तः | त. पुं. प्र. बहु. |
| विकासयति | वि + कास् कर्तरि लट्, प्रपु. एक. | स्वयम् | अव्ययम् |
| कैरवचक्रवालम् | अ. पुं. द्विती. एक. | परहिते | अ. नपुं. सप्त. एक. समस्तम् |
| न | अव्ययम् | विहिताभियोगाः | अ. पुं. प्र. बहु. वि., समस्तम् |
| अभ्यर्थितः | अ. पुं. प्र. एक. कृदन्त-वि. | | |

* टिप्पणी– 'विकचं करोति' इत्यस्य स्थाने विकचीकरोति इति पाठान्तरमस्ति ।

www.thearyasamaj.org



## आकाङ्क्षा

**करोति ।**

| | |
|---|---|
| कः करोति ? | दिनकरः करोति । |
| दिनकरः किं करोति ? | दिनकरः विकचं करोति । |
| दिनकरः कं विकचं करोति ? | दिनकरः पद्माकरं विकचं करोति । |
| कीदृशः दिनकरः पद्माकरं विकचं करोति ? | नाभ्यर्थितः (अपि) दिनकरः पद्माकरं विकचं करोति । |
| नाभ्यर्थितः चन्द्रः किं करोति ? | नाभ्यर्थितः (अपि) चन्द्रः कैरवचक्रवालम् विकासयति । |
| कः नाभ्यर्थितोऽपि जलं ददाति ? | नाभ्यर्थितोऽपि जलधरः जलं ददाति । |
| अभ्यर्थनां विना के उपकुर्वन्ति ? | अभ्यर्थनां विना सत्पुरुषाः उपकुर्वन्ति । |
| सन्तः कीदृशाः भवन्ति ? | सन्तः स्वयं परहिते विहिताभियोगाः भवन्ति । |

## अन्वयः

न अभ्यर्थितोऽपि दिनकरः पद्माकरं विकचं करोति, (न अभ्यर्थितः) चन्द्रः कैरवचक्रवालं विकासयति, (न अभ्यर्थितोऽपि) जलधरः जलं ददाति तथैव सन्तः स्वयं परहिते विहिताभियोगाः (भवन्ति) ।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| न अभ्यर्थितः | न प्रार्थितः | प्रार्थना किये बिना | without praying |
| अपि | अपि | भी | also |
| दिनकरः | सूर्यः | सूर्य | the sun |
| पद्माकरम् | कमलसमूहम् | कमल समूह को | group of lotus |
| विकचं करोति | प्रफुल्लं विदधाति | विकसित करता है | expands |
| (नाभ्यर्थितः) | (अयाचितः) | (प्रार्थना के बिना ही) | (without praying) |
| चन्द्रः | चन्द्रमाः | चन्द्रमा | the moon |
| कैरवचक्रवालम् | कुमुदानां मण्डलम् | कुमुद समूह को | circle of lilies |
| विकासयति | विकचीकरोति | खिला देता है | blooms |
| (नाभ्यर्थितः) | (अप्रार्थितः) | (बिना प्रार्थना के ही) | (without praying) |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| जलधरः | वारिदः | मेघ | clouds |
| जलम् | वारि | जल को | water |
| ददाति | यच्छति | देता है | pours |
| तथैव | एवमेव | इसी प्रकार | thus |
| सन्तः | सत्पुरुषाः | सत्पुरुष | good people |
| स्वयम् | स्वतः एव | स्वयम् ही | self |
| परहिते | परकल्याणाय | पर के हित के लिए | for others good |
| विहिताभियोगाः | कृतप्रयत्नाः | कृत प्रयत्न | persists |
| (भवन्ति) | (जायन्ते) | (होते हैं) | (becomes) |

## भावार्थः

**संस्कृतम्–** याचनं विनैव सूर्यः कमलवनं प्रफुल्लयति, चन्द्रः कुमुदमण्डलं विकासयति, जलधरोऽपि प्रार्थनां विनैव जलं वर्षति, वस्तुतः सत्पुरुषाणां स्वभाव एष भवति यत् परकल्याणाय स्वयमेव सदा सन्नद्धाः भवन्ति !

**हिन्दी–** प्रार्थना किए बिना ही सूर्य कमल वन को विकसित कर देता है; चन्द्र कुमुदमण्डल को खिला देता है और मेघ भी बिना याचना के ही जल बरसाता है तथैव सज्जनों का यह स्वभाव होता है कि वे पर-कल्याण के लिए स्वतः ही तत्पर रहा करते हैं। वे किसी के कहने की अपेक्षा नहीं रखते।

**आङ्ग्लम्–** The sun though unasked makes the lotus to expand, the moon though unasked causes the circle of the lilies to bloom and the clouds unasked pour the water, good people of their own accord, persist in doing good to others.

## निदर्शनम्

(i) व्याकरणम्

(क) **सन्धिः**

| | | |
|---|---|---|
| नाभ्यर्थितः | – | न + अभ्यर्थितः (स.दी.सन्धिः) |
| जलधरोऽपि | – | जलधरः + अपि (विसर्ग-सन्धिः) |
| सन्तः स्वयम् | – | सन्तः + स्वयम् (विसर्ग-सन्धिः) |

www.thearyasamaj.org



**यथोचितं 'अदस्' शब्दस्य रूपाणि अधो लिखितवाक्ये पूरयत–**

(i) .................................. छात्रेण पुस्तकं पठितम्।

(ii) .................................. विद्यार्थी कस्मिन् वर्गे अस्ति।

(iii) .................................. बालकौ कौ स्तः।

(iv) .................................. छात्रैः सह गुरुः अगच्छत्।

(v) .................................. वृक्षान् दूरतः पश्य।

(vi) कथयस्व .................................. जनम् इदम् वृत्तान्तम्।

(vii) .................................. क्रीडकाभ्यां सम्यक् क्रीडितम्।

(viii) पुरःस्थितौ .................................. महापुरुषौ पश्य।

◆◆◆

www.thearyasamaj.org

# चतुर्थः पाठः – सतां मैत्री

**श्लोकः**

**पापान्निवारयति योजयते हिताय**
**गुह्यं निगूहति गुणान् प्रकटीकरोति।**
**आपद्गतं च न जहाति ददाति काले**
**सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥ 63॥**

**पदच्छेदः**

पापात् निवारयति योजयते हिताय
गुह्यम् निगूहति गुणान् प्रकटीकरोति।
आपद्गतम् च न जहाति ददाति काले
सत्-मित्र-लक्षणम् इदम् प्रवदन्ति सन्तः॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| पापात् | अ. नपुं. पं. एक. | च | अव्ययम् |
| निवारयति | नि✓वारि, लट्, प्रपु. एक. | न | अव्ययम् |
| योजयते | योजि + लट्, प्रपु. एक. | जहाति | हा + लट्, प्रपु. एक. |
| हिताय | अ. नपुं. चतु. एक. | ददाति | दा + लट्, प्रपु. एक. |
| गुह्यम् | अ. नपुं. प्र. एक. | काले | अ. पुं. सप्त. एक. |
| निगूहति | नि✓गूह्- लट्, प्रपु. एक. | सन्मित्रलक्षणम् | अ. नपुं. द्विती. एक. समस्तम् |
| गुणान् | अ. पुं. द्विती. बहु. | | |
| प्रकटीकरोति | प्रकटी + कृ, लट्, प्रपु. एक. | इदम् | इदम्- सर्व., नपुं. द्विती. एक. |
| | | प्रवदन्ति | प्र✓वद, लट् प्रपु. बहु. |
| आपद्गतम् | अ. नपुं. द्विती. एक. वि. समस्तम् | सन्तः | सत्- त. पुं.प्र. बहु. कर्तृपदम् |

www.thearyasamaj.org



## आकाङ्क्षा

**प्रवदन्ति।**

| | |
|---|---|
| के प्रवदन्ति ? | सन्तः प्रवदन्ति। |
| सन्तः किं प्रवदन्ति ? | सन्तः इदं सन्मित्रलक्षणम् (इति) प्रवदन्ति। |
| सन्मित्रं किं करोति ? | सन्मित्रं पापान्निवारयति, हिताय योजयते। |
| पुनश्च सन्मित्रं किं करोति ? | गुह्यं निगूहति, गुणान् (च) प्रकटीकरोति। |
| सन्मित्रं कं (जनं) न जहाति ? | सन्मित्रं आपद्गतं (जनं) न जहाति। |
| पुनश्च सन्मित्रं किं करोति ? | (पुनश्च) सन्मित्रं काले ददाति। |

## अन्वयः

पापात् निवारयति, हिताय योजयते, गुह्यं निगूहति, गुणान् प्रकटीकरोति, आपद्गतं न जहाति, काले ददाति च। सन्तः इदम् सन्मित्रलक्षणम् प्रवदन्ति।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| पापात् | अधर्मात्/पापाचरणात् | पापाचरण से | sinful acts |
| निवारयति | निरोधयति/रुणद्धि | रोकता है | dissuades |
| हिताय | कल्याणाय/हितकर्मणे | कल्याणकारी कार्य हेतु | good acts |
| योजयते | प्रवर्तयति | प्रवृत्त करता है | induces |
| गुह्यम् | गोपनीयवृत्तान्तं | गोपनीय बात को | secrets |
| निगूहति | संवृणोति | छिपाता है | conceals |
| गुणान् | मित्रस्य दाक्षिण्यादिगुणान् | गुणों को | merits |
| प्रकटीकरोति | उद्घाटयति | प्रकट करता है | discloses |
| आपद्गतम् | विपत्तिग्रस्तम् | विपत्तिग्रस्त मित्र को | friend in distress |
| न जहाति | न त्यजति | नहीं छोड़ता है | does not leave |
| काले | विपत्तिसमये | विपत्ति के समय | in distress |
| ददाति | (यथाशक्ति धनं) प्रयच्छति | (यथाशक्ति धन) देता है | gives (money) |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| सन्तः | सत्पुरुषाः | श्रेष्टपुरुष | noble persons |
| इदम् | उपर्युक्तं सर्वम् | उपर्युक्त सभी को | all the above |
| सन्मित्रलक्षणम् | श्रेष्टसुहृदःस्वरूपम् | अच्छे मित्र लक्षण | characteristics of good friend |
| प्रवदन्ति | प्रकथयन्ति | कहते हैं | says |

**भावार्थः**

**संस्कृतम्–** सन्मित्रस्य लक्षणं प्रतिपादयन् सत्पुरुषाः कथयन्ति यत् यः पापाचरणात् निवारयति कल्याणकर्मणि प्रवर्तयति, गुप्तवचनं निगूहति, गुणानां ख्यापनं करोति, विपत्तिकाले सङ्गं न त्यजति अपि तु यथाशक्तिः तत्काले ददाति सः एव श्रेष्ठः सुहृत् अस्ति।

**हिन्दी–** अच्छे मित्र का लक्षण सन्त इस प्रकार बताते हैं– जो पापयुक्त आचरण करने से रोकता है, कल्याण कार्यों में लगाता है, गुप्त बातों को छिपाता है, अप्रकट गुणों को भी प्रकट करता है, विपत्ति के समय साथ नहीं छोड़ता है, विपत्ति के समय यथाशक्तिः धन आदि देकर सहायता करता है वही श्रेष्ठ मित्र है।

**आङ्ग्लम्–** The characteristics of a good friend are described by saints in this way - he dissuades (friend) from sinful acts, induces (him) in good acts, conceals the secrets, discloses the hidden merits, does not leaves in distress, helps in the time of need.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

पापान्निवारयति – पापात् + निवारयति (अनुनासिक-सन्धिः)

**(ख) समासः**

आपद्गतम् – आपत्तिं गतः, (द्विती. तत्पु.) तम्

सन्मित्रलक्षणम् – सत् च तत् मित्रम् सन्मित्रम् (कर्मधारयः)
सन्मित्रस्य लक्षणम् सन्मित्रलक्षणम् (षष्ठी तत्पु.)

प्रकटीकरोति – अप्रकटं प्रकटं करोति इति,

www.thearyasamaj.org



(ii) **पर्यायशब्दाः**

पापम् – किल्बिषम्, कल्मषम्, कलुषम्, अघम्, दुरितम्, दुष्कृतम्

कालः – समयः वेला, अनेहाः

(iii) **छन्दः** – वसन्ततिलका-छन्दः

---

## अभ्यासः – 15
## श्लोकः – 65

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

पापान्निवारयति ............................ हिताय
गुह्यं ..................... गुणान् ............................ ।
..................... च ............. .............. ददाति काले
................................... ......................... सन्तः ॥

2. **यथोचितं सन्धिं विसन्धिं वा कुरुत–**

(i) पापात् + निवारयति – ..............................
(ii) गुह्यम् + निगूहति – ..............................
(iiii) सन्मित्रलक्षणमिदम् – ..............................

3. **द्वितीयान्तं पदं नीचैः लिखत–**

..............................................................................

4. **क्रियापदमधो लिखत–**

..............................................................................

..............................................................................

www.thearyasamaj.org



5. चतुर्थ्यन्त-पञ्चम्यन्त-प्रथमान्तपदानि लिखत–

..................................................

..................................................

6. समाधत्त–

(i) पापात् अस्मान् कः निवारयति ?

..................................................

(ii) सन्मित्रं कीदृशान् गुणान् प्रकटीकरोति ?

..................................................

(iii) आपत्तिकाले यः न त्यजति सः कः भवति ?

..................................................

(iv) सन्मित्रस्य लक्षणं भवन्मते किमस्ति ?

..................................................

7. यथोचितं क्रियापदं वाक्ये पूरयत–

| निवारयति, योजयते, निगूहति, प्रकटयति, जहाति, ददाति |
|---|

(i) सः अस्मान् सत्कर्मणे ..................

(ii) मदीयं रहस्यं सुहृत् ..................

(iii) अयं चरितानि तव ..................

(iv) बन्धुः आपत्तिकाले न ..................

(v) सः दुराचरणात् त्वाम् ..................

(vi) अयं कः यः समये किञ्चिद् ..................

www.thearyasamaj.org



8. पदपरिचयं दत्त–

(i) योजयते – ..........
(ii) गुणान् – ..........
(iii) आपद्गतम् – ..........
(iv) प्रवदन्ति – ..........

9. यथोचितं योजयत–

| | | | |
|---|---|---|---|
| (i) | आपद्गतं च न जहाति | (क) | सन्तः प्रवदन्ति |
| (ii) | सन्मित्रलक्षणमिदम् | (ख) | योजयते हिताय |
| (iii) | पापान्निवारयति | (ग) | गुह्यम् निगूहति |
| (iv) | गुणान् प्रकटीकरोति | (घ) | ददाति काले |

10. सन्धत्त–

(i) तस्मात् + नास्ति – ..........
(ii) विपत् + निवारणम् – ..........
(iii) इदम् + प्रवदन्ति – ..........
(iv) सत् + मित्रम् – ..........

11. समस्तपदं लिखत–

(i) अदृढं दृढं करोति – ..........
(ii) अगुणं गुणं सम्पद्यमानं करोति – ..........
(iii) विपत्तिं गतः, तम् – ..........
(iv) शोभनं मित्रं, तस्य लक्षणम् – ..........

12. उत्तरं दत्त–

(i) सन्मित्रलक्षणं के वदन्ति ? – ..........
(ii) सन्मित्रस्य त्रीणि कार्याणि निर्दिशन्तु ? – ..........

www.thearyasamaj.org



(iii) आपद्गतं यः न जहाति सः कः ? – ..................

13. **यथोचितविभक्तिरूपेण वाक्यं पूरयत–**

(i) मित्रम् अस्मान् .................. निवारयति। (दुष्कृत्य)

(ii) साधु पुरुषः .................. एव कथयति। (सद्गुण)

(iii) सः आपणं .................. गच्छति। (पुस्तकक्रयण)

(iv) अयं जनः मम .................. जानाति। (गुह्य)

14. **दा-धातोः रूपाणि पूर्वं पठितानि। अधुना हा-धातोः रूपाणि पठत–**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रपु. | जहाति | जहीतः/जहितः | जहति |
| मपु. | जहासि | जहीथः/जहिथः | जहीथ |
| उपु. | जहामि | जहीवः/जहिवः | जहीमः/जहिमः |

15. (क) **यथोचितेन हा-धातुरूपेण वाक्यं पूरयत–**

(i) त्वं धनं कथं न ..................

(ii) अहम् अधर्मं पूर्णतो ..................

(iii) तौ अत्र द्वे वस्तुनी ..................

(iv) युवाम् सन्मार्गं ..................

(v) वयम् सन्मार्गं न ..................

(vi) तेऽत्र बहूनि द्रव्याणि ..................

(ख) **दा-धातुरूपैः वाक्यं पूरयत–**

(i) राजा ब्राह्मणाय धनं ..................

(ii) वयं मित्राय पुस्तकानि ..................

(iii) यूयं कस्मैचित् जनाय किमपि ..................

(iv) ते बालकाः भिक्षुकेभ्यः रुप्यकाणि ..................

www.thearyasamaj.org



(ग) अधोप्रदत्तपदानां सहाय्येन वाक्यानि रचयत–

[ त्वं, योजयते, पापात्, सत्कार्यम्, सः, तम्, कं, निवारयसि, अयं, ददाति, आपद्गतम्, गुप्तं, धनं, न जहाति, मित्रम्, निगूहति, काले च। ]

(i) ................................................

(ii) ................................................

(iii) ................................................

(iv) ................................................

(घ) विग्रहवाक्यं लिखत–

(i) विशदीकरोति ................................

(ii) दृढीकरोति ................................

(iii) प्रकटीकरोति ................................

(iv) प्रस्तुतीकरोति ................................

16. श्लोकस्य भावार्थं संस्कृतभाषया लिखत–

................................................

................................................

................................................

................................................

................................................

◆◆◆

www.thearyasamaj.org



श्लोकः

**क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः**
**क्षीरे तापमवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः।**
**गन्तुं पावकमुन्मनस्तदभवद् दृष्ट्वा तु मित्रापदं**
**युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥ 64 ॥**

पदच्छेदः

क्षीरेण आत्मगत-उदकाय हि गुणाः दत्ताः पुरा ते अखिलाः
क्षीरे तापम् अवेक्ष्य तेन पयसा स्व-आत्मा कृशानौ हुतः।
गन्तुम् पावकम् उन्मनः तद् अभवद् दृष्ट्वा तु मित्र-आपदम्
युक्तम् तेन जलेन शाम्यति सताम् मैत्री पुनः तु ईदृशी ॥

पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| क्षीरेण | अ. नपुं. तृ. एक. | गन्तुम् | अव्ययम्, तुमुन् प्रत्ययान्तं पदम् |
| आत्मगतोदकाय | अ. नपुं. चतु. एक. समस्तम् | पावकम् | अ. पुं. द्विती. एक. |
| हि | अव्ययम् | उन्मनः | स. नपुं. प्र. एक. वि. समस्तम् |
| गुणाः | अ. पुं. प्र. बहु. विशेष्यम् | | |
| दत्ताः | अ. पुं. प्र. बहु. | तत् | तद्- द. नपुं. प्र. एक. सर्व. विशेष्यम् |
| पुरा | अव्ययम् | | |
| ते | तद्- द. पुं. प्र. बहु. वि., सर्व. | अभवत् | भू- लङ् प्रपु. एक. |
| | | दृष्ट्वा | क्त्वाप्रत्ययान्तं पदम् |
| अखिलाः | अ. पुं. प्र. बहु. वि. | तु | अव्ययम् |
| क्षीरे | अ. नपुं. सप्त. एक. | मित्रापदम् | द. स्त्री. द्विती. एक. समस्तम् |
| तापम् | अ. पुं. द्विती. एक. | युक्तम् | अ. नपुं. प्र. एक. |
| अवेक्ष्य | अव्ययम्, ल्यप् प्रत्ययान्तं पदम् | तेन | तद्- द. नपुं. तृ. एक. सर्व. |
| तेन | तद्- द. नपुं. तृ. एक. वि., सर्व. | जलेन | अ. नपुं. तृ. एक. |
| | | शाम्यति | शम्- लट्, प्रपु. एक. |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| पयसा | पयस्- स. नपुं. तृ. एक. वि. | सताम् | सत्- त. पुं. षष्ठी बहु. |
| | | मैत्री | ई. स्त्री. प्र. एक. |
| स्वात्मा | न. पुं. प्र. एक. | पुनः | अव्ययम् |
| कृशानौ | उ. पुं. सप्त. एक. | तु | अव्ययम् |
| हुतः | अ. पुं. प्र. एक. | ईदृशी | ई. स्त्री. प्र. एक. |

## आकाङ्क्षा

**दत्ताः ।**

के दत्ताः ? — ते अखिलाः गुणाः दत्ताः ।
केन ते अखिलाः गुणाः दत्ताः ? — क्षीरेण ते अखिलाः गुणाः दत्ताः ।
कस्मै अखिलाः गुणाः दत्ताः ? — आत्मगतोदकाय हि अखिलाः गुणाः दत्ताः ।
कदा अखिलाः गुणाः दत्ताः ? — पुरा अखिलाः गुणाः दत्ताः ।

**हुतः ।**

कः हुतः ? — स्वात्मा हुतः ।
केन स्वात्मा हुतः ? — तेन पयसा स्वात्मा हुतः ।
किम् अवेक्ष्य तेन स्वात्मा हुतः ? — क्षीरे तापम् अवेक्ष्य तेन स्वात्मा हुतः ।
कस्मिन् स्वात्मा हुतः ? — कृशानौ स्वात्मा हुतः ।

**अभवत् ।**

किम् अभवत् ? — तत् क्षीरम् अभवत् ।
तत् किम् अभवत् ? — तत् तु उन्मनः अभवत् ।
किं कर्तुम् उन्मनः अभवत् ? — पावकं गन्तुम् उन्मनः अभवत् ।
किं दृष्टवा पावकं गन्तुम् उन्मनः अभवत् ? — मित्रापदं दृष्ट्वा पावकं गन्तुम् उन्मनः अभवत् ।

**शाम्यति ।**

पुनः किं शाम्यति ? — पुनः (क्षीरम्) शाम्यति ।
किं सत् क्षीरं शाम्यति ? — युक्तं सत् क्षीरं शाम्यति ।
केन युक्तं सत् क्षीरं शाम्यति ? — तेन जलेन युक्तं सत् क्षीरं शाम्यति ।

www.thearyasamaj.org



## अन्वयः

क्षीरेण आत्मगतोदकाय हि पुरा ते अखिलाः गुणाः दत्ताः, क्षीरे तापम् अवेक्ष्य तेन पयसा कृशानौ स्वात्मा हुतः। तत् तु मित्रापदं दृष्ट्वा पावकं गन्तुम् उन्मनः अभवत्, तेन जलेन युक्तं पुनः (तद्) शाम्यति। सतां मैत्री तु ईदृशी (भवति)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| क्षीरेण | दुग्धेन | दुग्ध के द्वारा | by milk |
| आत्मगतोदकाय | स्वस्मिन् मिलिताय जलाय | अपने में मिले हुए जल के लिए | mingled in it for water |
| हि | निश्चयेन | निश्चित | certainly |
| पुरा | प्राक् प्रसिद्धाः | पूर्व समय में | previously |
| ते | ते (स्वप्रसिद्धाः) | वे (अपने प्रसिद्ध) | those (well-known) |
| अखिलाः | समग्राः | सम्पूर्ण | whole |
| गुणाः | संस्काराः | गुण | qualities |
| दत्ताः | समर्पिताः | दे दिये गये | shared |
| क्षीरे | पयसि | दुग्ध में | in milk |
| तापम् | उत्तापम् | उफान / ताप को | heat |
| अवेक्ष्य | वीक्ष्य | देखकर | on seeing |
| तेन | अमुना | उसने | that |
| पयसा | (दुग्धमिश्रितेन) जलेन | (दुग्ध मिश्रित) जल के द्वारा | by (mingled) water |
| कृशानौ | अग्नौ | अग्नि में | in fire |
| स्वात्मा | स्वस्वरूपम् | अपना स्वरूप | self form |
| हुतः | ज्वालितः | हवन कर दिया गया | burnt/sacrificed |
| तत् तु | दुग्धन्तु | और दूध ने | and milk |
| मित्रापदं दृष्ट्वा | मित्रस्य जलस्य कष्टं | अपने मित्र जल के | seeing distress |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| | संवीक्ष्य | कष्ट को देखकर | of his friend water |
| पावकम् | अग्निम् | अग्नि में | in fire |
| गन्तुम् | प्रवेष्टुम्/यातुम् | प्रवेश करने को | for entering |
| उन्मनः | उद्यतान्तःकरणः | उद्यत मन वाला | anxious |
| अभवत् | अभूत् | हो गया | became |
| (किन्तु, पुनः) | (किन्तु, पुनः) | (किन्तु, फिर) | (but, again) |
| तेन जलेन | अमुना वारिणा | उस जल से | by that water |
| युक्तम् (भूत्वा) | मिश्रितं (भूत्वा) | मिलकर | mixed |
| तद् | दुग्धम् | दूध | milk |
| शाम्यति | शान्तं भवति | शान्त हो जाता है | tranquilizes |
| सताम् | सज्जनानाम् | सज्जनों की | of good persons |
| मैत्री तु | मित्रता तु | मित्रता तो | friendship |
| ईदृशी | एतादृशी पूर्वोक्ता इव | इस (पूर्वोक्त) प्रकार की | such (as above) |
| (भवति) | (जायते) | (होती है) | (is) |

**भावार्थः**

**संस्कृतम्–** दुग्धं स्वस्मिन् मिश्रिताय जलाय पूर्वं स्वस्य अखिलान् रूपादिगुणान् समार्पयत्। जलं तु दुग्धे तापं (अग्निजन्यं सन्तापं) दृष्ट्वा स्वात्मानं वह्नौ हुतवान्। किन्तु दुग्धं मित्रस्य जलस्य अग्नौ दाहरूपां विपत्तिं दृष्ट्वा स्वयं पावके प्रवेष्टुमुद्यतमऽभूत्। पुनः तेनैव जलेन युक्तं सत् दुग्धं शान्तं भवति। वस्तुतः सतां मैत्री पयोजलवत् एव भवति।

**हिन्दी–** दूध ने अपने में मिले हुए जल को पहले ही अपने समस्त (रूप-माधुर्यादि) गुण दे दिये। उसके पश्चात् दूध में उफान रूपी सन्ताप को देखकर जल ने अपने को अग्नि में हवन कर दिया। अपने मित्र जल की विपत्ति (अग्नि में आहुति) को देखकर दूध अग्नि में प्रवेश के लिए उद्यत हो गया, किन्तु फिर जल से मिलकर शान्त हो जाता है। सज्जनों की मित्रता भी दूध और जल जैसी ही होती है।

**आङ्ग्लम्–** Milk shared all its qualities to water mixed with it. On seeing distress (burning) of milk, water sacrificed itself into the fire. Seeing the distress of its friend (water), milk became anxious to enter into the fire. But it becomes tranquilized when

www.thearyasamaj.org



again united with water. The friendship of good persons is of this type (like milk & water).

## निर्दशनम्

### (i) व्याकरणम्

**(क) सन्धिः**

क्षीरेणात्मगतोदकाय – क्षीरेण + आत्मगत + उदकाय
(स.दी.सन्धिः) (गुण-सन्धिः)

तेऽखिलाः – ते + अखिलाः (पूर्वरूपसन्धिः)

मित्रापदम् – मित्र + आपदम् (स.दी.सन्धिः)

पुनस्त्वीदृशी – पुनः + तु + ईदृशी
(विसर्गसन्धिः)(यण्-सन्धिः)

**(ख) समासः**

आत्मगतोदकाय – आत्मानं गतम् - आत्मगतम् (द्विती. तत्पु.)
आत्मगतम् उदकं यस्य, (बहुव्रीहिः) तस्मै

स्वात्मा – स्वस्य आत्मा (षष्ठी तत्पु.)

उन्मनः – उद्गतं मनः यस्य तत् (बहुव्रीहिः)

मित्रापदम् – मित्रस्य आपत्, (षष्ठी तत्पु.) तम्

**(ग) प्रत्ययः**

दत्ताः – दा + क्त-प्रत्ययः

अवेक्ष्य – अव√ईक्ष् + क्त्वास्थाने ल्यप्
यथा– निर√ईक्ष् + क्त्वास्थाने ल्यप् = निरीक्ष्य

हुतः – हु + क्तः कर्मवाच्ये (प्र. एक.)

गन्तुम् – गम् + तुमुन्-प्रत्ययः

www.thearyasamaj.org



| | | |
|---|---|---|
| अभवत् | – | भू- धातुः, लङ्लकारः, भूते। कर्तृवाच्ये। (प्रपु. एक.) |
| दृष्ट्वा | – | दृश् + क्त्वा = दृष्ट्वा |
| शाम्यति | – | शम्- धातुः, लट्लकारः (प्रपु. एक.) दिवादिगणः श्यन्विकरणम् |
| युक्तम् | – | युज् + क्तः |
| ईदृशी | – | इदम् पूर्वकात् दृश्धातोः कञ् + ङीप् यथा– तादृशी, एतादृशी, यादृशी |

(ii) **पर्यायशब्दाः**

| | | |
|---|---|---|
| क्षीरम् | – | दुग्धम्, पयः |
| कृशानु | – | अग्निः, वह्निः, वैश्वानरः, पावकः |

(iii) **छन्दः** → शार्दूलविक्रीडितम्

(iv) **अलङ्कारः** → नीरक्षीरयोः परस्परं सन्तापवर्णनात् उत्प्रेक्षा-नामकः अलङ्कारः।

(v) **निर्देशः** क्तप्रत्ययः कर्मवाच्ये भूते प्रयुज्यते। कर्मवाच्ये अनुक्तकर्तुः तृतीया, उक्ते कर्मणि प्रथमा भवति। यथा– कर्तरि - रामः ग्रामं गतवान्।
कर्मणि - रामेण ग्रामः गतः।
कर्तरि - अहं पुस्तकं पठितवान्।
कर्मणि - मया पुस्तकं पठितम्।

---

## अभ्यासः – 14
## श्लोकः – 64

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

क्षीरेणात्मगतोदकाय हि ........ दत्ताः ................ ................

................ ................ तेन ................ ................ हुतः।

www.thearyasamaj.org



गन्तुं ........................................ दृष्ट्वा तु ..............................
युक्तं .............. जलेन .............. .............. .............. .............. ॥

2. यथोचितं सन्धिं विसन्धिं वा कुरुत–

(i) क्षीरेण + आत्मगत + उदकाय – ..............................
(ii) तापम् + अवेक्ष्य – ..............................
(iii) पावकमुन्मनस्तदभवद् – ..............................
(iv) पुनस्त्वीदृशी – ..............................

3. प्रथमान्तपदानि सङ्कलय्य लिखत–

.............. .............. .............. .............. ..............
.............. .............. .............. .............. ..............

4. द्वितीयान्तपदानि लिखत–

.............. .............. ..............

5. तृतीयान्तं चतुर्थ्यन्तं च पदं नीचैः लिखत–

(i) तृतीयान्तम् – .............. .............. .............. .............. ..............
(ii) चतुर्थ्यन्तम् – .............. .............. .............. .............. ..............

6. कृदन्तपदानि नीचैः लिखत–

.............. .............. ..............
.............. .............. ..............

7. तिङन्तक्रियापदं लिखत–

.............. ..............

www.thearyasamaj.org



8. उत्तरं लिखत–

(i) क्षीरेण पुरा स्वकीया अखिलाः गुणाः कस्मै प्रदत्ताः ?

..................................................

(ii) क्षीरे तापमवेक्ष्य जलेन किं कृतम् ?

..................................................

(iii) किं दृष्ट्वा पयः पावकं गन्तुमुन्मनः अभवत् ?

..................................................

(iv) सतां मैत्री कीदृशी भवति ?

..................................................

9. पदपरिचयं दत्त–

(i) दत्ताः – ..............................

(ii) अवेक्ष्य – ..............................

(iii) स्वात्मा – ..............................

(iv) गन्तुम् – ..............................

(v) दृष्ट्वा – ..............................

10. यथोचितक्रियापदेन वाक्यं पूरयत–

| हुतवान्, दत्तानि, अभवत्, शाम्यति |
|---|

(i) तैः श्यामाय पुस्तकानि ..............................

(ii) तस्य मनः दुःखितम् ..............................

(iii) जलेन वह्निः ..............................

(iv) सः आत्मानं कृशानौ ..............................

www.thearyasamaj.org



11. प्रत्ययं संयोज्य निष्पन्नं रूपं लिखत–

| | | | | | |
|---|---|---|---|---|---|
| (i) | उप✓विश् | + | ल्यप् | – | .................. |
| (ii) | प्र✓ईक्ष् | + | ल्यप् | – | .................. |
| (iii) | सम्✓स्मृ | + | ल्यप् | – | .................. |
| (iv) | रम् | + | तुमुन् | – | .................. |
| (v) | दृश् | + | क्त्वा | – | .................. |
| (vi) | हन् | + | तुमुन् | – | .................. |
| (vii) | दृश् | + | तुमुन् | – | .................. |
| (viii) | भू | + | तुमुन् | – | .................. |

12. यथोचितक्रियापदेन वाक्यं पूरयत–

| | | |
|---|---|---|
| (i) | सा बलिका .................. | (नृत्) लटि |
| (ii) | व्ययेन धनं .................. | (नश्) लटि |
| (iii) | श्रमिकाः अधुना .................. | (वि✓श्रम्) लटि |
| (iv) | तव कार्यम् .................. | (भू) लङि |
| (v) | सः फलम् .................. | (खाद्) लङि |

13. प्रश्नानामुत्तराणि लिखत–

(i) पयः किम् अवेक्ष्य कृशानौ स्वात्मानं हुतवान् ?

..............................................................................

(ii) कस्य आपदं दृष्ट्वा क्षीरं पावकं गन्तुम् उन्मनः अभवत् ?

..............................................................................

(iii) कः स्वकीयगुणान् सर्वान् कस्मै अयच्छत् ?

..............................................................................

(iv) सतां मैत्री कीदृशी भवति ?

..............................................................................

www.thearyasamaj.org



**14. यथोचितं योजयत–**

| | | | |
|---|---|---|---|
| (i) | क्षीरेण उदकाय | (क) | मित्रापदं दृष्ट्वा |
| (ii) | पावकं गन्तुमुन्मनः अभवत् | (ख) | आत्मगुणाः दत्ताः |
| (iii) | पयसा स्वात्मा कृशानौ हुतः | (ग) | पुनः शाम्यति |
| (iv) | जलेन युक्तं दुग्धं | (घ) | क्षीरे तापमेवक्ष्य |

**15. क्त्वा-ल्यप्-तुमुन्-प्रत्ययान्तेन शब्देन वाक्यं पूरयत–**

(i) सा बालिका कक्षायाम्.................................. पठति। (उत् ✓ स्था + ल्यप्)

(ii) ब्रह्मचारी सूर्यं .................................. तं नमति। (दृश् + क्त्वा)

(iii) देवं .................................. सः मन्दिरं गच्छति। (दृश् + तुम्)

(iv) निरीक्षकः छात्रान् .................................. अवोचत्। (निर् ✓ ईक्ष + ल्यप्)

(v) पाठं सम्यक् .................................. आगच्छतु। (स्मृ + त्वा)

(vi) सः वर्षर्तौ .................................. गच्छति। (वि✓हृ + तुमुन्)

**16. नीचैः लिखितानि वाक्यानि कर्मणि-रूपे परिवर्तयत–**

(i) त्वं चित्रं दृष्टवान् – ..................................

(ii) पयः स्वात्मानं वह्नौ हुतवान् – ..................................

(iii) रामः मह्यं पुस्तकानि दत्तवान् – ..................................

(iv) मोहनः सर्वान् गुणान् धृतवान् – ..................................

**17. मञ्जूषातः यथोचितं क्रियापदं स्वीकृत्य वाक्यं पूरयत–**

| प्रासादयम्, शाम्यति, नश्यति, अनृत्यत्, अभवत् |
|---|

(i) लता ग्रामं गन्तुम् उद्यता ..................................

(ii) सभागृहे नर्तकी सम्यक् ..................................

(iii) दानेन विना धनं स्वतो ..................................

(iv) क्रोधः क्रोधेन न अपि तु शान्त्या ..................................

www.thearyasamaj.org



(v) अहं क्रुद्धं जनं मधुरभाषणेन ..............................

**18. यथोचितं समस्तपदं विग्रहवाक्यं वा लिखत–**

(i) निजस्य आत्मा – ..............................

(ii) दिव्यस्य कूपस्य उदकम् – ..............................

(iii) उद्युक्तं मनः यस्य, तत् – ..............................

(iv) आत्मगतोदकम् – ..............................

(v) मित्रापदम् – ..............................

(vi) सन्मित्रलक्षणम् – ..............................

**19. अधोलिखितधातूनां लङि निर्दिष्टपुरुषेषु रूपाणि लिखत–**

(i) **भू** – **प्रपु.** .............. .............. ..............

**मपु.** .............. .............. ..............

**उपु.** .............. .............. ..............

(ii) **नृत्** – **उपु.** .............. .............. ..............

(iii) **नश्** – **मपु.** .............. .............. ..............

**20. शम्-धातोः लटि रूपाणि स्मरत–**

| | | | |
|---|---|---|---|
| **प्रपु.** | शाम्यति | शाम्यतः | शाम्यन्ति |
| **मपु.** | शाम्यसि | शाम्यथः | शाम्यथ |
| **उपु.** | शाम्यामि | शाम्यावः | शाम्यामः |

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**इतः स्वपिति केशवः कुलमितस्तदीयद्विषाम्**
**इतश्च शरणार्थिनां शिखरिणां गणाः शेरते।**
**इतोऽपि वडवानलः सह समस्तसंवर्तकै-**
**रहो विततमूर्जितं भरसहञ्च सिन्धोर्वपुः॥ 65॥**

**पदच्छेदः**

इतः स्वपिति केशवः कुलम् इतः तदीय-द्विषाम्
इतः च शरण-अर्थिनाम् शिखरिणाम् गणाः शेरते।
इतः अपि वडवानलः सह समस्त-संवर्तकैः
अहो विततम् ऊर्जितं भरसहं च सिन्धोः वपुः॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| इतः | तसिल्प्रत्ययान्तम् अव्ययम् | अपि | अव्ययम् |
| स्वपिति | स्वप् + लट्, प्रपु. एक. | वडवानलः | अ. पुं. प्र. एक. |
| केशवः | अ. पुं. प्र. एक. | सह | अव्ययम् |
| कुलम् | अ. नपुं. प्र. एक. | समस्तसंवर्तकैः | अ. पुं. तृ. बहु. समस्तम् |
| इतः | तसिल्प्रत्ययान्तमव्ययम् | अहो | अव्ययम् |
| तदीयद्विषाम् | षष्ठी पुं. षष्ठी बहु. समस्तम् | विततम् | अ. नपुं. प्र. एक. कृदन्त-वि. |
| इतः | तसिलन्तमव्ययम् | | |
| च | अव्ययम् | ऊर्जितम् | अ. नपुं. प्र. एक. कृदन्तवि. |
| शरणार्थिनाम् | न. पुं. षष्ठी बहु. वि. समस्तम् | भरसहम् | अ. नपुं. प्र. एक. वि. समस्तम् |
| शिखरिणाम् | न. पुं. षष्ठी बहु. | | |
| गणाः | अ. पुं. प्र. बहु. | च | अव्ययम् |
| शेरते | शीङ् + कर्मणि लट्, प्रपु. बहु. | सिन्धोः | उ. पुं. षष्ठी एक. |
| इतः | तसिलन्तमव्ययम् | वपुः | षष्ठी नपुं. प्र. एक. विशेष्यम् |

www.thearyasamaj.org



## आकाङ्क्षा

**(अस्ति)।**

| | |
|---|---|
| किम् (अस्ति) ? | वपुः अस्ति। |
| कस्य वपुः अस्ति ? | सिन्धोः वपुः अस्ति। |
| सिन्धोः वपुः कीदृशम् अस्ति ? | सिन्धोः वपुः विततम् ऊर्जितं, भरसहम् च अस्ति। |
| तत् कथं ? | (अत्र सिन्धोः वपुषि) इतः केशवः स्वपिति, इतः तदीयद्विषां कुलं स्वपिति, इतः च शरणार्थिनां शिखरिणां गणाः शेरते। इतः अपि समस्तसंवर्तकैः सह वडवानलः (स्वपिति)। (एवं प्रकारेण) अहो! सिन्धोः वपुः विततम् ऊर्जितं भरसहं (अस्ति)। |

## अन्वयः

इतः केशवः स्वपिति, इतः तदीयद्विषां कुलम् (स्वपिति), इतः च शरणार्थिनाम् शिखरिणाम् गणाः शेरते। इतः अपि समस्तसंवर्तकैः सह वडवानलः (स्वपिति), अहो! सिन्धोः वपुः (कीदृशम्) विततम्, ऊर्जितं, भरसहं च (अस्ति)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| इतः | अस्मिन् स्थाने | इस स्थान पर | at this place |
| केशवः | विष्णुः | केशव | Lord *Viṣṇu* |
| स्वपिति | शेते | सो रहे हैं | is sleeping |
| इतः | अस्मिन् स्थाने | इस स्थान पर | at this place |
| तदीयद्विषाम् | तेषां विष्णुशत्रूणाम् (रक्षसां) | उनके शत्रुओं (दैत्यों) का | of his enemies |
| कुलम् | समूहः | समूह | group |
| (स्वपिति) | शेते | सोता है | sleeps |
| इतः च | अथ अस्मिन् भागे | और इस भाग में | and in this part |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| शरणार्थिनाम् | शरणागतानाम् | शरण चाहने वाले | desiring shelter |
| शिखरिणाम् | पर्वतानाम् | पर्वतों के | of mountains |
| गणाः | समूहाः | समूह | groups |
| शेरते | स्वपन्ति | सो रहे हैं | are sleeping |
| इतोऽपि | अस्मादपि अन्यदेशे | और इससे भी भिन्न स्थान पर | at different place |
| समस्तसंवर्तकैः | समग्रप्रलयकालिक-संवर्तकनाममेघैः | प्रलयकालीन संवतर्क नामक मेघों के | disastrous clouds named *samvartaka* |
| सह | साकम् | साथ | with |
| वडवानलः | सागराग्निः | समुद्र में रहने वाली अग्नि | fire dwelling in sea |
| (स्वपिति) | (शेते) | (सो रही है) | is sleeping |
| अहो | आश्चर्यम् | आश्चर्य है | wonder |
| सिन्धोः | सागरस्य | सागर का | of sea |
| वपुः | शरीरम् | शरीर | body |
| (कीदृशम्) | (कथमिव) | (कैसा) | (how) |
| विततम् | विस्तृतं (केशवस्य आधारतया) | विस्तृत (केशव के आधार स्वरूप) | extensive |
| ऊर्जितम् | बलशालि | बलशाली | powerful |
| च भरसहम् | अथ (पर्वतानां) भारोद्वहनसमर्थम् | और (पर्वतों का) भारसहन करने की क्षमता वाला | and able to bear the load (of mountains) |
| (अस्ति) | (विद्यते) | (है) | (is) |

**भावार्थः**

**संस्कृतम्–** सत्पुरुषाः सागरवत् विशालहृदयाः भवन्ति। पश्यतु सागरस्य अस्मिन् स्थाने विष्णुः (योगमायादशायां) स्वपिति, अस्मिन् भागे च विष्णोः शत्रवः असुराः स्वपन्ति, ततोऽप्यस्मिन् भागे शरणम् इच्छतां पर्वतानां समूहाः स्वपन्ति, ततोऽपरे भागे समग्रप्रलयकालिकसंवर्तकनामभिः मेघैः साकं वडवानलोऽप्यस्ति। अहो सागरस्य शरीरं कीदृशं विस्तृतं, बलशालि, भारक्षमं चास्ति।

www.thearyasamaj.org



**हिन्दी–** इस स्थान पर भगवान् विष्णु सो रहे हैं और दूसरी ओर उनके शत्रुओं का समूह सो रहा है। इधर एक तरफ शरण में आये हुए पर्वतों के गण सो रहे हैं, तो इधर उसके दूसरी ओर सम्पूर्ण संवर्तक मेघों के साथ सागर की आग वडवानल भी सो रहा है। अहो-आश्चर्य है, सागर का शरीर कितना बड़ा, बलशाली और भारसहन करने की क्षमता वाला है।

**आङ्ग्लम्–** In one corner of sea Lord *Viṣṇu* sleeps, in other part his enemies reside, in another side are many mountains desiring shelter and in other corner *Vadavāgni* there dwells (submarine fire) along with destructive clouds namely *samvartaka*. Oh! how extensive, powerful and forbearing the load is the body of sea.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

| | | |
|---|---|---|
| इतस्तदीयद्विषाम् | – | इतः + तदीयद्विषाम् (विसर्ग-सन्धिः) |
| इतश्च | – | इतस् + च (श्चुत्व-सन्धिः) |
| इतोऽपि | – | इतस् + अपि – (रुत्वम्, उत्वम्, गुणः, पूर्वरूपम्) |

#### (ख) समासः

| | | |
|---|---|---|
| शरणार्थिनाम् | – | शरणम् अर्थयन्ते तच्छीलाः (उपपदसमासः) |
| तदीयद्विषाम् | – | तस्य इमे तदीयाः, तदीयान् द्विषन्ति तच्छीलाः, तदीयद्विषः (उपपदसमासः) तेषाम् |
| समस्तसंवर्तकैः | – | समस्ताश्च ते संवर्तकाः (कर्मधारयः) तैः |

### (ii) पर्यायशब्दाः

| | | |
|---|---|---|
| केशवः | – | दामोदरः, हृषीकेशः, माधवः, विष्णुः, नारायणः |
| शिखरी | – | पर्वतः, क्ष्माभृत्, महीधरः |
| संवर्तः | – | प्रलयः, कल्पः, क्षयः, कल्पान्तः |
| द्विट् | – | शत्रुः, विपक्षः, अमित्रम् |

### (iii) छन्दः – पृथिवीछन्दः

www.thearyasamaj.org



लक्षणम् – जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।

(iv) अलङ्कारः – प्रस्तुतसमुद्रवर्णनेन अप्रस्तुतस्य महाजनस्य वर्णनाद् अप्रस्तुतप्रशंसानामकः अलङ्कारः अस्ति ।

**अवधेयम्**

स्वप्-धातोः लट्-रूपाणि –

| | | | |
|---|---|---|---|
| प्रपु. | स्वपिति | स्वपितः | स्वपन्ति |
| मपु. | स्वपिषि | स्वपिथः | स्वपिथ |
| उपु. | स्वपिमि | स्वपिवः | स्वपिमः |

शीङ्-धातोः लट्-रूपाणि–

| | | | |
|---|---|---|---|
| प्रपु. | शेते | शयाते | शेरते |
| मपु. | शेषे | शयाथे | शेध्वे |
| उपु. | शये | शेवहे | शेमहे |

शेरते– शीङ्-धातोः स्वप्नार्थे, लट्, प्रपु. बहुवचनम् ।

---

**अभ्यासः – 15**
**श्लोकः – 65**

1. श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–

इतः स्वपिति .................. ..................

.................. .................. शिखरिणां .................. .................. ।

इतोऽपि .................. .................. ..................संवर्तकैः

.................. .................. .................. सिन्धोर्वपुः ॥

www.thearyasamaj.org



2. **सन्धिं विसन्धिं वा कुरुत–**

(i) कुलमितस्तदीयद्विषाम् – ..............................

(ii) शरणार्थिनाम् – ..............................

(iii) विततम् ऊर्जितम् – ..............................

(iv) सिन्धोः वपुः – ..............................

(v) इतः अपि – ..............................

3. **श्लोके प्रयुक्तानि अव्ययपदानि एकत्र लिखत–**

.............. .............. .............. ..............

.............. .............. .............. ..............

4. **वपुः इति विशेष्यम् तस्य त्रीणि विशेषणानि सन्ति, नीचैः लिखत–**

(i) ..............................

(ii) .............................. → वपुः

(iii) ..............................

5. **प्रथमान्तपदानि सङ्कलय्य अधोलिखत–**

.............. .............. .............. ..............

.............. .............. .............. ..............

6. **क्रियापदे लेख्ये-तयोः पुरुषवचने चापि लेख्ये–**

.............. .............. ..............

.............. .............. ..............

7. **समाधानं लिखत–**

(i) **केशवः कुत्र स्वपिति ?**

..............................................................

www.thearyasamaj.org



(ii) विष्णुशत्रवः कुत्र शेरते ?

.......................................................................................

(iii) संवर्तकमेघैः सह वडवानलः कुत्र वसति ?

.......................................................................................

(iv) सिन्धोः वपुः कीदृशं वर्णितमत्र ?

.......................................................................................

(v) कविः समुद्रवपुषः वर्णनेन सह केषां वर्णनं करोति ?

.......................................................................................

8. कोष्ठस्थशब्दैः रिक्तस्थलं पूरयत –

| विशालम्, शेरते, स्वपिति, विद्यन्ते, शाम्यति |
|---|

(i) सागरे विभिन्नाः जीवाः .................................... ।

(ii) तत्र वडवानलोऽपि .................................... ।

(iii) वडवानलः समुद्रजलैरेव .................................... ।

(iv) शिखरिणां गणाः तत्रैव .................................... ।

(v) महतां हृदयं कीदृशं .................................... भवति ।

9. पदपरिचयं दत्त–

(i) इतः – .......................................................................................

(ii) स्वपिति – .......................................................................................

(iii) शिखरिणाम् – .......................................................................................

(iv) शेरते – .......................................................................................

www.thearyasamaj.org



**10. सन्धिं विसन्धिं वा कुरुत–**

(i) ततः + तदीयद्विषः + वसन्ति – ..............................

(ii) इतः + ततः अमी भ्रमन्ति – ..............................

(iii) शरणार्थिनः – ..............................

(iv) विद्यार्थिनः – ..............................

**11. उत्तराणि लिखत–**

(i) **समुद्रमहापुरुषयोः साम्यं किमस्ति ?**

..............................

(ii) **वडवानलः कैः साकं वसति ?**

..............................

(iii) **शरणार्थिनः शिखरिणः कुत्र वसन्ति ?**

..............................

**12. यथोचित-धातुरूपेण वाक्यं पूरयत–**

| **शये, स्वपितः, शेरते, स्वपन्ति, शयाथे, स्वपिति** |
|---|

(i) त्वं कस्मिन् स्थाने .............................. ?

(ii) शैलाः शरणार्थिनः सागरे ..............................

(iii) अहं गंगायाः तटे ..............................

(iv) तौ छात्रौ कुत्र .............................. ?

(v) ते हिमालये .............................. ?

(vi) युवां कथं शिलापट्टे .............................. ?

**13. विग्रहवाक्यं प्रदर्शयत–**

(i) मुरद्विषः – ..............................

www.thearyasamaj.org



(ii) शिवद्रोहिणः – ..........

(iii) विद्यार्थिनः – ..........

(iv) शिखरिणाम् – ..........

(v) समस्तसंवर्तकैः – ..........

14. 'इदं' शब्दस्य तसिल् प्रत्यययोजनेन 'इतः' इति सिद्ध्यति। एवमेव यत्, तत्, सर्व, किम्, इत्येभ्यः तसिल्-प्रत्ययं संयोज्य रूपाणि लिखत–

(i) इदं – इतः

(ii) यत् – .......... (iii) सर्व – ..........

(iv) तत् – .......... (v) किं – ..........

15. उदाहरणानुसारेण रिक्तस्थानं पूरयत–

यथा– (i) विततम् – वि√तन् + क्त

(ii) संहतम् – ..........

(iii) विरतम् – ..........

(iv) सङ्गतम् – ..........

(v) नियतम् – ..........

◆◆◆

www.thearyasamaj.org



श्लोकः

तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनम्।
मान्यान् मानय विद्विषोऽप्यनुनय प्रख्यापय प्रश्रयं
कीर्तिं पालय दुःखिते कुरु दयामेतत् सतां चेष्टितम् ॥ 66 ॥

पदच्छेदः

तृष्णाम् छिन्धि भज क्षमाम् जहि मदम् पापे रतिम् मा कृथाः
सत्यम् ब्रूहि अनुयाहि साधु-पदवीम् सेवस्व विद्वत् जनम्।
मान्यान् मानय विद्विषः अपि अनुनय प्रख्यापय प्रश्रयम्
कीर्तिम् पालय दुःखिते कुरु दयाम् एतत् सताम् चेष्टितम् ॥

पदपचियः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| तृष्णाम् | आ. स्त्री. द्विती. एक. | विद्वज्जनम् | अ. पुं. द्विती. एक. समस्तम् |
| छिन्धि | छिद्- लोट्, मपु. एक. | मान्यान् | अ. पुं. द्विती. बहु. |
| भज | भज्- लोट्, मपु. एक. | मानय | मान्- लोट्, मपु. एक. |
| क्षमाम् | आ. स्त्री. द्विती. एक. | विद्विषः | ष. पुं. द्विती. बहु. |
| जहि | हन्- लोट्, मपु. एक. | अपि | अव्ययम् |
| मदम् | अ. पुं. द्विती. एक. | अनुनय | अनु✓नी- लोट्, मपु. एक. |
| पापे | अ. नपुं. सप्त. एक. | प्रख्यापय | प्र✓ख्या- णिच् + लोट्, मपु. एक. |
| रतिम् | इ. स्त्री. द्विती. एक. | प्रश्रयम् | अ. पुं. द्विती. एक. |
| मा | अव्ययम् | कीर्तिम् | इ. स्त्री. द्विती. एक. |
| कृथाः | कृ- लुङ्, मपु. एक. | पालय | पाल्- लोट्, मपु. एक. |
| सत्यम् | अ. नपुं. द्विती. एक. | दुःखिते | अ. पुं. सप्त. एक. |
| ब्रूहि | ब्रू- लोट्, मपु. एक. | कुरु | कृ- लोट्, मपु. एक. |
| अनुयाहि | अनु✓या- लोट्, मपु. एक. | दयाम् | आ. स्त्री. द्विती. एक. |
| साधुपदवीम् | ई. स्त्री. द्विती. एक. समस्तम् | एतत् | एतद्- द. नपुं. प्र. एक. सर्व. |
| सेवस्व | सेव्- लोट् (आत्मनेपदम्) मपु. एक. | सताम् | सत्- त. पुं. षष्ठी बहु. |
| | | चेष्टितम् | अ. नपुं. प्र. एक. |

www.thearyasamaj.org



## आकाङ्क्षा

**(हे मानव !) छिन्धि ।**

| | |
|---|---|
| किं छिन्धि ? | तृष्णां छिन्धि । |
| भज । किं भज ? | क्षमां भज । |
| जहि । किं जहि ? | मदं जहि । |

**मा कृथाः ।**

| | |
|---|---|
| कां मा कृथाः ? | पापे रतिं मा कृथाः । |
| **ब्रूहि** । किं ब्रूहि ? | सत्यं ब्रूहि । |
| **अनुयाहि** । किम् अनुयाहि ? | साधुपदवीम् अनुयाहि । |
| **सेवस्व** । कं सेवस्व ? | विद्वज्जनं सेवस्व । |
| **मानय** । कान् मानय ? | मान्यान् मानय । |
| **अनुनय** । कान् अपि अनुनय ? | विद्विषः अपि अनुनय । |
| **प्रख्यापय** । किं प्रख्यापय ? | प्रश्रयं प्रख्यापय । |
| **पालय** । कां पालय ? | कीर्तिं पालय । |
| **कुरु** । किं कुरु ? | दुःखिते दयां कुरु । |

**(अस्ति) ।**

| | |
|---|---|
| किम् अस्ति ? | एतत् (सर्वं पूर्वोक्तं गुणजातं) चेष्टितम् अस्ति । |
| एतत् (सर्वं पूर्वोक्तं गुणजातं) केषां चेष्टितम् अस्ति ? | एतत् (सर्वं पूर्वोक्तं गुणजातं सतां चेष्टितम् अस्ति । |

## अन्वयः

(हे मानव !) तृष्णां छिन्धि, क्षमां भज, मदं जहि, पापे रतिं मा कृथाः, सत्यं ब्रूहि, साधुपदवीम् अनुयाहि, विद्वज्जनं सेवस्व, मान्यान् मानय, विद्विषः अपि अनुनय, प्रश्रयं प्रख्यापय, कीर्तिं पालय, दुःखिते दयां कुरु, एतत् (सर्वं) सतां चेष्टितम् (अस्ति) ।

www.thearyasamaj.org



पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| (हे मानव !) | (हे नर !) | (हे मानव !) | (O man !) |
| तृष्णाम् | तृषाम् | तृष्णा को | greed |
| छिन्धि | विदारय | काटो | cut down |
| क्षमां | क्षान्तिं | क्षमा को | forgiveness |
| भज | सेवस्व | धारण करो | maintain, bear |
| मदम् | गर्वम् | गर्व को | proud |
| जहि | नाशय | नष्ट करो | destroy |
| पापे | पापाचरणे | पापाचरण में | in sinful act |
| रतिम् | स्नेहम् | स्नेह | love |
| मा | नहि | नहीं | not |
| कृथाः | कार्षीः | करो | do |
| सत्यम् | ऋतम् | सत्य | truth |
| ब्रूहि | वद | बोलो | speak |
| साधुपदवीम् | सज्जनपथम् | सज्जनों के मार्ग का | path of good persons |
| अनुयाहि | अनुसर | अनुसरण करो | follow |
| विद्वज्जनम् | पण्डितजनम् | विद्वान् लोगों की | scholars |
| सेवस्व | भजस्व | सेवा करो | serve |
| मान्यान् | माननीयान् | सम्मान्य जनों का | respectables |
| मानय | सम्मानय | सम्मान करो | respect |
| विद्विषः अपि | शत्रून् अपि | शत्रुओं को भी | even the enemies |
| अनुनय | प्रसादय | प्रसन्न करो | make happy |
| प्रश्रयम् | नम्रतां | नम्रता को | politeness |
| प्रख्यापय | विस्तारय | फैलाओं | spread |
| कीर्तिम् | यशः | यश को | fame |
| पालय | रक्ष | रक्षा करो | defend |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| दुःखिते | दुःखिनि जने | दुःखी लोगों पर | on afflicted people |
| दयाम् | कृपाम् | दया | kindness |
| कुरु | विधत्स्व | करो | do |
| एतत् (सर्वम्) | इदं (सर्वम्) | यह (सब) | this all |
| सताम् | सज्जनानाम् | सज्जनों का | of good people |
| चेष्टितम् | आचरणम् | आचरण | conduct |
| (अस्ति) | (वर्तते) | (है) | (is) |

**भावार्थः**

**संस्कृतम्–** हे मानव! तृष्णां नाशय, क्षमां सेवस्व, गर्वं त्यज, पापाचरणे अनुरागं न कुरु, सत्यं वद, श्रेष्ठजनमार्गम् अनुसर, विदुषां सेवां कुरु, सम्मान्यान् मानय, शत्रून् अपि प्रसादय, नम्रतां विस्तारय, कीर्तिं रक्ष, दुःखिनि जने दयां विधेहि, यतो हि एतत् सर्वम् सज्जनानाम् आचरणं वर्तते।

**हिन्दी–** हे मनुष्य! तृष्णा को नष्ट करो, क्षमाशील बनो, गर्व को त्यागो, पापाचरण में अनुराग मत रखो, सत्य बोलो, श्रेष्ठ लोगों के मार्ग का अनुसरण करो, विद्वानों की सेवा करो, सम्मानितों का मान करो, शत्रुओं को भी प्रसन्न रखो, नम्रता का विस्तार करो, कीर्ति की रक्षा करो, दुःखी लोगों पर दया करो क्योंकि ये सब श्रेष्ठजनों के आचरण हैं।

**आङ्ग्लम्–** O Man! Destroy the greed, be forgiving, give up pride, do not love sinful acts, speak the truth, follow the path of good persons, serve the scholars, respect the respectables, make happy even the enemies, show meekness, defend your fame, be kind to those who are in adverse situation. All these are the characteristics of noble persons.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

ब्रूह्यनुयाहि – ब्रूहि + अनुयाहि (यण्-सन्धिः)

विद्विषोऽप्यनुनय – विद्विषः + अपि + अनुनय

(विद्विषः + अपि → विसर्गसन्धिः) (अपि + अनुनय → यण्-सन्धिः)

विद्वज्जनम् – विद्वद् + जनम् (श्चुत्वसन्धिः, दस्य जः)

www.thearyasamaj.org



(ख) **समासः**

| | | |
|---|---|---|
| साधुपदवीम् | – | साधूनां पदवी (षष्ठी तत्पु.) ताम् |
| विद्वज्जनम् | – | विद्वान् चासौ जनश्च (कर्मधारयः) तम् |
| चेष्टितम् | – | चेष्टा अस्य संजाता |
| छिन्धि | – | छिद् धातुः लोट् लकारः, मध्यमपुरुषैमकवचनम् श्नम्-विकरणः धातुः |
| जहि | – | हन् + लोट्, मपु. एक. हन्तेर्जः इति हन् धातोः जादेशः |
| मा कृथाः | – | माङ् उपपदम्, कृ + धातुः, माङि लुङ् इति लुङ्लकारः मपु. एक. आत्मनेपदरूपम् |
| ब्रूहि | – | ब्रू + लोट्, मपु. एकवचनम् |
| सेवस्व | – | सेव् + धातुः, लोट् आत्मनेपदे मपु. एक. |
| अनुनय | – | अनु√नी धातुः, लोट्, मपु. एक. |

(ii) **विशेषः** – अत्र भज, मानय, अनुनय, प्रख्यापय, पालय इत्यादीनां लोटि रूपाणि भू-धातुवत् स्युः। तद्रूपाणि स्मरत। ब्रूहि, अनुयाहि इति अदादिगणस्थधात्वोः रूपाणि भिन्नानि स्युः। छिन्धि इति रुधादिगणस्य धातोः रूपम्। सेवस्व इत्यात्मनेपदरूपम्।

(iii) **पर्यायशब्दाः**

| | | |
|---|---|---|
| तृष्णा | – | स्पृहा, पिपासा, तृषा |
| मदः | – | दर्पः, अवलेपः, अवष्टम्भः, गर्वः, स्मयः |
| द्विट् | – | शत्रुः, विपक्षः, अहितः, अमित्रम् |

(iv) **छन्दः** – शार्दूलविक्रीडितम्

www.thearyasamaj.org



सावधानं स्मरत –

हन्-धातोः लोटि रूपाणि–

| | | | |
|---|---|---|---|
| प्रपु. | हन्तु/हतात् | हताम् | घ्नन्तु |
| मपु. | जहि/हतात् | हतम् | हत |
| उपु. | हनानि | हनाव | हनाम |

निदर्शनम्–

भज्-धातोः लोटि परस्मैपदे रूपाणि

| | | | |
|---|---|---|---|
| प्रपु. | भजतु/भजतात् | भजताम् | भजन्तु |
| मपु. | भज/भजतात् | भजतम् | भजत |
| उपु. | भजानि | भजाव | भजाम |

सेव्-धातोः लोटि आत्मनेपदे रूपाणि

| | | | |
|---|---|---|---|
| प्रपु. | सेवताम् | सेवेताम् | सेवन्ताम् |
| मपु. | सेवस्व | सेवेथाम् | सेवध्वम् |
| उपु. | सेवै | सेवावहै | सेवामहै |

'ब्रू'-धातोः लोटि रूपाणि

| | | | |
|---|---|---|---|
| प्रपु. | ब्रवीतु/ब्रूतात् | ब्रूताम् | ब्रुवन्तु |
| मपु. | ब्रूहि/ब्रूतात् | ब्रूतम् | ब्रूत |
| उपु. | ब्रवाणि | ब्रवाव | ब्रवाम |

www.thearyasamaj.org



छिद् - धातोः लोटि रूपाणि

| | | | |
|---|---|---|---|
| प्रपु. | छिनत्तु/छिन्तात् | छिन्ताम् | छिन्दन्तु |
| मपु. | छिन्धि/छिन्तात् | छिन्तम् | छिन्त |
| उपु. | छिनदानि | छिनदाव | छिनदाम |

## अभ्यासः – 16
## श्लोकः – 66

1. श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–

तृष्णां .................. भज .................. जहि .......... पापे .............. .......... कृथाः
सत्यं .................. .................. सेवस्व .................................. ।
.................. मानय .................................. प्रख्यापय ..................
कीर्तिं .................. .................. कुरु .................. सतां चेष्टितम् ॥

2. पदच्छेदं कुरुत–

(i) विद्विषोऽप्यनुनय – ..................................................
(ii) ब्रूह्यनुयाहि – ..................................................

3. द्वितीयान्तपदानि एकत्र लिखत–

यथा– तृष्णाम्

.................. .................. .................. ..................
.................. .................. .................. ..................
.................. .................. .................. ..................

4. सप्तम्यन्तं पदं प्रथमान्तं पदं च लिखत–

सप्तम्यन्तं पदं प्रथमान्तं पदं

.................. .................. .................. ..................

www.thearyasamaj.org



5. लोट्लकारस्य रूपाणि लिखत–

.................... .................... .................... ....................

.................... .................... .................... ....................

6. उत्तरं लिखत–

(i) साधूपदवीं सेवस्व इत्यस्य कः आशयः ?

........................................................................................................

(ii) दया कुत्र करणीया ?

........................................................................................................

(iii) शत्रुभिः सह अपि किं कर्तव्यम् ?

........................................................................................................

(iv) सतां चत्वारि चेष्टितानि लिखत ?

........................................................................................................

7. पदपरिचयं लिखत–

(i) जहि – ..............................................

(ii) साधुपदीम् – ..............................................

(iii) अनुयाहि – ..............................................

(iv) अनुनय – ..............................................

(v) विद्विषः – ..............................................

8. किं सत्यं ✓ किमसत्यमिति × चिह्नाभ्यां निर्दिशत–

**उदा.– तृष्णां भज क्षमां छिन्धि** – ☐

(i) तृष्णां छिन्धि क्षमां भज – ☐

(ii) पापे रतिं कृथाः – ☐

(iii) पापे रतिं मा कृथाः – ☐

www.thearyasamaj.org



(iv) मान्यान् प्रख्यापय प्रश्रयं मानय – ☐

(v) मान्यान् मानय प्रश्रयं प्रख्यापय – ☐

9. भज्-धातोः लोट्लकारे रूपाणि लिखत–

प्रपु. .................... .................... ....................

मपु. .................... .................... ....................

उपु. .................... .................... ....................

10. 'छिद्'-धातोः, 'या'-धातोश्च लोटि रूपाणि लिखत–

छिद्–प्रपु. .................... .................... ....................

मपु. .................... .................... ....................

उपु. .................... .................... ....................

या– प्रपु. .................... .................... ....................

मपु. .................... .................... ....................

उपु. .................... .................... ....................

11. यथानिर्देशं धातोः लोट्लकाररूपेण वाक्यं पूरयत–

(i) त्वं माम् .................... (अनु✓गम्)

(ii) अयं काष्ठं .................... (भिद्)

(iii) अहं सत्यं .................... (ब्रू)

(iv) ते गुरून् .................... (सेव्)

12. प्रश्नानामुत्तराणि दत्त–

(i) कानिचित् चत्वारि सतां चेष्टितानि लिखत ?

..........................................................................................

(ii) कस्य पदवी अनुसर्तव्या ?

..........................................................................................

www.thearyasamaj.org



(iii) कस्य सेवनं कर्तव्यम् ?

..........................................................................................

(iv) अस्य श्लोकस्य कः सन्देशोऽस्ति ?

..........................................................................................

**13. सन्धिं विधाय रिक्ते स्थले पूरयत–**

(i) सत्यं ........................... श्रेष्ठमार्गम्। (ब्रूहि + अनुगच्छ)

(ii) ........................... सर्वथा सेवस्व। (सत् + जनम्)

(iii) ........................... प्रसादय। (द्विषः + अपि)

(iv) ........................... सत्पुरुषम्। (अनुयाहि + अनुम्)

**14. लोट्लकारस्य रूपेण वाक्यानि पूरयत–**

(i) सम्यक् आचरन्तं साधुजनं भवान् ........................... (अनु√या)

(ii) रज्ज्वाः बन्धनं त्वम् ........................... (छिद्)

(iii) यूयं स्वनम्रतां ........................... (प्र√ख्या)

(iv) अहं मम शत्रुम् अपि ........................... (अनु√नी = नय)

(v) भवन्तः राष्ट्रस्य कीर्तिम् ........................... (पाल्)

**15. 'कृ'-धातोः यथोचितरूपैः वाक्यानि पूरयत–**

**यथा– सः कार्यम् अकार्षीत् / अकृत।**

(i) त्वं परिश्रमम ........................... / ...........................

(ii) तौ ग्रन्थौ ........................... / ...........................

(iii) इमें स्वकार्याणि ........................... / ...........................

(iv) अहं गृहकार्यम् ........................... / ...........................

(v) वयं नृपतेः कार्याणि ........................... / ...........................

(vi) यूयं कस्य कार्याणि अद्य ........................... / ...........................

(vii) आवां विदुषां सेवाम् ........................... / ...........................

www.thearyasamaj.org



(viii) युवां संन्यासिनः सेवां किम् .................... / ....................

16. मञ्जूषातः यथोचितं पर्यायशब्दं स्वीकृत्य वाक्यं पूरयत–

| द्विषः, स्पृहाम्, मदः |
|---|

(i) त्वं धनस्य .................... छिन्धि।

(ii) अङ्कुशदर्शनात् गजस्य .................... अपगतः।

(iii) एते अस्माकं .................... सन्ति।

17. कृ-धातुः उभयपदी वर्तते। तस्य लुङ्लकारे आत्मनेपद-रूपाणि दत्तानि सन्ति। तानि सावधानं स्मरत–

कृ-लुङ्-आत्मनेपदम्

| | | | |
|---|---|---|---|
| प्रपु. | अकृत | अकृषाताम् | अकृषत |
| मपु. | अकृथाः | अकृषाथाम् | अकृढ्वम् |
| उपु. | अकृषि | अकृष्वहि | अकृष्महि |

परस्मैपदम्–

| | | | |
|---|---|---|---|
| प्रपु. | अकार्षीत् | अकार्ष्टाम् | आकर्षुः |
| मपु. | अकार्षीः | अकार्ष्टम् | अकार्ष्ट |
| उपु. | अकार्षम् | अकार्ष्व | अकार्ष्म |

(श्लोके 'मा कृथाः' इति लुङि मध्यमपुरुषैकवचनस्य रूपम्। माङ्-योगे अट्-आटौ न भवतः।)

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**मनसि वचसि काये पुण्यपीयूषपूर्णाः**
**त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।**
**परगुणपरमाणून् पर्वतीकृत्य नित्यं**
**निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥ 67 ॥**

**पदच्छेदः**

मनसि वचसि काये पुण्य-पीयूष-पूर्णाः
त्रिभुवनम् उपकारश्रेणिभिः प्रीणयन्तः ।
पर-गुण-परमाणून् पर्वती-कृत्य नित्यम्
निज-हृदि विकसन्तः सन्ति सन्तः कियन्तः ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| मनसि | मनस्- स. नपुं. सप्त. एक. | परगुणपरमाणून् | उ. पुं. द्विती. बहु. समस्तम् |
| वचसि | वचस्- स. नपुं. सप्त. एक. | पर्वती-कृत्य | ल्यबन्तम् अव्ययम् |
| काये | अ. पुं. सप्त. एक. | नित्यम् | अव्ययम् |
| पुण्यपीयूषपूर्णाः | अ. पुं. प्र. बहु. वि. समस्तम् | निजहृदि | त. नपुं. सप्त. एक. समस्तम् |
| | | विकसन्तः | त. पुं. प्र. बहु. शत्रन्त-वि. |
| त्रिभुवनम् | अ. नपुं. द्विती. एक. समस्तम् | सन्ति | अस्- लट्, प्रपु. बहु. |
| उपकारश्रेणिभिः | इ. स्त्री. तृ. बहु. | सन्तः | त. पुं. प्र. बहु. विशेष्यम् |
| प्रीणयन्तः | त. पुं. प्र. बहु. शत्रन्त-वि. | कियन्तः | त. पुं. प्र. बहु. |

**आकाङ्क्षा**

**सन्ति ।**

| | |
|---|---|
| के सन्ति ? | सन्तः सन्ति । |
| कीदृशाः सन्तः सन्ति ? | पुण्यपीयूषपूर्णाः सन्तः सन्ति । |
| सन्तः कस्मिन् पुण्यपीयूषपूर्णः सन्ति ? | मनसि, वचसि, काये (च) पुण्यपीयूषपूर्णाः सन्तः सन्ति । |

www.thearyasamaj.org



| | |
|---|---|
| पुनश्च कीदृशाः सन्तः सन्ति ? | प्रीणयन्तः सन्तः सन्ति। |
| किं प्रीणयन्तः सन्तः सन्ति ? | त्रिभुवनं प्रीणयन्तः सन्तः सन्ति। |
| त्रिभुवनं काभिः प्रीणयन्तः सन्तः सन्ति ? | उपकारश्रेणिभिः त्रिभुवनं प्रीणयन्तः सन्तः सन्ति। |
| पुनश्च ते कीदृशाः सन्ति ? | परगुणपरमाणून् पर्वतीकृत्य निजहृदि नित्यं विकसन्तः सन्तः सन्ति। |
| तादृशाः सन्तः कति सन्ति ? | (एतादृशाः) सन्तः कियन्तः सन्ति ? (अर्थात् अतीव विरलाः सन्ति।) |

**अन्वयः**

मनसि वचसि काये पुण्यपीयूषपूर्णाः, उपकारश्रेणिभिः त्रिभवुनं प्रीणयन्तः, परगुणपरमाणून् पर्वतीकृत्य निजहृदि नित्यं विकसन्तः सन्तः कियन्तः सन्ति।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| मनसि | अन्तःकरणे | मन में | in mind |
| वचसि | वाचि | वाणी में | in speech |
| काये | शरीरे | शरीर में | in body |
| पुण्यपीयूषपूर्णाः | पुण्यामृतपरिपूर्णाः | पुण्यरूपी अमृत से परिपूर्ण | perfect with the nectar of virtue |
| उपकारश्रेणिभिः | परोपकार-परम्पराभिः | परोपकार परम्पराओं द्वारा | by the series of beneficence |
| त्रिभुवनम् | जगत्त्रयम् | तीनों लोकों को | to the three worlds (viz. this world (Martyalok), the other world (Ākāś) and the nether world (Pātāl) |
| प्रीणयन्तः | सन्तोषयन्तः | सन्तुष्ट करते हुए | satisfying |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| परगुणपरमाणून् | अन्येषामत्यल्पगुणान् | दूसरों के अत्यल्प गुणों को | few qualities of others |
| पर्वतीकृत्य | विशदीकृत्य | विस्तृत करके | by elaborating |
| निजहृदि | स्वमनसि | अपने चित्त में | in own mind |
| नित्यम् | सदा | सदा | always |
| विकसन्तः | प्रसन्नताम् अनुभवन्तः | प्रसन्नता का अनुभव करते हुए | feeling gladness |
| सन्तः | श्रेष्ठाः | श्रेष्ठ पुरुष | great persons |
| कियन्तः | कतिपय (एव) | कुछ (ही) | few (only) |
| सन्ति | विद्यन्ते | हैं | are |

## भावार्थः

**संस्कृतम्–** मनोवचनशरीरेषु पुण्यरूपामृतपरिपूर्णाः परोपकारशृङ्खलाभिः जगत्त्रयम् आनन्दयन्तः, स्वल्पान् अपि परगुणान् विशदीकृत्य स्वहृदि सर्वदा प्रसन्नतामनुभवन्तः कतिसंख्याकाः सज्जनाः सन्ति। अर्थात् उपर्युक्तगुणवन्तो जनश्रेष्ठाः विरलाः एव सन्ति।

**हिन्दी–** मन, वचन एवं शरीर में पुण्य रूपी अमृत से परिपूर्ण, उपकार-परम्पराओं से तीनों लोकों को प्रसन्न करते हुए, दूसरे के थोड़े से गुणों को भी पर्वत के समान बनाकर अपने हृदय में सदा प्रसन्नता का अनुभव करने वाले सत्पुरुष कितने हैं। अर्थात् ऐसे गुण वाले श्रेष्ठ जन विरले ही हैं।

**आङ्ग्लम्–** There are very few great persons who are full of the ambrosia of virtues in thought, speech and action, and benefitting the three worlds with the series of their acts of beneficence, rejoicing in their heart in constantly making mountain of the small merits of others.

## निर्देशनम्

### (i) व्याकरणम्

#### (क) समासः

पुण्यपीयूषपूर्णाः – पुण्यम् एव पीयूषम् पुण्यपीयूषम् (कर्मधारयः)
पुण्यपीयूषेण पूर्णाः (तृ.तत्पु.)

www.thearyasamaj.org



| | | |
|---|---|---|
| त्रिभुवनम् | – | त्रयाणां भुवनानां समाहारः (समाहारद्वन्द्वः) अत्र समाहारे द्वन्द्वे सामान्यतया स्त्रीलिङ्गता भवति परन्तु पात्र-भुवनाद्यन्तानां वार्त्तिकप्रामाण्यात् स्त्रीलिङ्गता नास्ति। |
| उपकारश्रेणिभिः | – | उपकाराणाम् श्रेणयः (षष्ठी तत्पु.) ताभिः |
| परगुणपरमाणून् | – | परेषां गुणाः परगुणाः, परगुणानाम् परमाणवः, (षष्ठी तत्पु.) तान् |
| पर्वतीकृत्य | – | अपर्वतान् पर्वतान् कृत्वा इत्यर्थे (अभूततद्भावे च्विः) पर्वत-उपपदात् कृधातोः क्त्वा, पर्वतान्ताकारस्य ईत्वम्। उपपदसमासे सति क्त्वो ल्यप्, तुगागमः। |
| निजहृदि | – | निजं च तत् हृदयम् (कर्मधारयः) तस्मिन् |
| साधुपदवीम् | – | साधूनां पदवी (षष्ठी तत्पु.) ताम् |
| विद्वज्जनम् | – | विद्वान् चासौ जनश्च (कर्मधारयः) तम् |

**(ख) कृदन्ताः**

| | | |
|---|---|---|
| प्रीणयन्तः | – | प्रीण् + णिच् + लटः स्थाने शतृ प्रत्ययः = प्रीणयत्, प्र. बहु.। |
| विकसन्तः | – | वि✓कस् + लटः स्थाने शतृप्रत्ययः = विकसत् प्र. बहु.। |
| कियन्तः | – | का संख्या एषाम् इत्यर्थे किम् + वतुप्, वस्य घः, घस्येम्। किमः की इत्यादेशः, ईलोपः = कियत् प्र. बहु.। |

**(ii) पर्यायशब्दाः**

| | | |
|---|---|---|
| हृत् | – | स्वान्तं, मानसं, मनः |
| पीयूषम् | – | अमृतम्, सुधा |

**(iii) छन्दः** – मालिनी - छन्दः

www.thearyasamaj.org



लक्षणम् – "ननमयययुतेयं मालिनी भोगिलोकैः ।

## अभ्यासः – 17
### श्लोकः – 67

1. श्लोकानुसारम् उचितेन पदेन पदच्छेदं पूरयत–

मनसि .................. काये ..................पूर्णाः
त्रिभुवनम्.................. .................. ।
पर.................. .................. नित्यं
.................. .................. सन्ति .................. .................. ॥

2. सप्तम्यन्तपदानि अधो लिखत–

.................. .................. ..................

3. द्वितीयान्तपदानि नीचैः लिखत–

.................. .................. ..................

4. शत्रन्तपदानि लिखत–

.................. .................. ..................

5. सन्तः इत्यस्य विशेषणानि नीचैः लिखत–

.................. .................. .................. ..................

6. समाधानं लिखत–

(i) सन्तः कुत्र-कुत्र पुण्यपीयूषपूर्णाः भवन्ति ?

....................................................................................................

www.thearyasamaj.org



(ii) त्रिभुवनं के कथं प्रीणयन्तः विद्यन्ते ?

..............................................................................................

(iii) परमाणुसदृशपरगुणान् किं कृत्वा वदन्ति सन्तः ?

..............................................................................................

(iv) निजहृदि विकसन्तः सन्तः कति सन्ति ?

..............................................................................................

7. पदपरिचयं दत्त–

(i) वचसि – ..............................

(ii) उपकारश्रेणिभिः – ..............................

(iii) प्रीणयन्तः – ..............................

(iv) निजहृदि – ..............................

(v) सन्ति – ..............................

8. वाक्ये प्रयोगं कुरुत–

(i) उपकारश्रेणिभिः – ..............................

(ii) प्रीणयन्तः – ..............................

(iii) त्रिभुवनम् – ..............................

(iv) विकसन्तः – ..............................

9. विग्रहवाक्यं प्रदर्शयत–

(i) वचनामृतपूर्णाः – ..............................

(ii) उपकारश्रेणिः – ..............................

(iii) दृढीकृत्य – ..............................

www.thearyasamaj.org



**10. समस्तं पदं लिखत–**

(i) धर्म एव अमृतं, तेन युक्ताः – ..........

(ii) अस्थूलं स्थूलं कृत्वा इति – ..........

(iii) परकीयं च तत् हृत्, तस्मिन् – ..........

**11. शत्रन्तं पदं लिखत–**

(i) प्र✓सादि + शतृ - प्र. बहु. – ..........

(ii) नन्दि + शतृ - षष्ठी बहु. – ..........

(iii) अस् + लट्, प्रपु. द्वि. – ..........

**12. प्रश्नानामुत्तराणि यच्छत–**

(i) **सतां कुत्र-कुत्र पुण्यपीयूषं पूर्णमस्ति ?**

..........

(ii) **सन्तः केन प्रकारेण त्रिलोकीं प्रीणयन्ति ?**

..........

(iii) **अल्पगुणान् पर्वतीकृत्य के विकसन्ति ?**

..........

(iv) **सन्तः के सन्ति ?**

..........

**13. शतृप्रत्ययं संयोज्य वाक्यानि पूरयत–**

(i) रामः प्रजाः .......... प्रसन्नो भवति। (अनु + रञ्ज्)

(ii) नृपाः स्वसेवकान् .......... सन्ति। (नन्दि)

(iii) देवाः मनुष्यान् वरैः .......... भवन्ति। (प्रीण्)

(iv) तडागे कमलानि .......... सन्ति। (विकस्)

www.thearyasamaj.org



(v) सन्तः निजमानसे ............................ भवन्ति । (विकस्)

14. अस्-धातोः लट्लकारस्य रूपैः वाक्यानि पूरयत–

(i) अहं कुत्र गच्छन् ............................?

(ii) त्वं कार्यं कुर्वन् ............................ ।

(iii) ते किं खादन्तः ............................ ।

(iv) वयं धनं यच्छन्तः ............................ ।

(v) युवां किं पश्यन्तौ ............................ ।

(vi) तौ कुत्र धावन्तौ ............................ ।

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**किं तेन हेमगिरिणा रजताद्रिणा वा**
**यत्राश्रिताश्च तरवस्तरवस्त एव।**
**मन्यामहे मलयमेव यदाश्रयेण**
**कङ्कोलनिम्बकुटजा अपि चन्दनाः स्युः ॥ 68 ॥**

**पदच्छेदः**

किम् तेन हेम-गिरिणा रजताद्रिणा वा
यत्र आश्रिताः च तरवः तरवः ते एव।
मन्यामहे मलयम् एव यद्-आश्रयेण
कङ्कोल-निम्ब-कुटजाः अपि चन्दनाः स्युः ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| किम् | अव्ययम् (प्रश्नार्थे) | ते | तद्- द. पुं. प्र. बहु. सर्व. |
| तेन | तद्- द. पुं. तृ. एक. सर्व. | एव | अव्ययम् |
| हेमगिरिणा | इ. पुं. तृ. एक. समस्तम् | मन्यामहे | मन्- लट्, उपु. बहु. |
| रजताद्रिणा | इ. पुं. तृ. एक. समस्तम् | मलयम् | अ. पुं. द्विती. एक. |
| वा | अव्ययम् | एव | अव्ययम् |
| यत्र | अव्ययम् | यदाश्रयेण | अ. पुं. तृ. एक. समस्तम् |
| आश्रिताः | अ. पुं. प्र. बहु. क्तान्त-वि. | कङ्कोलनिम्ब-कुटजाः | अ. पुं. प्र. बहु. समस्तम् |
| च | अव्ययम् | अपि | अव्ययम् |
| तरवः | उ. पुं. प्र. बहु. | चन्दनाः | अ. पुं. प्र. बहु. |
| तरवः | उ. पुं. प्र. बहु. | स्युः | अस्- वि.लि., प्रपु. बहु. |

**आकाङ्क्षा**

**(वयं) मन्यामहे।**

(वयं) कं मन्यामहे ? (वयं) मलयम् एव मन्यामहे।

www.thearyasamaj.org



| | |
|---|---|
| (वयं) कीदृशं मलयं मन्यामहे ? | यदाश्रयेण कङ्कोलनिम्बकुटजाः चन्दनाः स्युः तं मलयम् एव (पर्वतं) मन्यामहे। |
| केन किम् ? (किम् प्रयोजनम् अस्ति ?) | तेन हेमगिरिणा रजताद्रिणा वा किम् (किं प्रयोजनम्)। |
| कीदृशेन हेमगिरिणा किम् ? | यत्र आश्रिताः च तरवः ते एव तरवः (भवन्ति) तेन हिमगिरिणा रजताद्रिणा वा किम्। |

**अन्वयः**

तेन हेमगिरिणा रजताद्रिणा वा किम्, यत्र आश्रिताः च तरवः ते एव तरवः (भवन्ति)। (वयं) मलयम् एव मन्यामहे यदाश्रयेण कङ्कोलनिम्बकुटजाः चन्दनाः स्युः।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| तेन | अमुना | उस | that |
| हेमगिरिणा | सुवर्णपर्वतेन | सोने के पर्वत से | mountain of gold |
| रजताद्रिणा वा | अथ वा रजतगिरिणा | या चाँदी के पर्वत से | mountain of silver |
| किम् | किं प्रयोजनम् | क्या प्रयोजन | what is in use |
| यत्र | हेमाद्रौ रजताद्रौ वा | सोने या चाँदी के पर्वत पर | on mountain of gold or silver |
| आश्रिताः च | स्थिताः च | और स्थित | and stood |
| तरवः | वृक्षाः | वृक्ष | trees |
| ते एव | पूर्वावस्थाः अपरिवर्तिताः एव | वही पूर्व अवस्था वाले | same as they are |
| तरवः | वृक्षाः | तरु | trees |
| (भवन्ति) | (विद्यन्ते) | (रहते हैं) | (are) |
| (अतः) | (अस्माद्धेतोः) | (इसलिए) | (therefore) |
| (वयम्) | (सद्गुणग्राहकाः) | (हम) | (we) |
| मलयम् एव | मलयपर्वतम् एव | मलय पर्वत को ही | to only Mountain (Mlay) |
| मन्यामहे | श्रेष्ठं स्वीकुर्मः | श्रेष्ठ मानते हैं | think great |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| यदाश्रयेण | यस्य आश्रयेण | जिसके आश्रय से | stood whereon |
| कङ्कोलनिम्बकुटजाः | कङ्कोलनिम्बकुटजनामकाः (कटुगुणविशिष्टाः) वृक्षाः | कंकोल, नीम और कुटज (कड़वे गुण वाले) वृक्ष | *Kañkola*, Neem & *Kutaja* trees (of bitter attribute) |
| चन्दनाः | चन्दनगन्धाः | चन्दन की गन्ध वाले | odorous like sandalwood |
| स्युः | भवेयुः | हो जायें | be |

**भावार्थः**

**संस्कृतम्–** स्वर्णपर्वतेन रजतपर्वतेन वा अर्थात् सुमेरुणा कैलासेन वा किं प्रयोजनं, यत्र आश्रयं प्राप्ताः वृक्षाः ते एव पूर्वावस्थाः वृक्षाः भवन्ति (न च तत्र सुवर्णरजतसंयोगस्य किमपि फलं दृश्यते)। वयं तु मलयपर्वतम् एव बहु मन्यामहे यस्य आश्रयेण कङ्कोलनिम्बकुटजनामका अपि वृक्षाः चन्दनसुरभियुताः भवन्ति। (यथा मलयगिरिसंयोगात् कटुगुणयुक्ताः वृक्षाः अपि चन्दनगन्धभाजो भवन्ति, तथैव दुर्गुण युक्ताः अपि जनाः महताम् आश्रयेण सुगुणाः भवन्ति इत्यर्थः।)

**हिन्दी–** उस सुमेरु नामक स्वर्ण पर्वत से या कैलाश नामक रजत पर्वत से क्या प्रयोजन, जिस पर आश्रित वृक्ष, पूर्व अवस्था वाले सामान्य वृक्ष की तरह रहते हैं (अर्थात् सुवर्ण या चाँदी के संयोग का कोई फल नहीं दिखता है)। हम तो मलय पर्वत को ही पर्वत मानते हैं, जिसके सहारे से कङ्कोल (शीतल चीनी), नीम तथा कुटज (कुरैया) वृक्ष भी चन्दन (सुगन्धित) हो जाते हैं। (जो अपने सद्गुणों से दूसरों को प्रभावित करे, वह महापुरुष है।)

**आङ्ग्लम्–** What is the use of that mountain of gold (*Sumeru*) and mountain of silver (*Kailāsa*), the trees standing on them remain same as trees. We think the mountain *Malaya* is great because where the trees like *Kañkola, Neem* and *Kutaja* also become sandalwood trees.

## निर्दशनम्

### (i) व्याकरणम्

#### (क) सन्धिः

यत्राश्रिताश्च – यत्र + आश्रिताः + च

(स.दी. सन्धिः) (श्चुत्वसन्धिः)

www.thearyasamaj.org



तरवस्तरवस्त एव – तरवः + तरवः + ते + एव

(विसर्गसन्धिः) (अयादि-सन्धिः) (यलोपः)

(ख) **समासः**

हेमगिरिणा – हेम्नः गिरिः (षष्ठी तत्पु.) तेन

रजताद्रिणा – रजतरूपः गिरिः (कर्मधारयः) तेन अथवा रजतस्य गिरिः (षष्ठी तत्पु.) तेन

यदाश्रयेण – यस्य आश्रयः (षष्ठी तत्पु.) तेन

कङ्कोलनिम्बकुटजाः – कङ्कोलश्च निम्बश्च कुटजश्चेति (द्वन्द्वः)

(ख) **कृदन्तः**

आश्रिताः – आ√श्रि + क्तप्रत्ययः, प्र. बहु.

(ii) **पर्यायशब्दाः**

हेमगिरिः – मेरुः, सुमेरुः, हेमाद्रिः

निम्बः – पिचुमन्दः

कुटजः – शक्रः, वत्सकः, गिरिमल्लिका

तरुः – वृक्षः, महीरुहः, शाखी, विटपः

(iii) **छन्दः** – वसन्ततिलकावृत्तम्

**लक्षणम्** – उक्ता वसन्ततिलका तभजाजगौ गः

अवधेयम्

**'स्युः' इति अस्-धातोः, विधिलिङ्, प्रपु. बहु. रूपम्। तस्य अन्यानि रूपाणि एवं भवन्ति–**

| | | | |
|---|---|---|---|
| प्रपु. | स्यात् | स्याताम् | स्युः |
| मपु. | स्याः | स्यातम् | स्यात |
| उपु. | स्याम् | स्याव | स्याम |

www.thearyasamaj.org



**मन्-धातोः लटि रूपाणि सावधानं स्मरत–**

| | | | |
|---|---|---|---|
| प्रपु. | मन्यते | मन्येते | मन्यन्ते |
| मपु. | मन्यसे | मन्येथे | मन्यध्वे |
| उपु. | मन्ये | मन्यावहे | मन्यामहे |

## अभ्यासः – 18
## श्लोकः – 68

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

किं तेन .................... ....................द्रिणा वा

....................श्च .................... एव ।

.................... .................... ....................श्रयेण

कङ्कोल.................... .................... .................... स्युः ॥

2. **सन्धिं विसन्धिं वा कुरुत–**

(i) किम् + तेन – ....................

(ii) यत्र + आश्रिताः + च – ....................

(iii) तरवस्तरवस्त एव – ....................

(iv) कुटजा अपि – ....................

3. **प्रथमान्तपदानि वचनक्रमेण अधो लिखत–**

.................... .................... ....................

.................... .................... ....................

4. **तृतीयान्तपदानि अधो लिखत–**

.................... .................... ....................

www.thearyasamaj.org



5. अव्ययपदानि अधोलिखत–

.................... .................... .................... ....................

.................... .................... ....................

6. क्रियापदे अधो लेख्ये–

.................... ....................

7. उत्तरं लिखत–

(i) कुत्र स्थिताः तरवः तरवः एव भवन्ति ?

....................

(ii) हेमगिरिणा कवेः प्रयोजनं कथं नास्ति ?

....................

(iii) के वृक्षाः चन्दनाः भवन्ति ?

....................

(iv) कङ्कोलनिम्बकुटजाः चन्दनवृक्षवद् भवितुं किं कारणमस्ति ?

....................

8. पदपरिचयं लिखत–

(i) हेमगिरिणा – ....................

(ii) तरवः – ....................

(iii) मन्यामहे – ....................

(iv) चन्दनाः – ....................

9. प्रश्नानामुत्तराणि दत्त–

(i) कविः मलयमेव कथं मन्यते ?

....................

www.thearyasamaj.org



(ii) मलयसंसर्गेण वृक्षाणां को लाभः ?

..................................................

(iii) कुत्राश्रिताः वृक्षाः ते एव वृक्षाः भवन्ति ?

..................................................

10. यथाश्लोकं योजयत–

| | | | |
|---|---|---|---|
| (i) | किं तेन हेमगिरिणा | (क) | अपि चन्दनाः स्युः |
| (ii) | यत्राश्रिताश्च तरव | (ख) | यदाश्रयेण |
| (iii) | मन्यामहे मलयमेव | (ग) | स्तरवस्त एव |
| (iv) | कङ्कोलनिम्बकुटजा | (घ) | रजताद्रिणा वा |

11. यथोचितक्रियापदेन वाक्यं पूरयत–

(i) अहं रामं बहु .................... (मन्यामहे / मन्ये)

(ii) मलये स्थिताः वृक्षाः गन्धवन्तः .................... (स्यात् / स्युः)

(iii) कैलासं जनाः रजतं .................... (मन्यते / मन्यन्ते)

(iv) विद्यालये तस्मिन् काले वयमपि .................... (स्याम् / स्याम)

12. सन्धिं विसन्धिं वा कुरुत–

(i) तत्र + आश्रिताः + च – ....................

(ii) वृक्षाः + ते + एव – ....................

(iii) वृक्ष + आधारेण + इति – ....................

(iv) तरवस्तरवस्त एव – ....................

(v) तदाश्रयेणैवं भवति – ....................

(vi) देवा अप्येवम् – ....................

13. यथोचितं विग्रहवाक्यं समस्तपदं वा लिखत–

(i) तदाश्रयणात् – ....................

www.thearyasamaj.org



(ii) रजताद्रौ – ..............................

(iii) कङ्कोलश्च निम्बश्च कुटजश्च – ..............................

(iv) रजतस्य गिरौ स्थिताः – ..............................

14. पर्यायशब्दान् लिखत–

(i) हेमाद्रिः – ..............................

(ii) वृक्षः – ..............................

(iii) पीयूषम् – ..............................

(iv) हृत् – ..............................

15. अस्य पङ्क्तिद्वयस्य भावार्थं लिखत–

'मन्यामहे मलयमेव यदाश्रयेण,
कङ्कोलनिम्बकुटजा अपि चन्दनाः स्युः'

..............................

..............................

..............................

..............................

..............................

◆◆◆

www.thearyasamaj.org

# पञ्चमः पाठः – धीरता

**श्लोकः**

रत्नैर्महाब्धेस्तुतुषुर्न देवाः
न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं
न निश्चितार्थाद्विरमन्ति धीराः ॥ 69 ॥

**पदच्छेदः**

रत्नैः महाब्धेः तुतुषुः न देवाः
न भेजिरे भीम-विषेण भीतिम् ।
सुधाम् विना न प्रययुः विरामम्
न निश्चित-अर्थात् विरमन्ति धीराः ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| रत्नैः | अ. नपुं. तृ. बहु. | सुधाम् | आ. स्त्री. द्विती. एक. |
| महाब्धेः | अ. पुं. षष्ठी एक. समस्तम् | विना | अव्ययम् |
| तुतुषुः | तुष्- लिट् प्रपु. बहु. | न | अव्ययम् |
| न | अव्ययम् | प्रययुः | प्र + या- लिट् प्रपु. बहु. |
| देवाः | अ. पुं. प्र. बहु. कर्तृपदम् | विरामम् | अ. पुं. द्विती. एक. |
| न | अव्ययम् | न | अव्ययम् |
| भेजिरे | भज्- लिट् प्रपु. बहु. | निश्चितार्थाद् | अ. पुं. पं. एक. समस्तम् |
| भीम-विषेण | अ. नपुं. तृ. एक. समस्तम् | विरमन्ति | वि + रम्- लट्, प्रपु. एक. |
| भीतिम् | इ. स्त्री. द्विती. एक. | धीराः | अ. पु. प्र. बहु. |

www.thearyasamaj.org



## आकाङ्क्षा

**न तुतुषुः ।**

| | |
|---|---|
| के न तुतुषुः ? | देवाः न तुतुषुः । |
| देवाः कैः न तुतुषुः ? | देवाः महाब्धेः रत्नैः न तुतुषुः । |

**(देवाः) न भेजिरे ।**

| | |
|---|---|
| कां न भेजिरे ? | भीतिं न भेजिरे । |
| केन भीतिं न भेजिरे ? | भीमविषेण भीतिं न भेजिरे । |

**(देवाः) न प्रययुः ।**

| | |
|---|---|
| किं न प्रययुः ? | विरामं न प्रययुः । |
| कां विना विरामं न प्रययुः ? | सुधां विना विरामं न प्रययुः । |
| (एवं हि/पूर्वोक्तप्रकारेण) किम् ? | (एवं हि) धीराः निश्चितार्थात् न विरमन्ति । |

## अन्वयः

देवाः महाब्धेः रत्नैः न तुतुषुः, भीमविषेण भीतिं न भेजिरे । सुधां विना विरामं न प्रययुः (एवं हि) धीराः निश्चितार्थाद् न विरमन्ति ।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| देवाः | सुराः | देवगण | Gods |
| महाब्धेः | क्षीरसागरस्य | क्षीरसागर के | of the ocean |
| रत्नैः | श्रेष्ठमणिभिः | रत्नों से | by jewels |
| न तुतुषुः | न सन्तुष्टाः बभूवुः | सन्तुष्ट नहीं हुए | not satisfied |
| भीमविषेण | कालकूटनामकगरलेन | कालकूट नामक भयानक विष से | by deadly poison named *Kāla Kūṭa* |
| भीतिम् | भयम् | भय को | frightened |
| न भेजिरे | न प्रापुः | प्राप्त नहीं हुए | did not get |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| सुधां | अमृतं | अमृत के | nectar |
| विना | विना | बिना | without |
| विरामम् | विश्रामम् | विश्राम को | to rest |
| न प्रययुः | न जग्मुः | प्राप्त नहीं हुए | did not get |
| (एवं हि) | (एवं प्रकारेण) | (इस प्रकार) | (in this way) |
| धीराः | धैर्यशालिनः | धैर्यशाली लोग | firm minded persons |
| निश्चितार्थात् | प्रतिज्ञावचनात् | निश्चित अर्थ से | from definite aim |
| न विरमन्ति | विरामं न प्राप्नुवन्ति | पीछे नहीं हटते हैं | do not go back |

**भावार्थः**

**संस्कृतम्–** देवाः समुद्रमथनकाले क्षीरसागरस्य बहुमूल्यरत्नैः न सन्तुष्टाः, न च कालकूटनामकेन भयकारकेण विषेण भीताः जाताः। ते अमृतलाभं विना विश्रान्तिं न प्राप्तवन्तः, यतो हि मनस्विनो धीराः प्रतिज्ञातार्थाद् न विरमन्ति। (फलोदयपर्यन्तं यतन्ते इति भावः)

**हिन्दी–** समुद्रमथन के समय देवगण क्षीरसागर के बहुमूल्य रत्नों से सन्तुष्ट नहीं हुए, न ही भयानक विष से भयभीत हुए। उन्होंने अमृत को प्राप्त किये बिना विराम नहीं किया। (क्योंकि) धैर्यशाली लोग अभीष्ट पदार्थ को प्राप्त करने से (फल प्राप्ति तक) पीछे नहीं हटते हैं।

**आङ्ग्लम्–** During Samundra Mathana the divine community was neither satisfied with the gain of the ocean-jewels nor were they terrified from its deadly poison. They did not take rest until they obtained the nectar. The firm minded persons do not go back from a definite aim.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

रत्नैर्महाब्धेस्तुतुषुः – रत्नैः + महाब्धेः + तुतुषुः (विसर्गसन्धिः)

प्रययुर्विरामम् – प्रययुः + विरामम् (विसर्गसन्धिः)

www.thearyasamaj.org



निश्चितार्थाद् . विरमन्ति – निश्चित + अर्थात् + विरमन्ति

(स.दी. सन्धिः) (जश्त्व-सन्धिः)

(ख) **समासः**

महाब्धेः – महान् चासौ अब्धिः च (कर्मधारयः) तस्य

भीमविषेण – भीमं च तद् विषम् (कर्मधारयः) तेन

निश्चितार्थात् – निश्चितश्चासौ अर्थश्च (कर्मधारयः) तस्मात्

(ग) **कारकम्**

सुधां विना – विना-योगे सुधा इत्यस्मात् द्वितीया विभक्तिः

तुतुषुः – तुष् धातुः, भूते परोक्षे लिट् प्रपु. बहु. परस्मैपदम्

(ii) **पर्यायशब्दाः**

रत्नम् – मणिः, श्रेष्ठः

धीरः – मनीषी, मनस्वी, प्राज्ञः

(iii) **छन्दः** – उपजातिः

(iv) **अलङ्कारः** – अर्थान्तरन्यासः

**सावधानं स्मरत–**

**तुष्-धातोः लिटि रूपाणि एवं भवन्ति–**

| | | | |
|---|---|---|---|
| प्रपु. | तुतोष | तुतुषतुः | तुतुषुः |
| मपु. | तुतोषिथ | तुतुषथुः | तुतुष |
| उपु. | तुतोष | तुतुषिव | तुतुषिम |

www.thearyasamaj.org



भज्-धातोः लिटि रूपाणि–

| | | | |
|---|---|---|---|
| प्रपु. | भेजे | भेजाते | भेजिरे |
| मपु. | भेजिषे | भेजाथे | भेजिध्वे |
| उपु. | भेजे | भेजिवहे | भेजिमहे |

## अभ्यासः – 19
## श्लोकः – 69

1. श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–

........................................ देवाः

.......... .................. भीमविषेण .......................... ।

सुधां .............. न ..........................................

न ........................................................ धीराः ॥

2. यथोचितं सन्धिं विसन्धिं वा कुरुत–

(i) रत्नैः महाब्धेः तुतुषुः न – ..........................................

(ii) सुधाम् विना – ..........................................

(iii) प्रययुर्विरामं – ..........................................

(iv) निश्चितार्थाद् – ..........................................

3. क्रियापदानि अधः लिखत–

.............................. .............................. .............................. ..............................

4. द्वे कर्तृपदे नीचैः लिखत–

.............................. ..............................

www.thearyasamaj.org



5. द्वितीयान्तपदानि लिखत–

............ ............ ............

6. तृतीयान्ते पदे लिखत–

............ ............

7. पञ्चम्यन्तं षष्ठयन्तं च पदे लिखत–

............ ............

8. अव्ययानि लिखत–

............ ............ ............ ............

............

9. उत्तरं लिखत–

(i) रत्नैः के न तुतुषुः ? – ............

(ii) भीमविषेण भयं के न प्रापुः ? – ............

(iii) देवाः कां विना विरामं न जग्मुः ? – ............

(iv) धीराः कीदृशा भवन्ति ? – ............

10. श्लोकस्थक्रियापदैः वाक्यानि पूरयत–

(i) विद्वांसो रत्नैः न ............ ज्ञानैः तुतुषुः।

(ii) वीराः विषेण भीतिं न ............ स्वजनैः भीतिं भेजिरे।

(iii) देवाः अमृतं विना न ............।

(iv) मनस्विनः प्रतिज्ञातार्थात् न ............।

11. पदपरिचयं लिखत–

(i) महाब्धेः – ............

www.thearyasamaj.org



(ii) भीतिम् – ..........

(iii) प्रययुः – ..........

(iv) विरमन्ति – ..........

**12. सन्धि-विच्छेदं कुरुत–**

(i) रत्नैरमूल्यैस्तुतुषुः – .......... .......... ..........

(ii) चक्रुर्विरामम् – .......... ..........

**13. विग्रहवाक्यं लिखत–**

(i) महावीरैः – ..........

(ii) प्रतिज्ञातार्थात् – ..........

**14. उत्तराणि दत्त–**

(i) **कुत्र जातैः रत्नैः देवाः न अतुष्यन् ?**

..........

(ii) **केन के भीतिं न प्रापुः ?**

..........

(iii) **के कां विना विश्रान्तिं न ययुः ?**

..........

(iv) **ये निश्चितार्थाद् न विरमन्ति ते के ?**

..........

**15. निर्दिष्टधातुरूपैः वाक्यानि पूरयत–**

(i) वयं विद्यामवाप्य न .......... (तुष् + लिट्)

(ii) ते धनानि लब्ध्वा .......... (तुष् + लिट्)

(iii) छात्रः ह्यः एव इतः ग्रामं .......... (प्र√या + लिट्)

www.thearyasamaj.org



(iv) ते फलोदयं यावत् विश्रान्तिं न .................. (प्र✓या + लिट्)

(v) शस्त्रैरपि वीरः भयं न .................. (भज् + लिट्)

(vi) त्वं कस्मात् भीतिं .................. (भज् + लिट्)

16. **विभक्तिं संयोज्य वाक्यं पूरयत–**

(i) .................. विना सुखं नास्ति। (ज्ञान)

(ii) .................. साकं पिता अपि प्रययौ। (पुत्र)

(iii) .................. ऋते न मुक्तिः। (ज्ञान)

(iv) .................. विना निष्फला लोकयात्रा। (नारी)

(v) .................. रामः पृथक् अस्ति। (कृष्ण)

(vi) .................. अहम् धनं ददौ। (युष्मद्)

(vii) .................. धीराः न विरमन्ति। (दृष्टार्थ)

17. **प्र + या धातोः लिटि रूपाणि पठित्वा दा-धातोः रूपाणि नीचैः लिखत–**

**प्र + या – लिट्**

| | | | |
|---|---|---|---|
| प्रपु. | प्रययौ | प्रययतुः | प्रययुः |
| मपु. | प्रययिथ | प्रययथुः | प्रयय |
| उपु. | प्रययौ | प्रययिव | प्रययिम |

**दा – लिट्**

| | | | |
|---|---|---|---|
| प्रपु. | ददौ | .................. | .................. |
| मपु. | .................. | .................. | दद |
| उपु. | .................. | ददिव | .................. |

एवमेव भा, हा, गा, पा, धा इत्यादीनां धातूनां रूपाणि ज्ञेयानि।

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**कान्ताकटाक्षविशिखा न लुनन्ति[1] यस्य**
**चित्तं न निर्दहति कोपकृशानुतापः।**
**कर्षन्ति भूरिविषयाश्च च लोभपाशा[2]**
**लोकत्रयं जयति कृत्स्नमिदं स धीरः॥ 70॥**

**पदच्छेदः**

कान्ताकटाक्ष-विशिखाः न लुनन्ति यस्य
चित्तम् न निर्दहति कोप-कृशानु-तापः।
कर्षन्ति भूरि-विषयाः च न लोभपाशाः
लोक-त्रयम् जयति कृत्स्नम् इदम् सः धीरः॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| कान्ताकटाक्ष- | अ. पुं. प्र. बहु. | न | अव्ययम् |
| विशिखाः | समस्तम् | लोभपाशाः | अ. पुं. प्र. बहु. समस्तम् |
| न | अव्ययम् | लोकत्रयम् | अ. नपुं. द्विती. एक. समस्तम् विशेष्यम् |
| लुनन्ति | लू- लट् प्रपु. बहु. | जयति | जि- लट् प्रपु. एक. |
| यस्य | यद्- द. पुं. षष्ठी एक. सर्व. | कृत्स्नम् | अ. नपुं. द्विती. एक. वि. |
| चित्तम् | अ. नपुं. द्विती. एक. | इदम् | म. नपुं. द्विती. एक. वि., सर्व. |
| न | अव्ययम् | सः | तत्- द. पुं. प्र. एक. वि., सर्व. |
| निर्दहति | निर्√दह्- लट्, प्रपु. एक. | धीरः | अ. पुं. प्र. एक. विशेष्यम् |
| कोपकृशानुतापः | अ. पुं. प्र. एक. समस्तम् | | |
| कर्षन्ति | कृष्- लट् प्रपु. बहु. | | |
| भूरिविषयाः | अ. पुं. प्र. बहु. समस्तम् | | |
| च | अव्ययम् | | |

1. लुनन्ति इत्यस्य स्थाने 'दहति' इति, 2. पाशाः इत्यस्य स्थाने 'पाशैः' इति च पाठान्तरं लभ्यते।

www.thearyasamaj.org



## आकाङ्क्षा

**जयति ।**

| | |
|---|---|
| कः जयति ? | धीरः जयति । |
| कीदृशः धीरः जयति ? | यस्य चित्तं कान्ताकटाक्षविशिखाः न लुनन्ति, कोपकृशानुतापः न निर्दहति, भूरिविषयाः लोभपाशाः च न कर्षन्ति स धीरः जयति । |
| स धीरः किं जयति ? | सः धीरः इदं लोकत्रयं जयति । |

## अन्वयः

यस्य चित्तं कान्ताकटाक्षविशिखाः न लुनन्ति, कोपकृशानुतापः न निर्दहति, भूरिविषयाः लोभपाशाः न कर्षन्ति च सः धीरः इदं कृत्स्नम् लोकत्रयम् जयति ।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| यस्य | पुरुषस्य | जिस व्यक्ति के | of the person |
| चित्तम् | मनः | मन को | mind |
| कान्ताकटाक्ष- | कामिन्याः अपाङ्गः | कामिनी के कटाक्ष | sidelong glance |
| विशिखाः | वीक्ष्णरूपबाणाः | रूपी बाण | arrows of women's |
| न लुनन्ति | न भिन्दन्ति | भेदते नहीं हैं | do not penetrate |
| कोपकृशानुतापः | क्रोधाग्नेः संतापः | क्रोधाग्नि का ताप जिनको | heat of fire of anger |
| न निर्दहति | न ज्वालयति | जलाता नही हैं | do not burn |
| भूरिविषयाः च | अथ नानाभोगाः | और जिसको अनेक भोगरूप | numerous sensual objects |
| लोभपाशाः | लोभरज्जवः | लोभपाश | ropes of greed |
| न कर्षन्ति | न आकर्षयन्ति | आकृष्ट नहीं करते हैं | do not attract |
| सः | उपर्युक्ताचारवान् | वह उपर्युक्त आचरण वाला | resolute person |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| धीरः | धैर्यशाली | धैर्यशाली जन | with patience |
| इदं कृत्स्नम् | इदं समग्रं | इस सम्पूर्ण | this whole |
| लोकत्रयम् | लोकत्रयं | तीनों (स्वर्गादि) लोकों को | all these three worlds |
| जयति | विजयते | जीत लेता है | overcomes |

**भावार्थः**

**संस्कृतम्–** यस्य धीरस्य चित्तं कामिनीकटाक्षबाणाः न भिन्दन्ति, क्रोधाग्निः न दहति, भोगपदार्थाः न लोभयन्ति सः सर्वत्र विजयते।

**हिन्दी–** जिसका मन कामिनी के कटाक्ष रूपी बाणों से भिदता नहीं है, जिसे क्रोधाग्नि का ताप जलाता नहीं है और बहुत सारे भोग रूपी लोभ पाश जिसे आकृष्ट नहीं करते हैं, वह धीर व्यक्ति इस समग्र त्रिलोक को जीत लेता है।

**आङ्ग्लम्–** The person whose mind is not penetrated by the arrows of sidelong glances of women, who does not burn in the fire of anger and does not get attracted towards numerous sensual objects that resolute person overcomes all these three worlds.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

भूरिविषयाश्च – भूरिविषयाः + च (श्चुत्वसन्धिः)

स धीरः – सः + धीरः (विसर्गसन्धिः)

**(ख) समासः**

कान्ताकटाक्षविशिखाः – कान्तयाः कटाक्षाः कान्ताकटाक्षाः (षष्ठी तत्पु.)
कान्ताकटाक्षाः एव विशिखाः (कर्मधारयः)

कोपकृशानुतापः – कोप एव कृशानुः (कर्मधारयः)
कोपकृशानोः तापः (षष्ठी तत्पु.)

भूरिविषयाः – भूरि च ते विषयाः (कर्मधारयः)

www.thearyasamaj.org



| | | |
|---|---|---|
| लोभपाशाः | – | लोभा एव पाशाः (कर्मधारयः) |
| विघ्नभयेन | – | विघ्नात् भयम् (षष्ठी तत्पु.) तेन |
| लोकत्रयम् | – | लोकानां त्रयम् (षष्ठी तत्पु.) त्रयः अवयवाः अस्य इति - (त्रि) |

(ग) **कारकम्**

| | | |
|---|---|---|
| लुनन्ति | – | लू छेदने धातुः, लट् लकारः प्रपु. बहु. क्रयादिगणोऽयं धातुः श्नाविकरणः उभयपदी च यथा– लुनाति / लुनीते इति, क्रीणाति/क्रीणीते इति। |
| निर्दहति | – | निर्दह् धातुः, लट् लकारः, प्रपु. एक.। भू धातुवत् रूपाणि। |
| कर्षन्ति | – | कृष् धातुः, लट्लकारः, प्रपु. बहु. |
| जयति | – | जि धातुः, लट् लकारः, प्रपु. एक. (त्रयाणामपि धातूनां रूपाणि भू धातुवत् एव स्युः) |

(ii) **पर्यायशब्दाः**

| | | |
|---|---|---|
| कान्ता | – | प्रमदा, कामिनी, ललना, मानिनी, नितम्बिनी |
| कृशानुः | – | अग्निः, पावकः, अनलः, वह्निः |
| कोपः | – | क्रोधः, अमर्षः, रोषः, रुट् (स्त्री) |

(iii) **छन्दः** – वसन्ततिलका-छन्दः

(iv) **अलङ्कारः** – कटाक्षे विशिखारोपात्, लोभे पाशारोपात् रूपकालङ्कारः।

(v) **सन्देशः** – धीराः जनाः विषय-वासना-कोपादि-जेतारः सन्तः त्रैलोक्यं जयन्ति।

www.thearyasamaj.org



## अभ्यासः - 20
## श्लोकः - 70

1. श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–

........................ न लुनन्ति यस्य
चित्तं ........ ........ ........तापः ।
........ भूरिविषयाश्च न ........
........त्रयं ........ ........ स धीरः ॥

2. सन्धिं विसन्धिं वा कुरुत–

(i) भूरिविषयाः च – ........ ........ ........
(ii) कृत्स्नम् इदम् – ........................
(iii) स धीरः – ........................
(iv) कान्ताकटाक्षविशिखा न – ........................

3. प्रथमान्त-पदानि नीचैः लिखत–

........ ........ ........
........ ........ ........

4. द्वितीयान्तपदानि लिखत–

........ ........ ........

5. क्रियापदानि अधोलिखत–

........ ........ ........

6. प्रश्नानामुत्तराणि दत्त–

(i) कान्ताकटाक्षविशिखाः कं न मोहयन्ति ?

........................

www.thearyasamaj.org



(ii) धीरं कः न दहति ?

..........................................................

(iii) लोभपाशाः के सन्ति ?

..........................................................

(iv) धीरः किं जयति ?

..........................................................

7. पदपरिचयं लिखत–

(i) लोभपाशाः – ..............................

(ii) लोकत्रयम् – ..............................

(iii) धीरः – ..............................

8. समस्तपदानि लिखत–

.................... .................... ....................

.................... .................... ....................

9. मञ्जूषातः यथोचितं क्रियापदं स्वीकृत्य वाक्यं पूरयत–

| जयति, कर्षन्ति, लुनन्ति, निर्दहति |
|---|

(i) श्रमिकाः लवित्रेण धान्यानि .................... ।

(ii) कोपाग्निः कोपकर्तारमेव .................... ।

(iii) विषया धीरान् न .................... ।

(iv) जितेन्द्रियः विषयादीनि .................... ।

10. विभक्तिवचनलिङ्गानि लिखत–

| | पदम् | | विभक्तिः | वचनम् | लिङ्गम् |
|---|---|---|---|---|---|
| (i) | विशिखाः | – | .................... | .................... | .................... |

www.thearyasamaj.org



(ii) कृशानुः – .................... .................... ....................

(iii) कृत्स्नम् – .................... .................... ....................

(iv) लोकत्रयम् – .................... .................... ....................

(v) सः – .................... .................... ....................

**11. विग्रहवाक्यं लिखत–**

(i) क्रोधाग्नितापः – ........................................

(ii) बहुविषयाः – ........................................

(iii) मोहपाशाः – ........................................

(iv) जगत्त्रयम् – ........................................

**12. मञ्जूषातः यथोचितं लू-धातोः रूपं स्वीकृत्य वाक्यं पूरयत–**

| |
|---|
| **लुनन्ति, लुनीतः, लुनाति, लुनीथ, लुनासि, लुनीथः, लुनामि, लुनीमः, लुनीवः** |

(i) सः धान्यं .................... ।

(ii) बालकौ पुष्पे .................... ।

(iii) ते जनाः सस्यानि .................... ।

(iv) त्वं किं .................... ।

(v) युवां किं .................... ।

(vi) यूयं धान्यं .................... ।

(vii) अहं काष्ठं .................... ।

(viii) आवां शाखां .................... ।

(ix) वयं विटपान् .................... ।

**13. उत्तराणि दत्त–**

(i) **कस्याः कटाक्षाः विशिखाः उक्ताः ?**

........................................

www.thearyasamaj.org



(ii) भूरिविषयाः कं न कर्षन्ति ?

..............................

(iii) पाशाः के भवन्ति ?

..............................

(iv) लोकत्रयं कः जयति ?

..............................

**14. समुचितैः धातुरूपैः वाक्यानि पूरयत–**

| छिनत्ति, क्रीणाति, लुनाति, कर्षन्ति, जयन्ति |
|---|

(i) इयं छेदिनी काष्ठानि ..............................

(ii) सः दात्रेण सस्यं ..............................

(iii) सः प्रभूतैः धनैः धान्यानि ..............................

(iv) योगिनः इन्द्रियाणि ..............................

(v) ते बलीवर्दान् ..............................

**15. रेखाङ्कितपदानां पर्यायपदैः वाक्यं लिखत–**

(i) इयं अस्य जनस्य <u>कान्ता</u> अस्ति। – ..............................

(ii) अयं <u>कृशानुः</u> लौहं दहति। – ..............................

(iii) अस्य <u>कोपः</u> प्रचण्डोऽस्ति। – ..............................

(iv) <u>ललना</u> सा भवति या लालयति। – ..............................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**क्वचित् पृथ्वीशय्यः क्वचिदपि च पर्यङ्कशयनः**
**क्वचिच्छाकाहारी क्वचिदपि च शाल्योदनरुचिः ।**
**क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो**
**मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥ 71 ॥**

**पदच्छेदः**

क्वचित् पृथ्वीशय्यः क्वचित् अपि च पर्यङ्कशयनः
क्वचित् शाकाहारी क्वचित् अपि च शाल्योदन-रुचिः ।
क्वचित् कन्थाधारी क्वचित् अपि च दिव्याम्बरधरः
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| क्वचित् | अव्ययम् | क्वचित्, अपि च | अव्ययानि |
| पृथ्वीशय्यः | अ. पुं. प्र. एक. समस्तम्, वि. | दिव्याम्बरधरः | अ. पुं. प्र. एक. समस्तम्, वि. |
| क्वचित्, अपि, च | अव्ययानि | मनस्वी | मनस्विन्- न. पुं. प्र. एक. तद्धितान्तं विशेष्यम् |
| पर्यङ्कशयनः | अ. पुं. प्र. एक. समस्तं वि. | कार्यार्थी | कार्यार्थिन्- न. पुं. प्र. एक. समस्तम्, वि. |
| क्वचित् | अव्ययम् | न | अव्ययम् |
| शाकाहारी | न. पुं. प्र. एक. समस्तम्, वि. | गणयति | गण्- लट्, प्रपु. एक. |
| क्वचित्, अपि, च | अव्ययानि | दुःखम् | अ. नपुं. द्विती. एक. |
| शाल्योदनरुचिः | इ. पुं. प्र. एक. समस्तम्, वि. | न, च | अव्यये |
| | | सुखम् | अ. नपुं. द्विती. एक. |
| क्वचित् | अव्ययम् | | |
| कन्थाधारी | न. पुं. प्र. एक. समस्तम् वि. | | |

'भूमौ शय्या' इति पाठान्तरमप्यस्ति किन्तु तत्र अतिरिक्तं क्रियापदम् अध्याहर्तव्यं भवति ।

www.thearyasamaj.org



## आकाङ्क्षा

न गणयति।

| | |
|---|---|
| कः न गणयति ? | मनस्वी न गणयति। |
| मनस्वी किं न गणयति ? | मनस्वी न दुःखं गणयति, न च सुखं गणयति। |
| कीदृशः मनस्वी न दुःखं गणयति न च सुखं गणयति ? | कार्यार्थी मनस्वी न दुःखं गणयति न च सुखं गणयति। |
| कार्यार्थी मनुष्यः कीदृशः (सन् अपि) न दुःखं गणयति न च सुखं गणयति ? | कार्यार्थी मनुष्यः क्वचित् पृथ्वीशय्यः, क्वचिदपि च पर्यङ्कशयनः, क्वचित् शाकाहारी, क्वचिदपि शाल्योदनरुचिः, क्वचित् कन्थाधारी क्वचिदपि च दिव्याम्बरधरः (सन् अपि) न दुःखं गणयति, न च सुखं गणयति। |

## अन्वयः

कार्यार्थी मनस्वी क्वचित् पृथ्वीशय्यः अपि च क्वचित् पर्यङ्कशयनः, क्वचित् शाकाहारी अपि च क्वचित् शाल्योदनरुचिः, क्वचित् कन्थाधारी अपि च क्वचित् दिव्याम्बरधरः (सन् अपि) न दुःखं गणयति न च सुखम्।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| कार्यार्थी | स्वकार्यसाधनतत्परः | कार्यसिद्ध करने को तत्पर | desirous to get his object |
| मनस्वी | धीरः | धीर व्यक्ति | thoughtful |
| क्वचित् | कुत्रचित् (देशे काले वा) | किसी स्थान या समय पर | any place or time |
| पृथ्वीशय्यः | भूमिशयनः | पृथ्वी पर सोने वाला | sleeping on ground |
| अपि च | तथा च | और | and |
| क्वचित् | कुत्रचित् | कहीं पर | somewhere |
| पर्यङ्कशयनः | तल्पशायी | पलंग पर सोने वाला | sleeps on couch |
| क्वचित् | कुत्रचित्काले | किसी समय | sometimes |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| शाकाहारी | शाकभक्षी | शाक खाने वाला | eating vegetables |
| अपि च | तथा च | एवं | and |
| क्वचित् | कुत्रचित्काले देशे वा | किसी समय या देश में | sometimes/ somewhere |
| शाल्योदनरुचिः | शालीनामोदनभक्षणे रुचिमान् | उत्तम चावलों के भात को | person who eats quality rice |
| क्वचित् | कदाचित् | कहीं / कभी | wherever |
| कन्थाधारी | जीर्णवस्त्रनिर्मितवस्त्रधारी | गुदड़ी / कथड़ी | scrap wearing |
| अपि च | एवञ्च | तथा | and |
| क्वचित् | कुत्रचित् | कहीं पर | sometimes |
| दिव्याम्बरधरः | दिव्यवस्त्रधारी | दिव्य वस्त्र धारण करने वाला | wearing superfine clothes |
| सन् | विद्यमानः | बनते हुए | being such person |
| न दुःखम् | न कष्टं | न तो कष्ट कं | neither sufferrings |
| गणयति | विचारयति | गिनता है | cares for |
| न च | नापि च | और नहीं | nor |
| सुखम् | अनुकूलवेदनीयम् | सुख को | comforts |

**भावार्थः**

**संस्कृतम्–** स्वकार्यसम्पादनशीलः मनस्वी (धीरः) जनः कुत्रचित् प्रदेशे काले वा पृथिव्यां शेते क्वचित् पर्यङ्के अपि स्वपिति, कदाचित् शाकमेव भुङ्क्ते कदाचिच्च शालीनामोदनं भुङ्क्ते, कुत्रचित् कन्थां जीर्णां धारयति क्वचिच्च दिव्यं वस्त्रं धत्ते। इत्थं स्वजीवनं यापयन् मनस्वी जीवने प्राप्तं दुःखं सुखं वा किमपि न विचारयति, कार्यमवश्यं साधयति।

**हिन्दी–** अपने कार्य को सिद्ध करने का इच्छुक मनस्वी–विवेकशील मनुष्य कभी पृथ्वी पर सोता है, तो कभी पलङ्ग पर सोता है, कभी साग–सब्जी आहार लेता है तो कभी उत्तम चावलों का भात भी खाता है, कहीं गुदड़ी धारण करता है तो कहीं दिव्य वस्त्र धारण करता है। इस तरह मनस्वी न तो कभी दुःख को न कभी सुख को गिनता है।

(सुख-दुःख का विचार किये बिना परिस्थिति के अनुकूल आचरण करता हुआ एवं कार्य साधन का इच्छुक व्यक्ति ही मनस्वी (धीर) व्यक्ति है।)

www.thearyasamaj.org



**आङ्ग्लम्**– The person who is desirous to get his object - sometimes sleeps on ground and sometimes on couch; sometimes eats simple vegetables and sometimes *Śāli* variety of rice; sometimes wears scrap & sometimes superfine clothes. Such type of resolute person does not care for comfort & sufferings.

## निर्दशनम्

### (i) व्याकरणम्

#### (क) सन्धिः

क्वचिदपि – क्वचित् + अपि (जश्त्वसन्धिः)
यथा– कुत्रचित् + अपि = कुत्रचिदपि

क्वचिच्छाकाहारी – क्वचित् + शाक + आहारी
(श्चुत्वसन्धिः) (स. दी. सन्धिः)

शाल्योदनम् – शालि + ओदनम् (यण्सन्धिः)

#### (ख) समासः

पृथ्वीशय्यः – पृथ्वी शय्या यस्य सः (बहुव्रीहिः)
यथा– तृणशय्यः। काष्ठशय्यः। पर्यङ्कशय्यः।

पर्यङ्कशयनः – पर्यङ्के शयनं यस्य सः (बहुव्रीहिः)

शाकाहारी – शाकम् आहरति (उपपदसमासः)

शाल्योदनरुचिः – शालीनाम् ओदनम् (षष्ठी-तत्पु.) शाल्योदने रुचिः यस्य, सः (बहुव्रीहिः)

कन्थाधारी – कन्थां धारयत इति कन्थाधारिन् (उपपदसमासः)

दिव्याम्बरधरः – दिव्यञ्च तत् अम्बरम् दिव्याम्बरम् (कर्मधारयः)
धरतीति धरः, दिव्याम्बरस्य धरः (षष्ठी-तत्पु.)
यथा– कौशेयाम्बरधरः। बहुशक्तिधरः।

मनस्वी – प्रशस्तं मनः अस्ति अस्य इत्यर्थे - मनस् + विनिः = मनस्विन्, प्रथमैकवचनम्।
यथा– मेधाविन्, यशस्विन्, स्रग्विन्।

www.thearyasamaj.org



| | | |
|---|---|---|
| कार्यार्थी | – | कार्यम् अर्थयते तच्छीलः – कार्य उपपदम् + अर्थि + णिनिः = कार्यार्थिन्, प्रथमैकवचने रूपम्। |
| गणयति | – | गण संख्याने धातुः + णिच् = गणि + लट् लकारः, प्र. पुरुषैकवचने रूपम्। यथा– कथयति। |

**अवधेयम्**

**स्मरत-गण-धातोः लटि रूपाणि–**

| | | | |
|---|---|---|---|
| प्रपु. | गणयति | गणयतः | गणयन्ति |
| मपु. | गणयसि | गणयथः | गणयथ |
| उपु. | गणयामि | गणयावः | गणयामः |

**'मनस्वी' इति इनन्तशब्दस्य रूपाणि एवं भवन्ति–**

| | | | |
|---|---|---|---|
| प्र. | मनस्वी | मनस्विनौ | मनस्विनः |
| द्विती. | मनस्विनम् | मनस्विनौ | मनस्विनः |
| तृ. | मनस्विना | मनस्विभ्याम् | मनस्विभिः |
| चतु. | मनस्विने | मनस्विभ्याम् | मनस्विभ्यः |
| पं. | मनस्विनः | मनस्विभ्याम् | मनस्विभ्यः |
| षष्ठी | मनस्विनः | मनस्विनोः | मनस्विनाम् |
| सप्त. | मनस्विनि | मनस्विनोः | मनस्विषु |
| सम्बो. | हे मनस्विन्! | हे मनस्विनौ! | हे मनस्विनः! |

एवमेव तेजस्वी, यशस्वी इत्यादि इनन्तशब्दरूपाणि स्मरत।

www.thearyasamaj.org



## अभ्यासः - 21
### श्लोकः 71

1. श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत-

क्वचित् ........................ क्वचिदपि च ........................
........................ क्वचिदपि च ........................ ।
क्वचित् ........................ दिव्याम्बरधरो
........................ कार्यार्थी ........................ सुखम् ॥

2. पदं विच्छिद्य संयोज्य वा लिखत–

(i) क्वचिच्छाकाहारी – ........................
(ii) क्वचिदपि – ........................
(iii) दिव्य–अम्बरधरः – ........................
(iv) शाली ओदनरूचिः – ........................

3. 'मनस्वी' इति विशेष्यपदम्, तस्य विशेषणानि अधो लिखत–

........................ ........................ ........................ ........................
........................ ........................ ........................

4. अव्ययपदानि अधो लिखत–

........................ ........................ ........................ ........................

5. समाधत्त–

(i) क्वचिद् भूमिशय्यः को भवति ?

........................

(ii) मनस्वी कदाचित् किं भुङ्क्ते ?

www.thearyasamaj.org



(iii) कस्य जनस्य क्वचित् शाल्योदने रुचिर्भवति ?

............................................................

(iv) मनस्वी कार्यार्थी किं किं न गणयति ?

............................................................

6. किमु शुद्धम् [✓] किमु अशुद्धमिति [×] चिह्नेन सूचयत–

(i) मनस्वी भूमिशयनः क्वचित् भवति। [ ]

(ii) मनस्वी सर्वदा पर्यङ्कशयनः भवति। [ ]

(iii) कार्यार्थी क्वचित् मांसाहारी भवति। [ ]

(iv) कार्यार्थी क्वचित् शाकाहारी भवति। [ ]

(v) कार्यार्थी कार्याणि गणयति। [ ]

(vi) कार्यार्थी सुखदुःखे अगणय्य कार्याणि साधयति। [ ]

7. उचितपदेन रिक्तस्थानं पूरयत–

| दिव्याम्बरधरः, मनस्वी, पृथिव्याम्, पर्यङ्कशयनः, कन्थाधारी |
|---|

(i) विवेकशीलो जनः .................... उच्यते।

(ii) अयं धीरः कुत्रचित् .................... शेते।

(iii) त्वं सर्वदा .................... भवसि।

(iv) .................... अयं जनो निर्धनः प्रतीयते।

(v) यः दिव्यम् वस्त्रं धारयति सः .................... ।

8. "मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्" इत्यस्याशयं विवृणुत।

............................................................

............................................................

............................................................

............................................................

www.thearyasamaj.org



9. यथोचितं विग्रहवाक्यं समस्तपदं वा लिखत–

(i) फलाहारी – ............

(ii) व्रीह्योदनरुचिः – ............

(iii) सुन्दरं वस्त्रं धरतीति, धरः – ............

(iv) प्रशस्तं पयः अस्ति अस्य – ............

10. समस्तपदं कृत्वा वाक्यं पूरयत–

(i) पराक्रमेण ............ न ............ धनैः। (यत् + शक्यं, तत् + शक्यम्)

(ii) तं ............ पश्य। (कौशेयं वस्त्रं धरति)

(iii) एनं ............ त्वं जानासि। (प्रशस्तं मनः अस्ति अस्य, तं)

(iv) अयं जनः सर्वथा ............ अस्ति। (शाकम् आहरति तच्छीलः)

(v) एतेऽत्र के ............ आयान्ति। (स्रजः सन्ति एषाम्, ते)

11. प्रश्नानामुत्तराणि देयानि–

(i) **कदाचित् कः भूमिशय्यो भवति ?**

............

(ii) **क्वचित् शाकाहारी जनः कः ?**

............

(iii) **मनस्वी कीदृशं वस्त्रं क्वचित् धारयति ?**

............

(iv) **मनस्विनः वैशिष्ट्यम् अत्र किं वर्णितम् ?**

............

12. यथाश्लोकं योजयत–

(i) दुःखम् न च सुखम् (क) क्वचित् पृथ्वीशय्यः।

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| (ii) | क्वचिदपि च पर्यङ्कशयनः | (ख) | क्वचिच्छाकाहारी। |
| (iii) | क्वचिदपि च शाल्योदनरुचिः | (ग) | च दिव्याम्बरधरः। |
| (iv) | क्वचित्कन्थाधारी क्वचिदपि | (घ) | मनस्वी कार्यार्थी न गणयति। |

**13. क्वचित्, क्वचिदपि, क्वचिच्च इत्येतैरव्ययपदैः वाक्यानि पूरयत–**

(i) अयं श्रेष्ठोजनः .................. उपकरोति .................. स्वकार्यं करोति।

(ii) वयं विद्यार्थिनः .................. भूमौ शेमहे .................. पर्यङ्के।

(iii) ते धनिकाः .................. धनं यच्छन्ति .................. न यच्छन्ति।

**14. विग्रहवाक्यं कुरुत–**

(i) पर्यङ्कशयनः – ..................................................

(ii) शाकाहारी – ..................................................

(iii) शाल्योदनरुचिः – ..................................................

(iv) कार्यार्थी – ..................................................

(v) त्रिशूलधारी – ..................................................

◆◆◆

www.thearyasamaj.org



## श्लोकः

**निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु**
**लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।**
**अद्यैव वा मरणमस्तु युगान्तरे वा**
**न्याय्यात्पथः, प्रविचलन्ति पदं न धीराः ॥ 72 ॥**

## पदच्छेदः

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथा-इष्टम्।
अद्य एव वा मरणम् अस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| निन्दन्तु | निन्द् + लोट्, प्रपु. बहु. | मरणम् | अ. नपुं. प्र. एक. |
| नीतिनिपुणाः | अ. पुं. प्र. बहु. | अस्तु | अस् + लोट्, प्रपु. एक. |
| यदि वा | अव्ययम् | युगान्तरे | अ. नपुं. सप्त. एक. |
| स्तुवन्तु | स्तु + लोट्, प्रपु. बहु. | वा | अव्ययम् |
| लक्ष्मीः | ई. स्त्री. प्र. एक. | न्याय्यात् | अ. पुं. पं. एक. वि. |
| समाविशतु | सम् आ✓विश् + लोट्, | पथः | पथिन्- न. पुं. पं. एक. विशेष्यम् |
| | प्रपु. एक. | प्रविचलन्ति | प्र वि✓चल् + लट्, प्रपु. बहु. |
| गच्छतु | गम् + लोट्, प्रपु. एक. | पदम् | अ. नपुं. द्विती. एक. |
| वा | अव्ययम् | न | अव्ययम् |
| यथेष्टम् | अव्ययम्, समस्तम् | धीराः | अ. पुं. प्र. बहु. कर्तृपदम् |
| अद्य एव | अव्ययम् | | |

## आकाङ्क्षा

**न प्रविचलन्ति।**

के न प्रविचलन्ति ? धीराः न प्रविचलन्ति।

www.thearyasamaj.org



| | |
|---|---|
| धीराः कस्मात् न प्रविचलन्ति ? | धीराः न्याय्यात् पथः पदं न प्रविचलन्ति। |
| धीराः कीदृशस्थितौ अपि न्याय्यात् पथः पदं न प्रविचलन्ति ? | नीतिनिपुणाः निन्दन्तु यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्, अद्यैव मरणमस्तु युगान्तरे वा (इत्येतादृश्यां स्थितौ अपि) धीराः न्याय्यात् पथः पदं न प्रविचलन्ति। |

**अन्वयः**

नीतिनिपुणा निन्दन्तु यदि स्तुवन्तु, लक्ष्मीः समाविशतु वा यथेष्टम् गच्छतु वा, अद्य एव वा मरणम् अस्तु, वा युगान्तरे, धीराः न्याय्यात् पथः पदम् न प्रविचलन्ति।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| नीतिनिपुणाः | नीतिकुशलाः | नीति शास्त्र में कुशल जन | persons well versed in politics and morality |
| निन्दन्तु | दूषयन्तु | निन्दा करें | may blame |
| यदि वा | अथवा | अथवा | or |
| स्तुवन्तु | प्रशंसन्तु | प्रशंसा करें | may praise |
| लक्ष्मीः | सम्पत् | लक्ष्मी | fortune |
| समाविशतु | आगच्छतु | आये | may come |
| वा | अथवा | या | or |
| यथेष्टम् | यथेच्छम् | इच्छानुसार | by desire |
| गच्छतु | प्रयातु | चली जाये | may go |
| अद्य एव वा | अथवा इदानीम् एव | अथवा अभी ही | or just now |
| मरणम् | मृत्युः | मृत्यु | death |
| अस्तु | भवतु | हो जाये | may occur |
| वा | अथवा | अथवा | or |
| युगान्तरे | अन्ययुगे | अन्य युग में | in another age |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| (किन्तु) | (परम्) | (किन्तु) | (but) |
| धीराः | धैर्यवन्तः जनाः | धीर लोग | equanimous persons |
| न्याय्यात् | न्याययुक्तात् | न्याय युक्त | from the just |
| पथः | मार्गात् | मार्ग से | path |
| पदम् | पादन्यासमात्रमपि | पद भर भी | even a step |
| न प्रविचलन्ति | नहि विचलिताः भवन्ति | विचलित नहीं होते हैं | never turn or deviate |

**भावार्थः**

**संस्कृतम्–** नीतिशास्त्रज्ञाः निन्दन्तु प्रशंसन्तु वा, लक्ष्मीः आगच्छतु स्वेच्छया वा गच्छतु, अधुनैव मृत्युर्भवतु अन्यस्मिन् युगे वा, तथापि धैर्यशालिनो जनाः नीतिमार्गात् पदमपि प्रविचलिताः न भवन्ति।

**हिन्दी–** नीति शास्त्र में कुशल जन चाहे निन्दा करें या प्रशंसा, लक्ष्मी आये या स्वयं चली जाये, इसी समय मृत्यु हो या अन्य युग में, फिर भी धैर्यशाली लोग न्याययुक्त मार्ग से पद भर भी विचलित नहीं होते हैं।

**आङ्ग्लम्–** Whether sagacious persons praise or blame, whether fortune may come or go, whether death occurs just now or after an age, the equanimous persons do not deviate or turn even a step from the just path.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

यथेष्टम् – यथा + इष्टम् (गुणसन्धिः)

अद्यैव – अद्य + एव (वृद्धिसन्धिः)

**(ख) समासः**

नीतिनिपुणाः – नीतौ निपुणाः (सप्त. तत्पु.)

यथा– शास्त्रविशादराः, धर्मरताः

यथेष्टम् – इष्टम् अनतिक्रम्य

www.thearyasamaj.org



यथा– यथेच्छम्, यथाबलम्, यथाशक्ति

युगान्तरे – अन्यत् युगम् युगान्तरम्, तस्मिन् (मयूरव्यसकादि-समासः)

यथा– कार्यान्तरे, वनान्तरे

(ii) **पर्यायवाची**

लक्ष्मीः – पद्मा, पद्मालया, कमला, श्रीः, हरिप्रिया, माः, लोकमाता

नीतिः – नयः, नियमः

निपुणाः – कुशलः, चतुरः, विशारदः

(iii) **छन्दः** – वसन्ततिलका-छन्दः

---

## अभ्यासः – 22
## श्लोकः – 72

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

निन्दन्तु .................. ........ ........ ..................

लक्ष्मीः .................. गच्छतु ........ .................. ।

........ ........ .................. .................. वा

न्याय्यात्पथः .................. ........ ........ ........ ॥

2. **यथोचितं सन्धिं विसन्धिं वा कुरुत–**

(i) यथेष्टम् – ..................

(ii) अद्यैव – ..................

(iii) मरणम् अस्तु – ..................

(iv) सम् आविशतु – ..................

www.thearyasamaj.org



3. प्रथमान्तपदानि नीचैः लिखत–

........................ ........................ ........................ ........................

4. अव्ययपदानि अधोलिखत–

........................ ........................ ........................

........................ ........................ ........................

5. द्वितीयान्त-पञ्चम्यन्तपदानि लिखत–

........................ ........................ ........................ ........................

6. क्रियापदानि अधो लिखत–

........................ ........................ ........................

........................ ........................ ........................

7. उत्तरं लिखत–

(i) कस्य निन्दया स्तुत्या वा धीराः न प्रविचलन्ति ?

................................................................................................

(ii) धीराः लक्ष्मीप्राप्तौ गमने वा कीदृशाः तिष्ठन्ति ?

................................................................................................

(iii) मृत्युभयं केषां नास्ति ?

................................................................................................

(iv) कस्मात् के पदमपि न प्रविचलन्ति ?

................................................................................................

www.thearyasamaj.org



(v) **अस्य श्लोकस्य कः सन्देशोऽस्ति ?**

............ ............ ............ ............ ............

8. **पदपरिचयं दत्त–**

(i) निन्दन्तु – ............

(ii) लक्ष्मीः – ............

(iii) गच्छतु – ............

(iv) युगान्तरे – ............

(v) पथः – ............

9. **अस्-धातोः लोट्लकारे रूपाणि अधः प्रदीयन्ते; रिक्तस्थानेषु एतेषां रूपाणां समुचितं प्रयोग कुरुत–**

| | | | |
|---|---|---|---|
| **प्रपु.** | अस्तु/स्तात् | स्ताम् | सन्तु |
| **मपु.** | एधि/स्तात् | स्तम् | स्त |
| **उपु.** | असानि | असाव | असाम |

सः अत्र अस्तु ............ । तौ अत्र ............ । तेऽत्र ............ ।

त्वम् अत्र ............ । युवां तत्र ............ । यूयं तत्र ............ ।

अहं कुत्र ............ । आवां तत्र ............ । वयं नात्र ............ ।

10. **समुचितपदेन वाक्यं पूरयत–**

**गच्छन्तु, कार्यान्तरे, समाविशतु, यथेष्टम्**

(i) सः ............ व्यापृतोऽस्तु ।

(ii) ते कुत्रापि न ............ ।

(iii) त्वं ............ कार्यं कुरु ।

(iv) तव गेहे श्रीः ............ ।

www.thearyasamaj.org



11. प्रश्नानामुत्तराणि दत्त–

(i) अद्यापि मरणमस्तु तथाऽपि के न प्रविचलन्ति ?

..........

(ii) केषां निन्दा स्तुतिर्वा धीरेषु प्रभावं न जनयति ?

..........

(iii) लक्ष्म्याः समावेशेन गमनेन वा के न विचलिताः भवन्ति ?

..........

(iv) धीरस्य किं कार्यमत्र वर्णितवान् कविः ?

..........

12. स्तुधातोः रूपाणि स्मरत–

| | | | |
|---|---|---|---|
| प्रपु. | स्तौतु/स्तुतात् | स्तुताम् | स्तुवन्तु |
| मपु. | स्तुहि/स्तुतात् | स्तुतम् | स्तुत |
| उपु. | स्तवानि | स्तवाव | स्तवाम |

13. विग्रहवाक्यं समस्तं पदं वा लिखत–

(i) ग्रामान्तरम् – ..........

(ii) वनान्तरे – ..........

(iii) शास्त्रे कुशलाः – ..........

(iv) शक्तिम् अनतिक्रम्य – ..........

(v) अन्यः पदार्थः, तेन – ..........

(vi) नीतिशास्त्रविशारदाः – ..........

14. 'निन्द्, गम्, स्तु, अस्, चल्'-धातूनां लोट्लकाररूपैः वाक्यानि पूरयत–

(i) दुर्जनः सज्जनान् – ..........

(ii) ते स्वेच्छया – ..........

www.thearyasamaj.org



(iii) अहं शिवम् – ..........

(iv) यूयम् अत्रैव – ..........

(v) धीराः छात्राः पदमपि च – ..........

**15. पर्यायशब्दान् उपयुज्य वाक्यं लिखत–**

(i) मम पार्श्वे **लक्ष्मीः** स्वयमागच्छति।– ..........

(ii) एषः विदुरस्य **नयः** अस्ति। – ..........

(iii) यूयं व्यवहारे **निपुणाः** भवन्तु। – ..........

◆◆◆

www.thearyasamaj.org



### श्लोकः

**कदर्थितस्यापि हि धैर्यवृत्तेर्न शक्यते धैर्यगुणः प्रमार्ष्टुम् ।**
**अधोमुखस्यापि कृतस्य वह्नेर्नाऽधः शिखा यान्ति कदाचिदेव ॥ 73 ॥**

### पदच्छेदः

कदर्थितस्य अपि हि धैर्यवृत्तेः न शक्यते धैर्यगुणः प्रमार्ष्टुम् ।
अधः मुखस्य अपि कृतस्य वह्नेः न अधः शिखाः यान्ति कदाचित् एव ॥

### पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| कदर्थितस्य | अ. पुं. षष्ठी एक. वि. समस्तम् | अधोमुखस्य | अ. पुं. षष्ठी एक. वि. समस्तम् |
| | | अपि | अव्ययम् |
| अपि | अव्ययम् | कृतस्य | अ. पुं. षष्ठी एक. कृदन्तम् |
| हि | अव्ययम् | वह्नेः | इ. पुं. षष्ठी एक. विशेष्यम् |
| धैर्यवृत्तेः | इ. पुं. षष्ठी एक. वि. समस्तम् | न | अव्ययम् |
| न | अव्ययम् | अधः | अव्ययम् |
| शक्यते | शक् + लट् (कर्मवाच्ये) प्रपु. एक. | शिखाः | आ. स्त्री. प्र. बहु. |
| | | यान्ति | या- लट्, प्रपु. बहु. |
| धैर्यगुणः | अ. पुं. प्र. एक. समस्तम् | कदाचित् | अव्ययम् |
| प्रमार्ष्टुम् | प्रमृज्-तुमुन्नन्तम् अव्ययम् | एव | अव्ययम् |

### आकाङ्क्षा

**न शक्यते ।**

| | |
|---|---|
| किं कर्तुं न शक्यते ? | प्रमार्ष्टुं न शक्यते । |
| कः प्रमार्ष्टुं न शक्यते ? | धैर्यगुणः प्रमार्ष्टुं न शक्यते । |
| कस्य हि धैर्यगुणः प्रमार्ष्टुं न शक्यते ? | धैर्यवृत्तेः धैर्यगुणः प्रमार्ष्टुं न शक्यते । |
| कीदृशस्य अपि धैर्यवृत्तेः गुणः प्रमार्ष्टुं न शक्यते ? | कदर्थितस्य अपि धैर्यवृत्तेः गुणः प्रमार्ष्टुं न शक्यते । |

www.thearyasamaj.org



| | |
|---|---|
| अत्र दृष्टान्तं कस्य अस्ति ? | वह्नेः। |
| न यान्ति। | |
| कः न यान्ति ? | वह्नेः शिखाः न यान्ति। |
| कीदृशस्य अपि वह्नेः ? | अधोमुखस्य कृतस्य अपि वह्नेः। |
| कुत्र न यान्ति ? | अधः न यान्ति। |
| कदा न यान्ति ? | कदाचिदपि न यान्ति। |

**अन्वयः**

कदर्थितस्य अपि धैर्यवृत्तेः (जनस्य) धैर्यगुणः प्रमार्ष्टुं न हि शक्यते। अधोमुखस्य कृतस्य अपि वह्नेः शिखाः कदाचित् एव अधः न यान्ति।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| कदर्थितस्य | तिरस्कृतस्य | तिरस्कृत का | disregarded |
| अपि | अपि | भी | even |
| धैर्यवृत्तेः (जनस्य) | धीरवृत्तिपुरुषस्य | धैर्यशाली पुरुष का | of equanimous person |
| धैर्यगुणः | धीरता | धैर्य गुण | endurance |
| प्रमार्ष्टुम् | प्रोज्झितुम् | नष्ट करना | to destroy |
| न शक्यते | न पार्यते | नहीं किया जा सकता है | impossible |
| अधोमुखस्य | नीचैराननस्य | अधोमुख का | downwards |
| कृतस्य अपि | विहितस्य अपि | की हुई की भी | even turned |
| वह्नेः | अग्नेः | आग की | of fire |
| शिखाः | ज्वालाः | लपटें | flames |
| कदाचित् एव | कर्हिचित् अपि | कभी भी | never |
| अधः | नीचैः | नीचे की ओर | downwards |
| न यान्ति | न गच्छन्ति | नहीं जाती हैं | never go |

www.thearyasamaj.org



## भावार्थः

**संस्कृतम्–** तिरस्कृतस्य अपि धैर्यगुणशालिनो जनस्य धैर्यरूपः गुणः केनाऽपि नाशयितुं न शक्यते, यथा नीचैः आननं कृतस्यापि पावकस्य ज्वालाः कदाचिदपि नीचैः न यान्ति (ऊर्ध्वमेव गच्छन्ति)।

**हिन्दी–** तिरस्कृत किये गए धीर व्यक्ति का धैर्यगुण मिटाया नहीं जा सकता है, जैसे नीचे की ओर मुख कर दिए जाने पर भी अग्नि की ज्वालाएँ कभी भी नीचे नहीं जाती हैं।

**आङ्ग्लम्–** The endurance of equanimous person can not be destroyed by disregarding him, like the flames of fire turned downwards never go downwards.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

कदर्थितस्यापि – कदर्थितस्य + अपि (स.दी.सन्धिः)

अधोमुखस्यापि – अधः + मुखस्य + अपि (उत्वं गुणश्च, स. दी.सन्धिः)

वह्नेर्नाधः – वह्नेः + न + अधः
(वह्नेः + न → विसर्गसन्धिः) (न + अधः → स.दी.सन्धिः)

कदाचिदेव – कदाचित् + एव (जश्त्वसन्धिः)

धैर्यगुणः प्रमार्ष्टुम् – पवर्गे परे विसर्गस्य विसर्ग एव भवति

अधःशिखा यान्ति – अधः + शिखाः + यान्ति (विसर्गसन्धिः शिखा इत्यस्योत्तर विसर्गस्थानिकरेफस्य यत्वम्, यस्य लोपश्च।)

#### (ख) समासः

कदर्थितस्य – कुत्सितः अर्थः कदर्थः (प्रादिसमासः) तस्य

धैर्यवृत्तेः – धैर्येण वृत्तिः यस्य सः धैर्यवृत्तिः (बहुव्रीहिः) तस्य

धैर्यगुणः – धैर्यम् एव गुणः (कर्मधारयः)

अधोमुखस्य – अधः मुखं यस्य, सः (बहुव्रीहिः) तस्य यथा– अधोबाहोः, ऊर्ध्वमुखस्य

www.thearyasamaj.org



(ग) **तद्धिताः**

| | | |
|---|---|---|
| प्रमार्ष्टुम् | – | प्र√मृज् + तुमुन् = प्रमार्ष्टुम् (मृजेर्वृद्धिः, जस्य षः, तस्य ष्टुत्वेन टकारः) यथा– सम्√दिश् + तुमुन् = सन्देष्टुम्, उपदेष्टुम् |
| शक्यते | – | शक् धातुः कर्मवाच्ये लट्, आत्मनेपदम्, यक् इत्यागमः यथा– पठ्यते, खाद्यते, गम्यते, दृश्यते इति |

(ii) **पर्यायशब्दाः**

| | | |
|---|---|---|
| कदर्थितः | – | न्यक्कृतः, तिरस्कृतः, क्लेशितः |
| वृत्तिः | – | आचरणम्, व्यवहारः, आचारः |

(iii) **छन्दः** – उपजाति-छन्दः

(iv) **अलङ्कारः** – दृष्टान्तः

---

## अभ्यासः – 23
### श्लोकः – 73

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

कदर्थितस्यापि ........ .................... न .................. .................... .................... ।

.......................... .................... वह्नेर्नाऽधः .................. .................. ..................देव ॥

2. **सन्धिं विसन्धिं वा कृत्वा लिखत–**

(i) अधः मुखस्य अपि – ..............................

(ii) न अधः शिखाः यान्ति – ..............................

(iii) कदर्थितस्याऽपि – ..............................

(iv) कदाचिदेव – ..............................

www.thearyasamaj.org



3. षष्ठ्यन्तपदानि अधो लिखत–

.................... .................... ....................

.................... .................... ....................

4. तिङन्तक्रियापदे लिखत–

.................... ....................

5. अव्ययपदानि लिखत–

.................... .................... .................... ....................

.................... .................... .................... ....................

6. विशेषणपदानि एकत्र लिखत–

(i) जनस्य – ....................

(ii) वह्नेः – ....................

7. समाधत्त–

(i) धैर्यं कस्य गुणो भवति ?

....................

(ii) कदर्थितस्य अपि जनस्य कः गुणः प्रमार्ष्टुं न शक्यते ?

....................

(iii) कीदृक्कृतस्यापि वह्नेः शिखाः अधो न यान्ति ?

....................

(iv) अनेन पद्येन भर्तृहरिः किं सन्देष्टुमिच्छति ?

....................

www.thearyasamaj.org



**8. पदपरिचयं दत्त–**

(i) कदर्थितस्य – ..............................

(ii) शक्यते – ..............................

(iii) प्रमार्ष्टुम् – ..............................

(iv) शिखाः – ..............................

**9. प्रदत्तपदानां वाक्ये प्रयोगं कुरुत–**

| धर्तुम्, अधो याति, प्रमार्ष्टुम्, कर्तुं न शक्यते |
|---|

(i) सज्जनानां सद्गुणाः .................... न शक्यन्ते।

(ii) उपरिमुखं कृतमपि जलम् .................... ।

(iii) अनेन किमपि कार्यं .................... ।

(iv) अयं धैर्यं .................... सक्षमोऽस्ति।

**10. सन्धिं सन्धिविच्छेदं वा कुरुत–**

(i) पुरः + शिखाः + सन्ति – ..............................

(ii) कः + कम् + प्रार्थयते – ..............................

(iii) वह्नेर्नाऽधः – ..............................

(iv) देवा गृहं यान्ति – ..............................

**11. विग्रहवाक्यं लिखत–**

(i) धैर्याचारस्य – ..............................

(ii) सत्यवृत्तिः – ..............................

(iii) ऊर्ध्वमुखेन – ..............................

(iv) सत्त्वगुणः – ..............................

www.thearyasamaj.org



12. प्रश्नानामुत्तराणि दत्त–

(i) कदर्थितोऽपि कः धैर्यगुणं न त्यजति ?

........................................

(ii) अधोमुखीकृतस्यापि वह्नेः शिखाः कुत्र न यान्ति ?

........................................

(iii) कः गुणः प्रमार्ष्टुं न शक्यः ?

........................................

13. यथोचितधातुरूपेण वाक्यं पूरयत–

| शक्यते, दृश्ये, गम्यन्ते, याहि, स्तौतु, पश्यन्तु |
|---|

(i) तेन जनेन अहमत्र .................... ।

(ii) केन जनेन एवं वक्तुं .................... ।

(iii) छात्रैरेतैः ग्रामाः .................... ।

(iv) त्वमितोऽविलम्बं .................... ।

(v) सः कष्टापनयनाय देवं .................... ।

(vi) ते अवश्यं युष्मान् .................... ।

14. श्लोकस्य सारार्थं संस्कृते लिखत–

........................................

........................................

........................................

........................................

अवधेयम्–

यान्ति – या धातुः + लट् (कर्तृवाच्ये) प्रपु. बहु.। यथा– पान्ति, वान्ति, द्रान्ति।

◆◆◆

www.thearyasamaj.org

## षष्ठः पाठः – शीलसंरक्षणम्

**श्लोकः**

वरं शृङ्गोत्सङ्गाद्गुरुशिखरिणः क्वापि विषमे
पतित्वाऽयं कायः कठिनदृषदन्ते विगलितः।
वरं न्यस्तो हस्तः फणिपतिमुखे तीक्ष्णदशने
वरं वह्नौ पातस्तदपि न कृतः शीलविलयः॥ 74 ॥

**पदच्छेदः**

वरम् शृङ्ग-उत्सङ्गात् गुरु-शिखरिणः क्व अपि विषमे
पतित्वा अयम् कायः कठिन-दृषत्-अन्ते विगलितः।
वरम् न्यस्तः हस्तः फणि-पति-मुखे तीक्ष्ण-दशने
वरम् वह्नौ पातः तत्-अपि न कृतः शील-विलयः॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| वरम् | अव्ययम् | हस्तः | अ. पुं. प्र. एक. |
| शृङ्गोत्सङ्गात् | अ. पुं. पं. एक. समस्तम् | फणि-पति-मुखे | अ. नपुं. सप्त. एक. समस्तम् |
| गुरुशिखरिणः | न. पुं. षष्ठी एक. समस्तम् | तीक्ष्णदशने | अ. नपुं. सप्त. एक. वि. समस्तम् |
| क्व, अपि | अव्यये | वरम् | अव्ययम् |
| विषमे | अ. नपुं. सप्त. एक. वि. | वह्नौ | इ. पुं. सप्त. एक. |
| पतित्वा | अव्ययम्, क्त्वाप्रत्ययान्तम् | पातः | अ. पुं. प्र. एक. |
| अयम् | इदम्- म. पुं. प्र. एक. सर्व. | तदपि | अव्ययम् |
| कायः | अ. पुं. प्र. एक. | न | अव्ययम् |
| कठिनदृषदन्ते | अ. नपुं. सप्त. एक. समस्तम् | कृतः | अ. पुं. प्र. एक. क्तप्रत्ययान्तपदम् |
| विगलितः | अ. पुं. प्र. एक. क्तान्तपदम् | शीलविलयः | अ. पुं. प्र. एक. समस्तम् |
| वरम् | अव्ययम् | | |
| न्यस्तः | अ. पुं. प्र. एक. क्तप्रत्ययान्तपदम् | | |

www.thearyasamaj.org



## आकाङ्क्षा

वरम् ।

| | |
|---|---|
| किम् वरम् ? | अयं कायः गुरुशिखरिणः शृङ्गोत्सङ्गात् क्वापि विषमे कठिनदृषदन्ते पतित्वा विगलितः (चेद्) अपि वरम् । |
| पुनश्च किं वरम् ? | तीक्ष्णदशने फणिपतिमुखे हस्तः न्यस्तः (चेद् अपि) वरम् । |
| पुनश्च किं वरम् ? | वह्नौ पातः, तदपि वरम् । |
| किन्तु किं न कृतः (चेत्) वरम् ? | शीलविलयः न कृतः (चेत्) वरम् । |

## अन्वयः

अयं कायः गुरुशिखरिणः शृङ्गोत्सङ्गात् क्वापि विषमे कठिनदृषदन्ते पतित्वा विगलितः (चेद् अपि) वरम् । तीक्ष्णदशने फणिपतिमुखे हस्तः न्यस्तः (चेत् अपि) वरम्, वह्नौ पातः, तदपि वरम्, (किन्तु) शीलविलयः कृतः (चेत्) न वरम् ।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| अयम् | एषः | यह | this |
| कायः | शरीरम् | शरीर | body |
| गुरुशिखरिणः | उन्नतपर्वतस्य | ऊँचे पर्वत के | of higher mountain |
| शृङ्गोत्सङ्गात् | शिखराग्रभागात् | शिखर के अग्रभाग से | from front of top |
| क्व अपि | कुत्रचिदपि | कहीं भी | anywhere |
| विषमे | असमतले | असमतल | uneven |
| कठिनदृषदन्ते | कठोरशिलामध्ये | कठोर शिला के मध्य में | midst of hard rocks |
| पतित्वा | निपत्य | गिरकर | falling |
| विगलितः | खण्डितः स्यात् | खण्ड-खण्ड हो जाये | broken in pieces |
| वरम् | ईषत् प्रियम् | यह अच्छा है | it is better |
| तीक्ष्णदशने | उग्रदंष्ट्रे | तीक्ष्ण दन्त वाले | sharp teeth |
| फणि-पति-मुखे | सर्पराजवक्त्रे | शेषनाग के मुख में | in mouth of king of snakes |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| न्यस्तः | निक्षिप्तः | रखा गया | put |
| हस्तः | करः | हाथ | hand |
| वरम् | मनाक् प्रियम् | थोड़ा ठीक है | is better |
| वह्नौ | कृशानौ | अग्नि में | in fire |
| पातः | पतनम् (शरीरस्य) | (शरीर का) गिरना भी | falling (of body) |
| वरम् | प्रियम् | ठीक है | is better |
| तदपि | किन्तु | फिर भी | but |
| शीलविलयः | सदाचारस्य विनाशः | सदाचार का विनाश | loss of good conduct |
| कृतः (चेद्) | विहितः (चेद्) | किया गया (तो) | done (if) |
| न वरम् | न शोभनम् | अच्छा नहीं है | is not appreciable |

## भावार्थः

**संस्कृतम्–** इदं शरीरं महतः पर्वतस्य शृङ्गाग्रभागात् पतित्वा विषमे शिलामध्ये खण्डितं भवेत्, तत् शोभनम्; तीक्ष्णदशने सर्पराजमुखे हस्तनिक्षेपोऽपि वरम्; अग्नौ शरीरनिक्षेपोऽपि मनाक् उचितः; किन्तु शीलस्य विनाशः कृतश्चेत् तत् वरं नास्ति। अन्य विधकष्टानि कथञ्चित् सह्यानि भवन्ति। किन्तु शीलविनाशः सर्वथा सह्यः न भवति। अतः सर्वप्रयत्नेन शीलं रक्षणयीम् इति भावः।

**हिन्दी–** ऊँचे पर्वत के अग्रभाग से असमतल कठोर शिला के मध्य में गिरकर यह शरीर खण्ड-खण्ड हो जाये यह अच्छा है, तीक्ष्ण दाँतों वाले सर्पराज के मुख में हाथ डालना उचित है, वह्नि में शरीर को डाल देना अच्छा है, किन्तु यदि शील का नाश किया तो यह अच्छा नहीं है। अन्य प्रकार की विपत्तियाँ किसी भी तरह सह सकते हैं, किन्तु शीलविनाश सर्वथा सह्य नहीं। अतः शीलसंरक्षण करना चाहिए।

**आङ्ग्लम्–** It is better that this body may scatter into pieces by falling on uneven and hard stony part of mountain; it is better to put the body into fire; it is better to put the hand in mouth of king of snakes whose teeth are very sharp. But in any circumstances, the loss of good conduct is not appreciable.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

शृङ्गोत्सङ्गाद्गुरुशिखरिणः – शृङ्ग + उत्सङ्गात् (गुणसन्धिः)

www.thearyasamaj.org



| | | |
|---|---|---|
| | | गुरुशिखरिणः (जश्त्वसन्धिः) |
| क्वापि | – | क्व + अपि (दीर्घसन्धिः) |
| न्यस्तो हस्तः | – | न्यस्तः + हस्तः (विसर्गसन्धिः) |
| पातस्तदपि | – | पातः + तदपि (विसर्गसन्धिः) |
| पतित्वाऽयम् | – | पतित्वा + अयम् (स.दी.सन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| शृङ्गोत्सङ्गात् | – | शृङ्गस्य उत्सङ्गः (षष्ठीतत्पु.) तस्मात् |
| गुरुशिखरिणः | – | गुरुश्चासौ शिखरः गुरुशिखरः (गुरुशिखर + इनि = गुरुशिखरिन्) अस्य षष्ठी एक. (कर्मधारयः) यथा– उन्नतशृङ्गिणः |
| कठिनदृषदन्ते | – | कठिनाः दृषदः - कठिनदृषदः (कर्मधारयः) कठिनदृषदाम् अन्तः, कठिनदृषदन्तः (षष्ठीतत्पु.) तस्मिन् |
| फणिपतिमुखे | – | फणिनां पतिः फणिपतिः (षष्ठीतत्पु.) फणिपतेः मुखम् फणिपतिमुखम् (षष्ठीतत्पु.) तस्मिन् |
| तीक्ष्णदशने | – | तीक्ष्णं च तत् दशनम् तीक्ष्णदशनं (कर्मधारयः), तस्मिन् |
| शीलविलयः | – | शीलस्य विलयः (षष्ठीतत्पु.) |

**(ग) प्रत्ययः**

| | | |
|---|---|---|
| पतित्वा | – | पत् + क्त्वा – प्रत्ययः (समानकर्तृकयोः पूर्वकाले इति नियमः) यथा– खादित्वा, पठित्वा, हसित्वा। |
| विगलितः | – | वि✓गल् + क्तः |
| न्यस्तः | – | नि✓अस् + क्तः |

**(ii) पर्यायवाची**

| | | |
|---|---|---|
| शृङ्गम् | – | कूटः, शिखरम् |

www.thearyasamaj.org



| | | |
|---|---|---|
| शीलम् | – | चरितम्, स्वभावः, सद्वृत्तिः |
| दृषत् | – | शिला, पाषाणः, उपलः, अश्मा, प्रस्तरः |
| फणिपतिः | – | सर्पराजः, शेषः, नागराजः |
| दशनम् | – | दन्तः, द्विजः, दंष्ट्रम् |
| (iii) छन्दः | – | शिखरिणीछन्दः |

## अभ्यासः – 24
### श्लोकः – 74

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

वरं शृङ्गोत्सङ्गाद् .................... क्वापि विषमे
.................... कायः कठिनदृषदन्ते .................... ।
.......... .......... हस्तः ..........मुखे ..........दशने
वरं .......... पातस्तदपि .......... .......... शीलविलयः ॥

2. **सन्धिं विसन्धिं वा कुरुत–**

(i) शृङ्गोत्सङ्गाद्गुरुशिखरिणः – ....................
(ii) पतित्वाऽयम् – ....................
(iii) कठिन-दृषत् अन्ते क्व अपि – ....................
(iv) पातः तत् अपि न – ....................

3. **प्रथमान्तपदानि सङ्कलय्य लिखत–**

.................... .................... ....................
.................... .................... ....................

4. **सप्तम्यन्तपदानि अधो लिखत–**

.................... .................... .................... ....................
....................

www.thearyasamaj.org



5. अव्ययपदानि अधो लिखत–

........................ ........................ ........................ ........................

........................ ........................ ........................ ........................

6. क्तप्रत्ययान्तक्रियापदानि अधो लिखत–

........................ ........................ ........................ ........................

7. उत्तरं लिखत–

(i) गुरुशिखरिणः शृङ्गं कीदृशं वर्णितम् ?

................................................................................................

(ii) कुत्र शरीरं विगलितं चेद् वरं भवति ?

................................................................................................

(iii) कुत्र हस्तनिक्षेपः वरम् ?

................................................................................................

(iv) कस्य रक्षणाय अत्र कविः सन्दिशति ?

................................................................................................

8. पदपरिचयं लिखत–

(i) शृङ्गोत्सङ्गात् – ........................................................

(ii) क्व अपि – ........................................................

(iii) कठिनदृषदन्ते – ........................................................

(iv) शीलविलयः – ........................................................

www.thearyasamaj.org



9. विशेष्यं लिखत–

| | विशेषणम् | | विशेष्यम् |
|---|---|---|---|
| (i) | विषमे | – | .................... |
| (ii) | तीक्ष्णदशने | – | .................... |

10. सन्धिं कृत्वा लिखत–

(i) इदम् + तत् + धनम् + अस्ति – ....................

(ii) अयम् + क्व + अपि पतित्वा + उत्तिष्ठतु – ....................

(iii) अनेन + अपि शीलविलयः + कृतः + वा – ....................

(iv) एषस् + न्यस्तः + हस्तः कस्य – ....................

11. यथोचितं योजयत–

| | | | |
|---|---|---|---|
| (i) | विषमे | (क) | फणिपतिमुखे |
| (ii) | विगलितः | (ख) | शीलविलयः |
| (iii) | न्यस्तः | (ग) | कठिनदृषदन्ते |
| (iv) | तीक्ष्णदशने | (घ) | हस्तः |
| (v) | न कृतः | (ङ) | कायः |

12. प्रश्नानामुत्तराणि दत्त–

(i) कुतः पतित्वा कायः विगलितः चेद् वरम् ?

....................

(ii) हस्तः कुत्र न्यस्तश्चेद् वरम् ?

....................

(iii) वह्नौ कस्य पातः वरम् ?

....................

www.thearyasamaj.org



(iv) न कृतश्चेद् वरं कः ?

..........................................................

13. रेखाङ्कितपदानां समस्तपदं लिखत–

(i) याजकः सुराणां पत्युः मुखे जुहोति – ..........................

(ii) अयं शिखरस्य अग्रः, तस्मात् पतति – ..........................

(iii) एते तीक्ष्णाः दन्ताः सन्ति – ..........................

(iv) बालकः कठोराः शिलाः, तस्याः मध्ये पतितः – ..........................

14. यथानिर्देशं प्रत्ययं संयोज्य निष्पन्नरूपेण वाक्यं पूरयत–

(i) इदं शरीरं हिमे न .......................... । (वि✓गल् + क्त)

(ii) अयं जनः अत्र .......................... यातु । (भुज् + क्त्वा)

(iii) मम कार्यं त्वया .......................... चेद् वरम् । (कृ + क्त)

(iv) अधुना अन्नं .......................... भवेत् । (पच् + क्त)

(v) नृपं .......................... जनाः यान्ति । (दृश् + तुमुन्)

(vi) त्वं सुन्दरं कार्यं .......................... आगतः । (वि✓धा + क्त्वा)

(vii) .................... .................... मम उदरम् उत्फुल्लम् । (हस् + क्त्वा)

(viii) अयं ग्रन्थः तेन तत्र .......................... । (नि✓अस् + क्तः)

15. सन्धिं विसन्धिं वा कुरुत–

(i) शिखरिणः + क्व + अपि – ..........................

(ii) तस्मात् + धनम् + आदाय – ..........................

(iii) वरम् + न्यस्तः + हस्तः – ..........................

(iv) पातस्तदपि – ..........................

(v) कठिनदृषदन्ते पतित्वा – ..........................

www.thearyasamaj.org



16. विग्रहवाक्येन वाक्यं पूरयत–

(i) सुरपतिमस्तके – .................. .................. मणिः अस्ति ।

(ii) उन्नतपर्वतशिखरात् – .................. .................. सः अपतत् ।

(iii) सर्पतीक्ष्णदशने – .................. .................. हस्तनिक्षेपः मरणाय अस्ति ।

(iv) कठोरशिलामध्ये – .................. .................. जलबिन्दवः पतिताः न दृश्यन्ते ।

17. रेखाङ्कितपदानां पर्यायशब्दैः वाक्यानि लिखत–

(i) <u>शिखराग्रात्</u> पतित्वाऽपि जीवति । – ..................................

(ii) <u>चरित</u>विलयः कदापि न शोभनः । – ..................................

(iii) अत्र बह्व्यः <u>शिलाः</u> पतन्ति । – ..................................

(iv) <u>फणिपतिः</u> सर्पाणां राजा भवति । – ..................................

(v) अस्य <u>दन्ताः</u> शुभ्राः सन्ति । – ..................................

18. कविः अस्मिन् श्लोके किं सन्दिशति इति संस्कृतभाषया लिखत–

..................................................................................

..................................................................................

..................................................................................

..................................................................................

◆◆◆

www.thearyasamaj.org



श्लोकः

**वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणात्-**
**मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते।**
**व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते**
**यस्याङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ 75 ॥**

पदच्छेदः

वह्निः तस्य जलायते जलनिधिः कुल्यायते तत्-क्षणात्
मेरुः स्वल्प-शिलायते मृगपतिः सद्यः कुरङ्गायते।
व्यालः माल्यगुणायते विषरसः पीयूष-वर्षायते
यस्य अङ्गे अखिल-लोकवल्लभतमम् शीलम् समुन्मीलति ॥

पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| वह्निः | इ. पुं. प्र. एक. | व्यालः | अ. पुं. प्र. एक. |
| तस्य | तद्- द. पुं. षष्ठी एक. सर्व. | माल्यगुणायते | माल्यगुणाय + लट्, प्रपु. एक. (नामधातुक्रियापदम्) |
| जलायते | जलाय + लट्, प्रपु. एक. (नामधातुक्रियापदम्) | विषरसः | अ. पुं. प्र. एक. |
| जलनिधिः | इ. पुं. प्र. एक. समस्तम् | पीयूषवर्षायते | पीयूषवर्षाय + लट्, प्रपु. एक. (नामधातुक्रियापदम्) |
| कुल्यायते | कुल्याय + लट्, प्रपु. एक. (नामधातुक्रियापदम्) | यस्य | यत्- द. पुं. षष्ठी एक. सर्व. |
| तत्क्षणात् | अव्ययम् | | |
| मेरुः | उ. पुं. प्र. एक. | अङ्गे | अ. नपुं. सप्त. एक. |
| स्वल्पशिलायते | स्वल्पशिलाय + लट्, प्रपु. एक. (नामधातुक्रियापदम्) | अखिललोकवल्ल-भतमम् | अ. नपुं. प्र. एक. (तद्धितान्तवि.) |
| मृगपतिः | इ. पुं. प्र. एक. समस्तम् | शीलम् | अ. नपुं. प्र. एक., विशेष्यम् |
| सद्यः | अव्ययम् | समुन्मीलति | सम् + उत्√मील् + लट्, प्रपु. एक. (तिङन्तक्रियापदम्) |
| कुरङ्गायते | कुरङ्गाय + लट्, प्रपु. एक. (नामधातुक्रियापदम्) | | |

www.thearyasamaj.org



## आकाङ्क्षा

**समुन्मीलति ?**

| | |
|---|---|
| किं समुन्मीलति ? | शीलं समुन्मीलति। |
| कीदृशं समुन्मीलति ? | अखिललोकवल्लभतमं शीलं समुन्मीलति। |
| अखिललोकवल्लभतमं शीलं कुत्र समुन्मीलति ? | अखिललोकवल्लभतमं शीलम् अङ्गे समुन्मीलति। |
| कस्य अङ्गे अखिललोकवल्लभतमं शीलं समुन्मीलति ? | यस्य (कस्यचिद्) अङ्गे अखिललोकवल्लभतमं शीलं समुन्मीलति। |
| यस्य अङ्गे अखिललोकवल्लभतमं शीलं समुन्मीलति तस्य (कृते) किम् ? | यस्य (कस्यचिद्) अङ्गे अखिललोकवल्लभतमं शीलं समुन्मीलति तस्य वह्निः जलायते, जलनिधिः तत्क्षणात् कुल्यायते, मेरुः स्वल्पशिलायते, मृगपतिः सद्यः कुरङ्गायते, व्यालः माल्यगुणायते, विषरसः (च) पीयूषवर्षायते। |

## अन्वयः

यस्य अङ्गे अखिललोकवल्लभतमं शीलं समुन्मीलति तस्य (जनस्य पुरः) वह्निः जलायते, जलनिधिः तत्क्षणात् कुल्यायते, मेरुः स्वल्पशिलायते, मृगपतिः सद्यः कुरङ्गायते, व्यालः माल्यगुणायते, विषरसः (च) पीयूषवर्षायते।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| यस्य | जनरत्नस्य | जिस पुरुष-रत्न के | of which person |
| अङ्गे | शरीरे | शरीर में | in body |
| अखिललोकवल्लभतमम् | सकलजनप्रियतमम् | सभी लोगों के लिए अत्यन्त प्रिय | dearest to all |
| शीलम् | सद्वृत्तम् | शील | good character |
| समुन्मीलति | समुल्लसति | प्रकट होता है | manifests |
| तस्य (जनस्य पुरः) | जनस्य (समक्षम्) | उसके (समक्ष) | before him |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| वह्निः | कृशानुः | अग्नि | fire |
| जलायते | जलम् इव आचरति | जल जैसी हो जाती है | acts like water |
| जलनिधिः | उदधिः | सागर | sea |
| तत्क्षणात् | सद्यः एव | उसी क्षण | that moment |
| कुल्यायते | क्षुद्रनदीवदाचरति | नाले जैसा हो जाता है | becomes like streamlet |
| मेरुः | अत्युन्नतमेरुगिरिः | ऊँचा मेरु पर्वत | high *Meru* |
| स्वल्पशिलायते | अल्पपाषाणखण्डायते | छोटी शिला के समान हो जाता है | mountain becomes like small rock |
| मृगपतिः | सिंह | सिंह | lion |
| सद्यः | तत्कालम् | तत्काल | suddenly |
| कुरङ्गायते | मृगवदाचरति/मृगायते | मृग जैसा आचरण करने लगता है | behaves like dear |
| व्यालः | विषधरः | सर्प | snake |
| माल्यगुणायते | पुष्पमाल्यवत् आचरति | पुष्पों की माला जैसा हो जाता है | becomes like garland of flowers |
| विषरसः (च) | गरलद्रवः च | (और) विषरस | (and) poisonous juice |
| पीयूषवर्षायते | अमृतवर्षा इव भवति | अमृतवर्षा के समान हो जाता है | becomes shower nectar |

**भावार्थः**

**संस्कृतम्–** यस्याङ्गे सकलजनप्रीतिकरं सद्वृत्तं प्रकटीभवति, तस्य जनस्य पुरस्तात् अग्निः जलवत् आचरति, सागरः क्षुद्रनदीवत् भवति, अत्युन्नतो मेरुगिरिः तुच्छशिलावद् भवति, सिंहः तत्क्षणं मृग इव आचरति, विषधरः पुष्पमाल्यमिव भवति, विषरसश्च अमृतवर्षा इव भवति।

**हिन्दी–** जिसके शरीर में सर्वजन प्रिय शील प्रकट हो रहा होता है, उसके समक्ष अग्नि जल जैसी हो जाती है, सागर छोटी नदी (नाले) जैसा हो जाता है, अत्यन्त ऊँचा मेरु-पर्वत छोटी शिला जैसा हो जाता है, सिंह तत्काल मृग जैसा आचरण करने लगता है, सर्प फूलों की माला जैसा हो जाता है और विष का रस अमृत वर्षा के समान हो जाता है।

www.thearyasamaj.org



**आङ्ग्लम्–** People loves good character above all. When it manifests in the body of some person, then fire acts like water for him, the sea instantaneously becomes a streamlet, the *Meru mountain* becomes like a small stone, the lion behaves suddenly like deer, the snake becomes like garland of flowers and the poisonous juice becomes like shower of nectar.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

| | | |
|---|---|---|
| वह्निस्तस्य | – | वह्निः + तस्य (विसर्गसन्धिः) |
| यस्याङ्गेखिललोकवल्लभतमम् | – | यस्य + अङ्गे + अखिललोकवल्लभतमम् |
| | | (यस्य + अङ्गे: दीर्घसन्धिः) (अङ्गे + अखिललोकवल्लभतमम्: पूर्वरूपसन्धिः) |

(ख) **समासः**

| | | |
|---|---|---|
| जलनिधिः | – | जलानां निधिः (षष्ठी-तत्पु.) |
| मृगपतिः | – | मृगाणां पतिः (षष्ठी-तत्पु.) |
| विषरसः | – | विषम् एव रसः (कर्मधारयः) |
| अखिललोकवल्लभतमम् | – | अखिलाश्च ते लोकाः, अखिललोकाः (कर्मधारयः) अखिललोकेषु वल्लभतमः (सप्त.तत्पु.) तत् |

(ग) **तद्धितान्तः**

| | | |
|---|---|---|
| जलायते | – | जलम् इव आचरति इत्यर्थे जलशब्दात् कर्तुः क्यङ् सलोपश्च इति क्यङ्-जलाय इति धातुसंज्ञः, अयमेव नामधातुः इति। नाम्ना = प्रातिपदिकेन प्रत्यययोगे सति धातुसंज्ञा जायते। स एव नामधातुः। अस्मिन् - श्लोके षड् नामधातवः प्रयुक्ताः सन्ति। |
| कुल्यायते | – | कुल्या इव आचरति इति - कुल्या + य (क्यङ्) लट्, ङित्त्वादात्मनेपदसंज्ञः प्रत्ययः, प्रपु. एकवचने रूपम् |

www.thearyasamaj.org



| | | |
|---|---|---|
| स्वल्पशिलायते | – | स्वल्पाश्च ताः शिलाः स्वल्पशिलाः, स्वल्पशिलाः इव आचरति - स्वल्पशिला + क्यङ् + लट्, प्रपु. एक. आत्मनेपदम् |
| कुरङ्गायते | – | कुरङ्गः इव आचरति इत्यर्थे - कुरङ्गः + क्यङ् + लट्, प्रथमपुरुषैकवचनम् |
| माल्यगुणायते | – | माल्यगुणः इव आचरति - माल्यगुण + क्यङ् + लट्, प्रपु. एक. |
| पीयूषवर्षायते | – | पीयूष वर्षा इव आचरति - पीयूषवर्षा + क्यङ् + लट्, प्रपु. एक. |
| समुन्मीलति | – | सम्- उत✓मील् + लट्, प्रपु. एक. |

**(ii) पर्यायशब्दाः**

| | | |
|---|---|---|
| कुल्या | – | कृत्रिमा सरित्, क्षुद्रा नदी |
| व्यालः | – | सर्पः, फणी, नागः, विषधरः |
| पीयूषम् | – | अमृतं, सुधा |
| मृगपतिः | – | सिंहः, केसरी, मृगेन्द्रः, कण्ठीरवः, मृगाधिपः |

**(iii) छन्दः** – शार्दूलविक्रीडितम्

**(iv) अलङ्कारः** – औपम्यप्रतीतेः उपमानामकोऽलङ्कारः

---

## अभ्यासः – 25
## श्लोकः – 75

1. **श्लोकं पूरयत–**

वह्निस्तस्य .................... जलनिधिः .................... तत्....................
.................... स्वल्पशिलायते .................... सद्यः .................... ।
.................... माल्यगुणायते .................... पीयूषवर्षायते
यस्याऽङ्गेऽखिल .................... .................... समुन्मीलति ॥

www.thearyasamaj.org



2. यथोचितं सन्धिं विसन्धिं वा कुरुत–

(i) वह्निस्तस्य – ..........

(ii) यस्याङ्गे – ..........

(iii) सम् उत् मीलति – ..........

(iv) तत् क्षणात् मेरुः – ..........

3. प्रथमान्तपदानि सङ्कलय्य लिखत–

.......... .......... .......... ..........

.......... .......... ..........

4. नामधातुक्रियापदानि अधो लिखत–

.......... .......... .......... ..........

.......... ..........

5. समाधत्त–

(i) सद्वृत्तस्य पुरः वह्निः कीदृक् भवति ?

..........

(ii) शीलवतः पुरस्तात् कः माल्यगुणायते ?

..........

(iii) कीदृशं शीलभङ्गे समुन्मीलति ?

..........

(iv) कः पीयूषवर्षायते ?

..........

6. पदपरिचयं दत्त–

यथा– (i) जलनिधिः – इ. पुं. प्र. एक., समस्तम्

www.thearyasamaj.org



(ii) कुल्यायते – ........................

(iii) मृगपतिः – ........................

(iv) समुन्मीलति – ........................

7. शीलरक्षणे के लाभाः सन्ति इति सम्यक् वर्णयत–

........................

........................

........................

........................

8. कोष्ठके प्रदत्तपदान् वाक्ये प्रयोगं कुरुत–

| प्रस्तरखण्डायते, नदीयते, अमृतायते, माल्यायते |
|---|

(i) सतां समक्षम् अम्बुधिः ........................

(ii) शीलवतां समक्षं हिमालयः ........................

(iii) सदाचरणवतः पुरः नागः ........................

(iv) भगवतः कृपया गरलम् ........................

9. विग्रहवाक्यं समस्तं पदं वा लिखत–

(i) रत्ननिधिः – ........................

(ii) पशुपतिः – ........................

(iii) अमृतम् एव रसः – ........................

(iv) सकललोकानां प्रियतमः – ........................

10. क्यङ्प्रत्ययं संयोज्य रूपं लिखत–

(i) कृष्ण इव आचरति – ........................

(ii) अमृतवर्षा इव आचरति – ........................

www.thearyasamaj.org



(iii) विषम् इव आचरति – ..............................

(iv) जलनिधिः इव आचरति – ..............................

**11. प्रश्नानाम् उत्तराणि देयानि–**

(i) कः सद्वृत्तस्य पुरः तत्क्षणात् कुल्यायते ? ..............................

(ii) सद्यः शीलवतः कः कुरङ्गायते ? ..............................

(iii) व्यालः कं इव आचरति ? ..............................

(iv) यस्याङ्गे शीलं तस्य विषरसः क इव भवति ? ..............................

**12. समुचितं योजयत–**

| | | | |
|---|---|---|---|
| (i) | जलायते | (क) | मृगपतिः |
| (ii) | कुल्यायते | (ख) | वह्निः |
| (iii) | स्वल्पशिलायते | (ग) | जलनिधिः |
| (iv) | कुरङ्गायते | (घ) | मेरुः |

**13. यथोचितं सन्धिं विसन्धिं वा कृत्वा लिखत–**

(i) तस्य जनस्य वह्निः + जलायते – ..............................

(ii) व्यालः + तत्र तिष्ठति – ..............................

(iii) यस्य अङ्गे अखिलाः गुणाः + सन्ति – ..............................

(iv) तत्क्षणात् + मेरुः + अल्पायते – ..............................

(v) व्यालस्तत्रासीनोऽस्ति – ..............................

**14. कोष्ठकस्थ-पदान् वाक्ये प्रयोगं कुरुत–**

| कृष्णायते, तूलायन्ते, कोमलायते, शृगालायते, व्याघ्रायते, देवायते |
|---|

(i) सतां कृते प्रस्तराः ..............................

(ii) त्वमधुना वेषेण ..............................

www.thearyasamaj.org



(iii) वृकः आखेटकानां पुरः ..........................

(iv) पशुपतिप्रभावात् सिंहः ..........................

(v) अहं तव प्रसादात् ..........................

(vi) हरिणी देवकृपया ..........................

15. अस्य श्लोकस्य आशयं संस्कृतेन लिखत–

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्रः।**
**इति विमृशन्तः सन्तः सन्तप्यन्ते न विश्लथेषु लोकेषु* ॥ 76 ॥**

**पदच्छेदः**

छिन्नः अपि रोहति तरुः क्षीणः अपि उपचीयते पुनः चन्द्रः।
इति विमृशन्तः सन्तः सन्तप्यन्ते न विश्लथेषु लोकेषु ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| छिन्नः | अ. पुं. प्र. एक. (कृदन्तपदम्) | चन्द्रः | अ. पुं. प्र. एक. (कर्तृपदम्) |
| अपि | अव्ययम् | इति | अव्ययम् |
| रोहति | रुह् + लट्, प्रपु. एक. (तिङन्तक्रियापदम्) | विमृशन्तः | त. पुं. प्र. बहु. वि. (शत्रन्तं पदम्) |
| तरुः | उ. पुं. प्र. एक. (कर्तृपदम्) | सन्तः | त. पुं. प्र. बहु. (कर्तृपदम्) |
| क्षीणः | अ. पुं. प्र. एक. (कृदन्तपदम्) | सन्तप्यन्ते | सम् + तप् + लट् प्रपु. बहु. आत्मने. |
| अपि | अव्ययम् | | |
| उपचीयते | उप✓चि + लट्, प्रपु. एक. (तिङन्तक्रियापदम्) | न | अव्ययम् |
| | | विश्लथेषु | अ. पुं. सप्त. बहु. वि. |
| पुनः | अव्ययम् | लोकेषु | अ. पुं. सप्त. बहु. वि. |

**आकाङ्क्षा**

**न सन्तप्यन्ते।**

| | |
|---|---|
| के न सन्तप्यन्ते ? | सन्तः न सन्तप्यन्ते। |
| कीदृशाः सन्तः न सन्तप्यन्ते ? | विमृशन्तः सन्तः न सन्तप्यन्ते। |
| किं विमृशन्तः सन्तः न दृश्यन्ते ? | छिन्नः अपि तरुः रोहति, क्षीणः अपि चन्द्रः पुनः उपचीयते इति विमृशन्तः सन्तः न सन्तप्यन्ते। |

* 'ते विपदा लोकेषु' इति पाठान्तरम्।

www.thearyasamaj.org



| | |
|---|---|
| छिन्न अपि तरुः रोहति, ............इति विमृशन्तः सन्तः केषु न सन्तप्यन्ते ? | छिन्न अपि ............इति विमृशन्तः सन्तः लोकेषु विश्लथेषु न सन्तप्यन्ते। |

**अन्वयः**

छिन्नः अपि तरुः रोहति, क्षीणः अपि चन्द्रः पुनः उपचीयते इति विमृशन्तः सन्तः विश्लथेषु लोकेषु न सन्तप्यन्ते।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| छिन्नः अपि | कृत्तः अपि | कटा हुआ भी | though cut down |
| तरुः | वृक्षः | पेड़ | tree |
| रोहति | वर्धते | बढ़ जाता है | grows |
| क्षीणः अपि | (कृष्णपक्षे) कृशः सन्नपि | (कृष्ण पक्ष में) क्षीण होता हुआ भी | feeble (in *Kṛśṇa Paksha*) |
| चन्द्रः | विधुः | चन्द्रमा | moon |
| पुनः | वारम्वारम् | फिर से | again |
| उपचीयते | वृद्धिं गच्छति | बढ़ जाता है | increases |
| इति | तरुचन्द्रयोः रोहणं वृद्धिं च | वृक्ष और चन्द्र के बढ़ने का | growing of tree & moon |
| विमृशन्तः | विचारयन्तः | विचार करते हुए | thinking on this |
| सन्तः | सज्जनाः | सत्पुरुष | good persons |
| विश्लथेषु | विश्लिष्टेषु | विश्लिष्ट हुए | on afflicted |
| लोकेषु | बन्धुजनेषु | बन्धुजनों पर | relatives |
| न सन्तप्यन्ते | न परितप्यन्ते | दुःखी नहीं होते हैं | never agitate |

**भावार्थः**

**संस्कृतम्**– कर्तितोऽपि वृक्षः पुनरुद्भवति वर्धते वा, कृष्णपक्षो प्रत्यहं कृशतां प्राप्तः चन्द्रोऽपि पुनः वर्धते इति दृष्टान्तः द्वयमवलोकयन्तः सन्तः बन्धुजनेषु वियुक्तेषु न सन्तापं कुर्वन्ति।

www.thearyasamaj.org



**हिन्दी–** कटा हुआ वृक्ष भी पुनः बढ़ जाता है तथा क्षीण चन्द्रमा भी फिर से बढ़ जाता है, ऐसा सोचते हुए श्रेष्ठ पुरुष बन्धुजनों के विश्लिष्ट होने पर भी सन्तप्त नहीं होते।

**आङ्ग्लम्–** A tree though cut down grows again, feeble moon waxes again, thinking upon this the good people do not agitate even in affliction of their relatives.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

| | | |
|---|---|---|
| छिन्नोऽपि | – | छिन्नः + अपि (विसर्गस्थानिकरेफस्य उत्वं, गुणः पूर्वरूपश्च भवन्ति) |
| क्षीणोऽप्युपचीयते | – | क्षीणः + अपि + उपचीयते (उत्वं, गुणः, पूर्वरूपम्, यण् च भवन्ति) |
| पुनश्चन्द्रः | – | पुनः + चन्द्रः (विसर्गस्य सकारः, सकारस्य श्चुत्वेन शकारः श्चुत्वसन्धिः) यथा– रामः + च = रामश्च, पुनः + च = पुनश्च |
| सन्तः सन्तप्यन्ते | – | सन्तः + सन्तप्यन्ते (सकारे परे पूर्वविसर्गस्य विसर्ग एव भवति, विसर्गसन्धिरयम्) |

#### (ख) कृदन्तः

| | | |
|---|---|---|
| छिन्नः | – | छिद् धातुः + क्त-प्रत्ययः, तकारदकारयोः नकारः यथा– भिन्नः, नुन्नः। |
| क्षीणः | – | क्षि धातुः + क्तः, तस्य नत्वम्, धातोरिकारस्य दीर्घः, नस्य णत्वम्। |
| विमृशन्तः | – | वि√मृश् + शतृ-प्रत्ययः = विमृशत्, प्र. बहु. |
| रोहति | – | रुह्धातुः, लट् लकारः, प्रपु. एक. |
| उपचीयते | – | उपचि + लट् (कर्मकर्तरि) यक्, आत्मने., प्रपु. एक. |

www.thearyasamaj.org



सन्तप्यन्ते – सम्√तप् + लट्, श्यन्-विकरणः, आत्मनेपदे प्रपु. बहु.

(ग) कारकः

विश्लथेषु लोकेषु – "यस्य च भावेन भावलक्षणम्" इति सप्तमी।

(ii) पर्यायशब्दाः

तरुः – विटपः, पादपः, वृक्षः

(iii) छन्दः – आर्या

---

## अभ्यासः – 26

## श्लोकः – 76

1. श्लोकं पूरयत–

........................ रोहति ........................ ........................ पुनश्चन्द्रः।

इति विमृशन्तः ........................ ........................ ........................ विश्लथेषु लोकेषु॥

2. सन्धिं विसन्धिं वा कुरुत–

(i) छिन्नोऽपि – ........................

(ii) पुनश्चन्द्रः – ........................

(iii) क्षीणः अपि उपचीयते – ........................

(iv) विमृशन्तः सन्तः सन्तप्यन्ते – ........................

3. कर्तृपदानि लिखत–

........................ ........................ ........................

4. कृदन्त-विशेषणपदानि लिखत–

........................ ........................ ........................ ........................

www.thearyasamaj.org



5. सप्तम्यन्तपदे लेख्ये–

.................... ....................

6. तिङन्तक्रियापदानि लिखत–

.................... .................... ....................

7. समाधत्त–

(i) कीदृशः तरुः पुनः रोहति ? ....................

(ii) कः पुनः उपचीयते ? ....................

(iii) किं विमृशन्तः सन्तः न सन्तप्यन्ते ? ....................

8. उपयुक्तपदेन रिक्तस्थानं पूरयत–

**विचारयन्तः, क्षीणः, छिन्नः**

(i) .................... शशी पुनः उपचयं प्राप्नोति।

(ii) .................... शाखी पुनः रोहति।

(iii) .................... सन्तः न सन्तप्यन्ते।

9. पदपरिचयं दत्त–

(i) छिन्नः – ....................

(ii) चन्द्रः – ....................

(iii) विश्लथेषु – ....................

(iv) सन्तप्यन्ते – ....................

10. सन्धिं विसन्धिं वा कुरुत–

(i) गतः अपि रामः पुनः + आगतः – ....................

(ii) पुनः पुनः चन्द्रः वर्धते – ....................

www.thearyasamaj.org



(iii) सन्तोऽप्यागच्छन्ति – ........................

(iv) क्षीणोऽप्युपचीयते – ........................

11. **प्रकृतिप्रत्ययविभागं कुरुत–**

(i) लूनः – ........................

(ii) हीनः – ........................

(iii) भिन्नः – ........................

(iv) क्षीणः – ........................

(v) विमृशन् – ........................

(vi) रोहति – ........................

12. **शुद्धम् ☑ अशुद्धम् ☒ वा इति निर्दिशत–**

(i) कृत्तोऽपि वृक्षः न वर्धते – ☐

(ii) कृत्तोऽपि वृक्षः पुनः रोहति – ☐

(iii) क्षीणतां प्राप्तचन्द्रः न उपचीयते – ☐

(iv) क्षीणतः प्राप्तोऽपि चन्द्रः उपचीयते – ☐

(v) विपत्तौ सन्तः तप्यन्ते – ☐

(vi) विपत्तौ अपि सन्तः न सन्तप्यन्ते – ☐

13. **प्रदत्तपदानां यथोचितं वाक्ये प्रयोगं कुरुत–**

(i) तरवः ........................ अपि रोहन्ति। (छिन्नः / छिन्नाः)

(ii) चन्द्रमाः ........................ उपचीयते। (कृष्णपक्षे / शुक्लपक्षे)

(iii) धीराः जनाः ........................ न सन्तप्यन्ते। (कष्टेषु सत्सु / कष्टे सतः)

(iv) अहं ........................ कार्यं करोमि। (विमृशन्तः / विमृशन्)

14. **सतिसप्तमी-प्रयोगं ध्यानेन अवलोकयत–**

(i) कक्षायाम् अध्यापके आगते छात्राः उत्तिष्ठन्ति।

www.thearyasamaj.org



(ii) सैनिकेषु आगतेषु शत्रवः पलायिताः।

(iii) सूर्ये अस्तङ्गते चन्द्रः उदेति।

**15. उपयुक्तविभक्तिं योजयित्वा वाक्यं पूरयत–**

| | | | | |
|---|---|---|---|---|
| (i) | दृष्टायां | जनन्यां | शिशुः प्रसन्नः अभवत्। | (दृष्टा-जननी) |
| (ii) | ........ | ........ | गोपः गतः। | (गो-दुह्यमान) |
| (iii) | ........ | ........ | नलिनी विकसति। | (उदित-चन्द्र) |
| (iv) | ........ | ........ | नक्षत्राणि न दृश्यन्ते। | (आविर्भूत-सूर्य) |

**16. (i) उपचि इत्यस्य रूपाणि लटि आत्मनेपदे लिखत–**

| | | | |
|---|---|---|---|
| प्रपु. | उपचीयते | ........ | ........ |
| मपु. | ........ | ........ | ........ |
| उपु. | ........ | ........ | ........ |

**(ii) रुह् धातोः रूपाणि लिखत-लट्लकारे–**

| | | | |
|---|---|---|---|
| प्रपु. | रोहति | ........ | ........ |
| मपु. | ........ | ........ | ........ |
| उपु. | ........ | ........ | ........ |

**17. श्लोकस्य भावार्थं संस्कृतभाषया लिखत–**

........................................

........................................

........................................

........................................

........................................

◆◆◆

www.thearyasamaj.org



श्लोकः

**ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो**
**ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ।**
**अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता**
**सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥ 77 ॥**

पदच्छेदः

ऐश्वर्यस्य विभूषणम् शौर्यस्य वाक्-संयमः
ज्ञानस्य उपशमः श्रुतस्य विनयः वित्तस्य पात्रे व्ययः ।
अक्रोधः तपसः क्षमा प्रभवितुः धर्मस्य निर्-व्याजता
सर्वेषाम् अपि सर्वकारणम् इदम् शीलम् परम् भूषणम् ॥

पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| ऐश्वर्यस्य | अ. नपुं. षष्ठी एक. तद्धितान्तम् | वित्तस्य | अ. नपुं. षष्ठी एक. |
| विभूषणम् | अ. नपुं. प्र. एक. कृदन्तम् | पात्रे | अ. नपुं. सप्त. एक. |
| सुजनता | आ. स्त्री. प्र. एक. तद्धितान्तम् | व्ययः | अ. पुं. प्र. एक. |
| शौर्यस्य | अ. नपुं. षष्ठी एक. तद्धितान्तम् | अक्रोधः | अ. पुं. प्र. एक. समस्तम् |
| वाक्संयमः | अ. पुं. प्र. एक. समस्तम् | तपसः | तपस्- सप्त. नपुं. षष्ठी एक. |
| ज्ञानस्य | अ. नपुं. षष्ठी एक. कृदन्तम् | क्षमा | आ. पुं. प्र. एक. |
| उपशमः | अ. पुं. प्र. एक. | प्रभवितुः | प्रभवितृ- ऋ. पुं. षष्ठी एक. कृदन्तम् |
| श्रुतस्य | अ. नपुं. षष्ठी एक. | निर्व्याजता | आ. स्त्री. प्र. एक. तद्धितान्तम् |
| विनयः | अ. पुं. प्र. एक. | सर्वेषाम् | अ. पुं. षष्ठी बहु. सर्व. |

आकाङ्क्षा

**परं भूषणम् (अस्ति) ।**

किं परं भूषणम् अस्ति ? शीलं परं भूषणम् अस्ति ।

कीदृशं शीलं परं भूषणम् अस्ति ? सर्वेषाम् अपि सर्वकारणम् इदं शीलं परं भूषणम् अस्ति ।

www.thearyasamaj.org



| | |
|---|---|
| विभूषणम् (अस्ति) | |
| कस्य कस्य विभूषणं किं किम् ? | |
| केषां सर्वकारणम् इदं शीलं परं भूषणम् अस्ति ? | ऐश्वर्यस्य विभूषणं सुजनता, शौर्यस्य विभूषणं वाक्संयमः, ज्ञानस्य विभूषणम् उपशमः, श्रुतस्य विभूषणं विनयः, वित्तस्य पात्रे व्ययः, तपसः अक्रोधः, प्रभवितुः क्षमा, धर्मस्य विभूषणं निर्व्याजता। अत्रोक्तानां सर्वेषां [सुजनता-वाक्संयम-उपशम-विनय-अक्रोध-क्षमा-निर्व्याजतानां] सर्वकारणम् इदं शीलं परं भूषणम् अस्ति। |

## अन्वयः

ऐश्वर्यस्य विभूषणं सुजनता (अस्ति), शौर्यस्य वाक्संयमः, ज्ञानस्य उपशमः, श्रुतस्य विनयः, वित्तस्य पात्रे व्ययः, तपसः अक्रोधः, प्रभवितुः क्षमा, धर्मस्य निर्व्याजता (च विभूषणम् अस्ति इति अन्वयः) सर्वेषामपि सर्वकारणम् इदं शीलं परं भूषणं (वर्तते)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| ऐश्वर्यस्य | वैभवस्य/प्रभुतायाः वा | वैभव या प्रभुत्व का | of prosperity |
| विभूषणम् | भूषणम् | आभूषण | ornament |
| सुजनता (अस्ति) | सौजन्यम् (अस्ति) | सौजन्य (है) | gentleness (is) |
| शौर्यस्य | वीरतायाः (आभूषणम्) | वीरता का (आभूषण) | (ornament) of bravery |
| वाक्संयमः | वाचि नियन्त्रणम् (अस्ति) | वाणी पर संयम (है) | (is) control over speech |
| ज्ञानस्य | बोधस्य (भूषणम्) | ज्ञान का (विभूषण) | (ornament) of knowledge |
| उपशमः (अस्ति) | विषयनिवृत्तिः/शान्तिः (अस्ति) | शान्ति (है) | (is) tranquility |
| श्रुतस्य | शास्त्रस्य (विभूषणम्) | शास्त्र का (आभूषण) | (ornament) of *Śāstra* |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| विनयः | विनम्रता (अस्ति) | विनम्रता (है) | (is) humility |
| वित्तस्य | धनस्य (शोभा) | धन का (आभूषण) | (ornament) of wealth |
| पात्रे | सत्पात्रे | सत्पात्र पर | on deserving person |
| व्ययः | विनियोगः (अस्ति) | व्यय करना (है) | (is) spending |
| तपसः | तपस्यायाः (विभूषणम्) | तपस्या का (आभूषण) | (ornament) of penance |
| अक्रोधः | क्रोधाभावः (अस्ति) | क्रोध नहीं करना (है) | (is) non-anger |
| प्रभवितुः | सामर्थ्यवतः (आभूषणम्) | सामर्थ्यवान् का (आभूषण) | (ornament) of powerful person |
| क्षमा | सहिष्णुता (अस्ति) | सहिष्णुता (है) | (is) forgiveness |
| धर्मस्य | सत्यवचनादिधर्मस्य (विभूषणम्) | धर्म का (आभूषण) | (ornament) of religion |
| निर्व्याजता | निश्छलता (अस्ति) | निश्छल (होना है) | (is) noncunning-ness |
| सर्वेषाम् अपि | सुजनतादिभूषणानां | सभी सुजनतादि आभूषणों का | of all these orna-ments like gentle-ness |
| सर्वकारणम् | मूलकारणम् | मूलकारण | the root cause |
| इदं | प्रसिद्धमेतत् | यह | this |
| शीलम् | सदाचारः | शील | good character |
| परम् | उत्कृष्टम् | उत्कृष्ट | best in all |
| भूषणम् | आभूषणम् | आभूषण | ornament |
| (वर्तते) | (अस्ति) | (है) | (is) |

**भावार्थः**

**संस्कृतम्–** वैभवस्य प्रभुत्वस्य वा भूषणं सौजन्यं वर्तते, शूरतायाः भूषणं वाङ्नियन्त्रणम् अस्ति,

www.thearyasamaj.org



ज्ञानस्य शान्तिः भूषणं, शास्त्रस्य भूषणं विनम्रता, धनस्य भूषणं सत्पात्रे दानं, तपस्यायाः भूषणं क्रोधाकरणम्, समर्थस्य जनस्य विभूषणं सहिष्णुता, धर्मस्य च विभूषणं निश्छलता वर्तते। सर्वेषामपि सौजन्यादीनां मूलकारणभूतं शीलं परमं भूषणं वर्तते।

**हिन्दी–** प्रभुत्व या वैभव का भूषण सुजनता है, पराक्रम का भूषण वाणी पर नियन्त्रण है, ज्ञान का भूषण शान्ति है, शास्त्र का भूषण विनम्रता है, धन का भूषण सत्पात्रों को दान देना है, तपस्या का भूषण क्रोध नहीं करना है, समर्थ व्यक्ति का भूषण क्षमा है और धर्म का भूषण निश्छल व्यवहार करना है। इन सभी का मूल कारण यह शील सबका उत्कृष्ट भूषण है।

**आङ्ग्लम्–** Gentleness is ornament of prosperity, control over speech is ornament of bravery, tranquility is ornament of knowledge, humility is ornament of Śāstra, charity to deserving person is ornament of wealth, non-anger is ornament of penance, forgiveness is ornament of powerful person, freedom from hypocrisies is ornament of religious observance, while this good character which is root of all these is the ornament of everything.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

| | | |
|---|---|---|
| ज्ञानस्योपशमः | – | ज्ञानस्य + उपशमः (गुणसन्धिः) |
| विनयो वित्तस्य | – | विनयः + वित्तस्य (उत्वं गुणश्च) |
| अक्रोधस्तपसः | – | अक्रोधः + तपसः (विसर्गसन्धिः, विसर्गस्य सः) |
| तपसः क्षमा | – | तपसः + क्षमा (विसर्गसन्धिः, विसर्गस्य विसर्गः ककारे परे) |

**(ख) समासः**

| | | |
|---|---|---|
| वाक्संयमः | – | वाचि संयमः (सप्त. तत्पु.) |
| अक्रोधः | – | न क्रोधः (नञ् समासः) |
| सर्वकारणम् | – | सर्वं च (मूलं) कारणम् (कर्मधारयः) |

**(ग) तद्धिताः**

| | | |
|---|---|---|
| ऐश्वर्यस्य | – | ईश्वरस्य भावः इत्यर्थे ईश्वर + ष्यञ् = ऐश्वर्यम् (आदिवृद्धिः) |

www.thearyasamaj.org



| | | |
|---|---|---|
| शौर्यस्य | – | शूरस्य भावः इत्यर्थे शूर + ष्यञ् = शौर्यम् |
| विभूषणम् | – | भूष् + णिच् + ल्युट् (योः अनादेशः) भूषणम् विशिष्टं भूषणम्-विभूषणम् (प्रादिसमासः) |
| सुजनता | – | शोभनः जनः सुजनः (प्रादिसमासः) सुजनस्य भावः इत्यर्थे सुजन + तल् + टाप् - सुजनता - सौजन्यम् |
| निर्व्याजता | – | व्याजस्य अभावः निर्व्याजम् (अव्ययीभावः) तस्य भावः इत्यर्थे निर्व्याज + तल् + टाप् - निर्व्याजता। |
| तपसः | – | तपस् शब्दः नपुंसकलिङ्गः, षष्ठी-एक. यथा– पयसः, अयसः |
| प्रभवितुः | – | प्र✓भू + तृच् = प्रभवितृ, षष्ठ्या एक. |

**(ii) पर्यायवाचिशब्दाः**

| | | |
|---|---|---|
| ऐश्वर्यम् | – | वैभवम्, प्रभुत्वम्, ईश्वरत्वम् |
| व्याजः | – | छलम्, कपटः, दम्भः, कैतवम् |

**(iii) छन्दः** – शार्दूलविक्रीडितम्

## अवधेयम्

**'प्रभवितृ' इति पदस्य रूपाणि अभ्यासाय दीयन्ते–**

| | | | |
|---|---|---|---|
| प्र. | प्रभविता | प्रभवितारौ | प्रभवितारः |
| द्विती. | प्रभवितारम् | प्रभवितारौ | प्रभवितॄन् |
| तृ. | प्रभवित्रा | प्रभवितृभ्याम् | प्रभवितृभिः |
| चतु. | प्रभवित्रे | प्रभवितृभ्याम् | प्रभवितृभ्यः |
| पं. | प्रभवितुः | प्रभवितृभ्याम् | प्रभवितृभ्यः |
| षष्ठी | प्रभवितुः | प्रभवित्रोः | प्रभवितॄणाम् |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| सप्त. | प्रभवितरि | प्रभवित्रोः | प्रभवितृषु |
| सम्बो. प्र. | हे प्रभवितः ! | हे प्रभवितारौ ! | हे प्रभवितारः ! |

## अभ्यासः – 27
### श्लोकः – 77

1. **श्लोकं पूरयत–**

ऐश्वर्यस्य .................. .................. शौर्यस्य ..................

ज्ञानस्योपशमः .................. विनयो .................. .................. .................. ।

अक्रोधस्तपसः .................. प्रभवितुर्धर्मस्य ..................

.................. सर्वकारणमिदं .................. .................. भूषणम् ॥

2. **सन्धिं विसन्धिं वा कुरुत–**

(i) ज्ञानस्य उपशमः श्रुतस्य – ..................

(ii) अक्रोधः तपसः क्षमा – ..................

(iii) प्रभवितुर्धर्मस्य – ..................

(iv) कारणमिदं शीलं परं भूषणम् – ..................

3. **श्लोकस्थ-प्रथमान्तपदानि अधोलिखत–**

.................. .................. .................. ..................

.................. .................. .................. ..................

..................

4. **षष्ठ्यन्तपदानि अत्र लिखत–**

.................. .................. .................. ..................

.................. .................. .................. ..................

www.thearyasamaj.org



5. समाधत्त–

(i) सुजनता कस्य विभूषणं वर्तते ?

..........

(ii) पात्रे कस्य व्ययः विभूषणं भवति ?

..........

(iii) तपस्यायाः भूषणं किमस्ति ?

..........

(iv) शीलं कीदृशं भूषणं विद्यते ?

..........

6. पदपरिचयं लिखत–

(i) ऐश्वर्यस्य – ..........

(ii) वाक्यसंयमः – ..........

(iii) श्रुतस्य – ..........

(iv) निर्व्याजता – ..........

(v) प्रभवितुः – ..........

7. यथोचितं योजयत–

| | | | |
|---|---|---|---|
| (i) | शौर्यस्य भूषणम् अस्ति | (क) | पात्रे व्ययः |
| (ii) | धर्मस्य भूषणम् अस्ति | (ख) | परं भूषणम् |
| (iii) | तपसः भूषणम् अस्ति | (ग) | उपशमः |
| (iv) | ज्ञानस्य भूषणम् अस्ति | (घ) | वाक्संयमः |
| (v) | वित्तस्य भूषणम् अस्ति | (ङ) | निर्व्याजता |
| (vi) | शीलं अस्ति | (च) | अक्रोधः |

8. विग्रहवाक्यं समस्तपदं वा लिखत–

(i) सज्जनानां भावः – ..........

www.thearyasamaj.org



(ii) शूराणां भावः – ..........

(iii) निश्छलस्य अभावः – ..........

(iv) अधर्मः – ..........

(v) न आचरणम् – ..........

(vi) सदाचारः – ..........

(vii) आ - समन्तात् भूषणम् – ..........

(viii) विभूषणम् – ..........

**9. प्रश्नानामुत्तराणि लिखत–**

(i) शौर्यस्य भूषणं किं वर्तते ? ..........

(ii) ज्ञानस्य भूषणं किमस्ति ? ..........

(iii) धर्मस्य भूषणं किं वर्तते ? ..........

(iv) क्षमा कस्य भूषणमस्ति ? ..........

(v) सर्वेभ्योऽप्यधिकं भूषणं किं विद्यते ? ..........

**10. कोष्ठकस्थ-पदानां वाक्ये प्रयोगं कुरुत–**

| |
|---|
| **सुजनता, क्षमाशीलः, संयमः, निश्छलता, विनम्रता** |

(i) प्रभविता जनः .......... भवेत्।

(ii) यदि प्रभुत्वं भवेत् तदा .......... अपि स्यात्।

(iii) शूराणां वाणी .......... भवति।

(iv) शास्त्राभ्यासफलं .......... भवेत्।

(v) धर्माचरणं तदेव वरं यदा .......... स्यात्।

**11. प्रदत्तपदानां विग्रहं लिखत–**

(i) ऐश्वर्यम् – ..........

(ii) वाक्यसमूहः – ..........

(iii) ज्ञानावाप्तिः – ..........

www.thearyasamaj.org



(iv) तपःसाध्यमार्गः – ..............................

(v) सर्वकारणम् – ..............................

(vi) निर्व्याजता – ..............................

(vii) अक्रोधः – ..............................

(viii) शाकाहारी – ..............................

(ix) दिव्याम्बरधरः – ..............................

(x) पर्यङ्कशयनः – ..............................

12. रेखाङ्कितस्य विभक्तिवचने लिखत–

(i) अयं प्रभविता जनोऽस्ति – ..............................

(ii) यूयं प्रभवितॄन् प्रभावयत – ..............................

(iii) तेषां प्रभवितॄणाम् एते गुणाः भवन्ति – ..............................

(iv) कार्यस्य कर्तारौ आह्वयतु – ..............................

(v) इयं कस्य कर्तुः कृतिः – ..............................

13. सन्धिं कृत्वा लिखत–

(i) ज्ञानस्य + उपशमः + फलम् – ..............................

(ii) अक्रोधः + तेषां + गुणो वर्तते – ..............................

(iii) त्वयि विनयः + वर्तते – ..............................

(iv) कर्तुः + अयम् + व्यापारः + अस्ति – ..............................

(v) निः + छलता अस्य + आभूषणम् – ..............................

14. रेखाङ्कितस्थले पर्यायशब्दं उपयुज्य वाक्यं लिखत–

(i) अयं जनः कपटी अस्ति – ..............................

(ii) अस्य सद्वृत्तं प्रशंसनीयमस्ति – ..............................

(iii) इदं वित्तं मदीयं नास्ति – ..............................

(iv) श्रुतम् अभ्यासेन चकासते – ..............................

www.thearyasamaj.org



15. श्लोकस्य अन्वयं लिखत–

................................................................................

................................................................................

................................................................................

◆◆◆

www.thearyasamaj.org

# सप्तमः पाठः – दैवं शरणम्/विधिलीला/आपदि धैर्यम्

**श्लोकः**

नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः खलु हरेरैरावतो वारणः।
इत्यैश्वर्यबलान्वितोऽपि बलभिद्भग्नः परैः सङ्गरे
तद्व्यक्तं खलु दैवमेव शरणं धिग्धिग्वृथा पौरुषम् ॥ 78 ॥

**पदच्छेदः**

नेता यस्य बृहस्पतिः प्रहरणम् वज्रम् सुराः सैनिकाः
स्वर्गः दुर्गम् अनुग्रहः खलु हरेः ऐरावतः वारणः।
इति ऐश्वर्य-बल-अन्वितः अपि बलभित् भग्नः परैः सङ्गरे
तत्-व्यक्तम् खलु दैवम् एव शरणम् धिक्-धिक् वृथा पौरुषम् ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| नेता | नेतृ- ऋ. पुं. प्र. एक. कृदन्तम् | ऐश्वर्यबलान्वितः | अ. पुं. प्र. एक. समस्तम् |
| यस्य | यद्- द. पुं. षष्ठी एक. सर्व. | अपि | अव्ययम् |
| बृहस्पतिः | इ. पुं. प्र. एक. विशेष्यम् | बलभित् | त. पुं. प्र. एक. समस्तम् |
| प्रहरणम् | अ. नपुं. प्र. एक. कृदन्तम् | भग्नः | अ. पुं. प्र. एक. कृदन्तक्रियापदम् |
| वज्रम् | अ. नपुं. प्र. एक. विशेष्यम् | परैः | अ. पुं. तृ. बहु. |
| सुराः | अ. पुं. प्र. बहु. | सङ्गरे | अ. पुं. सप्त. एक. |
| सैनिकाः | अ. पुं. प्र. बहु. | तद्व्यक्तम् | अ. नपुं. प्र. एक. समस्तम् |
| स्वर्गः | अ. पुं. प्र. एक. | खलु | अव्ययम् |
| दुर्गम् | अ. नपुं. प्र. एक. | दैवम् | अ. नपुं. प्र. एक. |
| अनुग्रहः | अ. पुं. प्र. एक. | एव | अव्ययम् |
| खलु | अव्ययम् | शरणम् | अ. नपुं. प्र. एक. |
| हरेः | इ. पुं. षष्ठी एक. | धिक्-धिक् | अव्ययम् |
| ऐरावतः | अ. पुं. प्र. एक. | वृथा | अव्ययम् |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| वारणः | अ. पुं. प्र. एक. | पौरुषम् | अ. नपुं. प्र. एक. |
| इति | अव्ययम् | | |

## आकाङ्क्षा

**भग्नः ।**

| | |
|---|---|
| कः भग्नः ? | बलभित् भग्नः । |
| बलभित् कुत्र भग्नः ? | सङ्गरे भग्नः । |
| कैः भग्नः ? | परैः भग्नः । |
| कीदृशः अपि बलभित् भग्नः ? | ऐश्वर्यबलान्वितः अपि बलभित् भग्नः । |
| किमिति (कीदृशप्रकारेण) बलान्वितः बलभित्... ? | यस्य नेता बृहस्पतिः, (यस्य) प्रहरणं वज्रं, (यस्य) सैनिकाः सुराः, (यस्य) दुर्गं स्वर्गः, (यस्य) हरेः अनुग्रहः (अस्ति), (यस्य) वारणः ऐरावतः इति (इत्येवं प्रकारेण) ऐश्वर्यबलान्वितः बलभित्... । |

**व्यक्तम् ।**

| | |
|---|---|
| किं खलु व्यक्तम् ? | तत् खलु व्यक्तम् । |
| (तत् किं यत् व्यक्तम् ?) | वृथा पौरुषं धिक्-धिक् ; दैवम् एव शरणम् (इति व्यक्तम्) । |

## अन्वयः

बृहस्पतिः यस्य नेता, वज्रं प्रहरणम्, सुराः सैनिकाः, स्वर्गः दुर्गम्, हरेः अनुग्रहः, ऐरावतः खलु वारणः इति ऐश्वर्यबलान्वितः अपि बलभित् सङ्गरे परैः भग्नः । तत् व्यक्तं खलु, दैवम् एव शरणम्, पौरुषं वृथा, धिक्-धिक् ।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| बृहस्पतिः | देवगुरुः | देवगुरु | *Bṛhaspati* (*Guru* of *Devas*) |
| यस्य | इन्द्रस्य | जिसके | whose |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| नेता | उपदेष्टा/शिक्षकः | उपदेशक गुरु हैं | intructor is *Guru* |
| वज्रम् | कुलिशम् | वज्र | thunderbolt |
| प्रहरणम् | अस्त्रम् | अस्त्र (है) | (is) weapon |
| सुराः | देवाः | देवता | gods |
| सैनिकाः | योद्धारः | यौद्धा हैं/सैनिक हैं | are soldiers |
| स्वर्गः | देवलोकः | स्वर्ग | heaven |
| दुर्गम् | गुप्तिस्थानम् | दुर्ग (है) | (is) fort |
| हरेः | विष्णोः | विष्णु की है | of Lord *Viśṇu* |
| अनुग्रहः | कृपा | कृपा | favour |
| ऐरावतः | ऐरावतः | ऐरावत | *Airāwat*, the celestial elephant |
| खलु-वारणः | निश्चयेन गजः | हाथी है | is elephant |
| इति | एवम् | इस प्रकार | thus |
| ऐश्वर्यबलान्वितः | वैभवशक्ति | ऐश्वर्य एवं बल से | having prosertiy & valour |
| अपि | सम्पन्नो ऽपि | अन्वित भी | *also* |
| बलभित् | बलासुरस्य भेत्ता इन्द्रः | बलासुर को मारने वाला इन्द्र | the killer of *Balā*sur the demon (powerful *Indra*) |
| सङ्गरे | युद्धे | युद्ध में | in battle |
| परैः | शत्रुभिः | शत्रुओं से | by enemies |
| भग्नः | पराजितो ऽभूत् | पराजित हो गया | was defeated |
| तद्व्यक्तम् | अतः स्पष्टम् | इससे स्पष्ट है (कि) | it is clear (that) |
| खलु | किल | ही | certainly |
| दैवम् एव | भाग्यम् एव | भाग्य ही | only fate |
| शरणम् | रक्षकम्/प्रधानम् | रक्षक है, प्रधान है | is supreme |
| पौरुषम् | पुरुषकारः | पुरुषार्थ | valour |
| वृथा | व्यर्थम् | व्यर्थ है | is useless |
| (अतो) धिक्-धिक् | पुरुषार्थं धिक्-धिक् | (अतः) पुरुषार्थ को धिक्कार है | (hence) damn this valour |

www.thearyasamaj.org



भावार्थः

**संस्कृतम्–** यस्य सुरेन्द्रस्य शिक्षकः सुरगुरुः वर्तते, अस्त्रं वज्रं, देवाः सैनिकाः, स्वर्गः दुर्गं, विष्णोः कृपा, ऐरावतः गजश्च सन्ति, सः वैभवबलयुक्तोऽपि बलासुरधातुकः इन्द्रः असुरैः यत् पराजितः, तत्र स्पष्टं दैवमेव कारणं वर्तते। दैवरक्षितं रक्षितो भवति, पुरुषार्थस्तु व्यर्थ एव वर्तते।

**हिन्दी–** जिसका नेता बृहस्पति था, वज्र अस्त्र भा, देवगण सैनिक थे, स्वर्ग किला था, विष्णु की कृपा थी, प्रधान गज ऐरावत था वह असाधारण ऐश्वर्य एवं बल से युक्त इन्द्र भी शत्रुओं (असुरों) द्वारा पराजित कर दिया गया। इससे स्पष्ट है कि भाग्य ही रक्षक है, शरण देने वाला है, पौरुष व्यर्थ है, अतः पौरुष को धिक्कार है।

**आङ्ग्लम्–** Whose was instructor *Bṛhspati*, thunderbolt was weapon, gods were soldiers, heaven was fort, favoured by Lord *Viśṇu*, and *Airāwat* was elephant, that *Indra* possessed of prosperity and valour was defeated by enemies in the battle; so it is clear that fate is supreme, valour is useless.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

इत्यैश्वर्यबलान्वितोऽपि – इति + ऐश्वर्यबलान्वितः + अपि
(यण् सन्धिः) (गुणसन्धिः)

धिग्धिग्वृथा – धिक् + धिक् + वृथा (जश्त्वसन्धिः, कस्य गः)

स्वर्गो दुर्गम् – स्वर्गः + दुर्गम् (विसर्गस्थानिकरेफस्य उत्वं, गुणश्च सुराः सैनिकाः, भग्नः परैः)

अनुग्रहः खलु – त्रिषु अपि सकारे पकारे खकारे च परे विसर्गस्य विसर्गः एव भवति।

हरेरैरावतो वारणः – हरेः + ऐरावतः + वारणः (अवसानभङ्गात् विसर्गस्य रेफरूपेण परिवर्तनम्। द्वितीये उत्वम्, गुणश्च)

www.thearyasamaj.org



| | | |
|---|---|---|
| ऐश्वर्यबलान्वितः | – | ऐश्वर्यञ्च बलञ्च इति ऐश्वर्यबले (द्वन्द्वसमासः) ऐश्वर्यबलाभ्याम् अन्वितः (तृ. तत्पु.) |
| बलभित् | – | बलं - तन्नामकम् असुरं भिनत्ति इति, बलोपदात् भिद्धातोः क्विप् (उपपदसमासः) |
| नेता | – | नी + तृच् प्रत्ययः यथा– चि + तृच् - चेता, जि + तृच् - जेता |
| प्रहरणम् | – | प्र√हृ + ल्युट् (यु इत्यस्य अनादेशः) |
| भग्नः | – | भञ्ज् + क्तः |

**(ii) पर्यायशब्दाः**

| | | |
|---|---|---|
| बृहस्पतिः | – | सुरगुरुः, देवगुरुः, गुरुः |
| ऐरावतः | – | अभ्रमातङ्गः, ऐरावणः, वल्लभः |
| वज्रम् | – | कुलिशं, पविः, भिदुरम् |
| शरणम् | – | गृहम्, रक्षकम् |

**(iii) छन्दः** – शार्दूलविक्रीडितम्

**(iv) अलङ्कारः** – परिकरः, साभिप्रायं वि. अतः परिकरः।

## अभ्यासः – 28
### श्लोकः – 78

1. **श्लोकं पूरयत–**

नेता .................. बृहस्पतिः .................... वज्रं ............ ..................<br>
.................... दुर्गमनुग्रहः .................. हरेरैरावतो .................... ।<br>
इत्यैश्वर्यबलान्वितोऽपि ........................ .................... सङ्गरे<br>
.................. खलु ............... शरणं ................. ............ पौरुषम् ॥

www.thearyasamaj.org



2. श्लोकस्थानि प्रथमान्तपदानि अधो लिखत–

........ ........ ........ ........ ........ ........

........ ........ ........ ........ ........ ........

........ ........ ........ ........ ........ ........

3. अव्ययपदानि अधो लिखत–

........ ........ ........ ........ ........ ........

........

4. समस्तम् अधो लिखत–

........ ........ ........

5. समाधत्त–

(i) बृहस्पतिः कस्य नेता अस्ति ? ........

(ii) हरेरनुग्रहः कस्मिन् वर्तते ? ........

(iii) इन्द्रस्य दुर्गः कः ? ........

(iv) इन्द्रः असुरैः पराजितः तत्र किं कारणम् ? ........

6. मूलशब्द-विभक्ति-लिङ्गानि लिखत–

(i) नेता – ........ ........ ........

(ii) वारणः – ........ ........ ........

(iii) बलभित् – ........ ........ ........

(iv) भग्नः – ........ ........ ........

(v) पौरुषम् – ........ ........ ........

www.thearyasamaj.org



7. कोष्टकस्य समुचितपदेन रिक्तस्थानं पूरयत–

| धिग्धिक्, शरणम्, ऐश्वर्यबलान्वितः, बृहस्पतिः, दुर्गम् |
|---|

(i) इन्द्रस्य शिक्षकः .................... आसीत् ।

(ii) देवानां स्वर्गः .................... अस्ति ।

(iii) इन्द्रः .................... .................... सङ्गरे भग्नः ।

(iv) तस्य पौरुषं .................... दैवमेव .................... ।

8. सन्धिं विसन्धिं वा कुरुत–

(i) इत्याश्चर्यान्वितः – ....................

(ii) धिक् + इति – ....................

(iii) इति + आदि + इनि – ....................

(iv) स्वर्गो दुर्गम् – ....................

9. प्रकृतिप्रत्ययौ संयोज्य लिखत–

(i) कृ + तृच् – ....................

(ii) हृ + तृच् – ....................

(iii) जि + तृच – ....................

(iv) चि + तृच् – ....................

(v) रञ्ज् + वन्तः – ....................

(vi) भञ्ज् + क्तः – ....................

10. प्रश्ननानामुत्तराणि दत्त–

(i) सुराः कस्य सैनिकाः सन्ति ?

....................

(ii) ऐरावतः कस्य वारणोऽस्ति ?

....................

www.thearyasamaj.org



(iii) ऐश्वर्यबलान्वितः कः शत्रुभिः युद्धे पराजितः ?

..........................................................................

(iv) पौरुषबलयोः कस्य महत्त्वधिकं वर्णितम् ?

..........................................................................

**11. उदाहरणानुसारं तालिकातः उपयुक्तं युगलं लिखत–**

| |
|---|
| **नेता, वज्रम्, सुराः प्रहरणम्, सैनिकाः, बृहस्पतिः, दुर्गम्, अनुग्रहः, वारणः, स्वर्गः, ऐरावतः, हरेः** |

**यथा– नेता – बृहस्पतिः** ..........................................

.......................................... ..........................................

.......................................... ..........................................

**12. नेतृ-शब्दस्य रूपाणि वाक्ये पूरयत–**

(i) अयमस्माकम् .......................... ।

(ii) इमौ द्वौ .......................... स्तः ।

(iii) एतेषाम् .......................... नेतृत्वमस्ति ।

(iv) एषु .......................... विश्वसिद्धिः ।

(v) एतान् .......................... मानय ।

(vi) अनेन .......................... किं प्रयोजनम् ।

**13. पर्यायवाचिनः शब्दान् लिखत–**

(i) बृहस्पतिः – ..........................................

(ii) वज्रम् – ..........................................

(iii) सुराः – ..........................................

(iv) ऐश्वर्यम् – ..........................................

(v) व्याजः – ..........................................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

भग्नाशस्य करण्डपिण्डिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाऽऽखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
लोकाः! पश्यत दैवमेव हि नृणां वृद्धौ क्षये कारणम् ॥ 79 ॥

**पदच्छेदः**

भग्न-आशस्य करण्ड-पिण्डित-तनोः म्लानेन्द्रियस्य क्षुधा
कृत्वा आखुः विवरम् स्वयम् निपतितः नक्तम् मुखे भोगिनः।
तृप्तः तत्-पिशितेन सत्वरम् असौ तेन एव यातः पथा
लोकाः! पश्यत दैवम् एव हि नृणाम् वृद्धौ क्षये कारणम् ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| भग्नाशस्य | अ. पुं. षष्ठी एक. वि. समस्तम् | तत्पिशितेन | अ. नपुं. तृ. एक. |
| | | सत्वरम् | अव्ययम् |
| करण्डपिण्डित-तनोः | उ. पुं. षष्ठी एक. वि. समस्तम् | असौ | अदस्- स. पुं. प्र. एक. सर्व. |
| | | तेन | तद्- द. पुं. तृ. एक. सर्व. |
| म्लानेन्द्रियस्य | अ. पुं. षष्ठी एक. वि. समस्तम् | एव | अव्ययम् |
| | | यातः | अ. पुं. प्र. एक. क्तप्रत्ययान्तम् |
| क्षुधा | क्षुध्- ध. स्त्री. तृ. एक. | पथा | न. पुं. तृ. एक. |
| कृत्वा | अव्ययम् (क्त्वाप्रत्ययान्तं पदम्) | लोकाः! | अ. पुं. सम्बो. प्र. बहु. |
| आखुः | उ. पुं. प्र. एक. | पश्यत | दृश् + लोट्, मपु. बहु. तिङन्त-क्रियापदम् |
| विवरम् | अ. पुं. द्विती. एक. | | |
| स्वयम् | अव्ययम् | दैवम् | अ. नपुं. प्र. एक. |
| निपतितः | अ. पुं. प्र. एक. (क्तप्रत्ययान्त-क्रियापदम्) | एव | अव्ययम् |
| | | हि | अव्ययम् |
| नक्तम् | अव्ययम् | नृणाम् | ऋ. पुं. षष्ठी बहु. |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| मुखे | अ. नपुं. सप्त. एक. | वृद्धौ | इ. स्त्री. सप्त. एक. |
| भोगिनः | न. पुं. षष्ठी एक. विशेष्यम् | क्षये | अ. पुं. सप्त. एक. |
| तृप्तः | अ. पुं. प्र. एक. क्तप्रत्ययान्तम् | कारणम् | अ. नपुं. प्र. एक. |

टिप्पणी– 'लोका ! पश्यत' इति स्थाने 'स्वस्थास्तिष्ठत' इति पाठभेदः अस्ति।

## आकाङ्क्षा

**कारणं भवति।**

| | |
|---|---|
| किं कारणं भवति ? | दैवम् एव कारणं भवति। |
| दैवं कुत्र कारणं भवति ? | दैवं नृणां वृद्धौ क्षये च कारणं भवति। |
| (हे) लोकाः! पश्यत। किं पश्यत ? | (अग्रे वक्ष्यमाणं) पश्यत। |

**निपतितः।**

| | |
|---|---|
| कः निपतितः ? | स्वयं निपतितः। |
| कः स्वयं निपतितः ? | आखुः स्वयं निपतितः। |
| कुत्र निपतितः ? | योगिनः मुखे निपतितः। |
| कीदृशस्य योगिनः मुखे ? | भग्नाशस्य, करण्डपिण्डिततनोः, क्षुधाम्लानेन्द्रियस्य योगिनः मुखे। |
| कदा किं कृत्वा योगिनः मुखे निपतितः ? | नक्तं विवरं कृत्वा (करण्डं प्रविश्य) योगिनः मुखे निपतितः। |

**यातः।**

| | |
|---|---|
| कः यातः ? | असौ यातः। |
| कीदृशः असौ यातः ? | तत्-पिशितेन तृप्तः असौ (अर्थात् सर्पः) यातः। |
| कथं यातः ? | सत्वरं यातः। |
| केन (एव) पथा यातः ? | तेन एव पथा (येन पथा आखुः विवरं कृत्वा करण्डं प्रविष्टः तेन एव पथा)। |

**(एवं हि) हे लोकाः!**

| | |
|---|---|
| पश्यत। किं पश्यत ? | नृणां वृद्धौ क्षये च दैवम् एव कारणं भवति (इत्येतत्) पश्यत। |

www.thearyasamaj.org



## अन्वयः

लोकाः ! पश्यत। आखुः नक्तं विवरं कृत्वा भग्नाशस्य करण्डपिण्डिततनोः क्षुधा म्लानेन्द्रियस्य भोगिनः मुखे स्वयं निपतितः। असौ तत्-पिशितेन तृप्तः सत्वरं तेन एव पथा यातः, अतो हि नृणां वृद्धौ क्षये (च) दैवम् एव कारणम् (भवति)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| लोकाः ! | हे जनाः ! | हे संसारवासियों ! आप | O men ! |
| पश्यत | अवलोकयत | देखें | see |
| आखुः | मूषकः | चूहा | rat |
| नक्तम् | रात्रौ | रात्रि में | in night |
| विवरम् | बिलम् | (साँप की पिटारी में) बिल | hole |
| कृत्वा | विधाय/निर्माय | बनाकर | by making |
| भग्नाशस्य | नष्टमनोरथस्य | नष्ट हुई आशा वाले | broken heart |
| करण्डपिण्डिततनोः | पेटिकायां पुञ्जीकृत-शरीरस्य | पिटारी में कुण्डली की स्थिति | coiled in basket box |
| क्षुधा | बुभुक्षया | भूख से | with hunger |
| म्लानेन्द्रियस्य | क्षीणेन्द्रियस्य | क्षीण हुई इन्द्रिय वाले | weakened senses |
| भोगिनः | सर्पस्य | साँप के | of snake |
| मुखे | आस्ये | मुख में | in the mouth |
| स्वयम् | स्वयमेव | स्वयं ही | itself |
| निपतितः | भ्रष्टः/प्रविष्टो वा | प्रविष्ट हो गया, | entered |
| असौ | सर्पः | वह सर्प | that snake |
| तत्पिशितेन | मूषकमांसेन | उसी चूहे के मांस से | by flesh of mouse |
| तृप्तः (सन्) | (खादित्वा) सन्तुष्टः (सन्) | सन्तुष्ट (होते हुए) | being satisfied |
| सत्वरम् | शीघ्रम् | शीघ्र ही | soon |
| तेन एव | मूषकनिर्मितेन एव | उसी चूहे के द्वारा बनाए गए | made by that rat |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| पथा | बिलमार्गेण | बिल के रास्ते से | path of hole |
| यातः | बहिर्गतः | बाहर निकल गया | went out |
| अतः | अस्माद्धेतोः | इस कारण | therefore |
| हि | निश्चयेन | निश्चय ही | surely |
| नृणाम् | मनुष्याणाम् | मनुष्यों की | of men |
| वृद्धौ | उन्नतौ | वृद्धि में | in progress |
| क्षये (च) | अवनतौ (च) | (और) अवनति में | (and) in regress |
| दैवम् एव | भाग्यमेव | भाग्य ही | only destiny is |
| कारणम् (भवति) | हेतुः भवति | कारण होता है | reason |

## भावार्थः

**संस्कृतम्–** मूषकः पेटिकायां गतः सन् सर्पस्य मुखे पतितः। मूषकस्य मांस-भक्षणेन सन्तृप्तः सर्पः मूषकनिर्मितेन बिलमार्गेण एव बहिरागत्य स्वतन्त्रो जातः। हे संसारवासिनः ! अनेन दृष्टान्तेन जानन्तु यत् मनुष्याणां वृद्धौ नाशे च भाग्यमेव कारणं भवति।

**हिन्दी–** पेटिका में बन्द कुण्डलित शरीर वाले (अत एव) स्वतन्त्र होने की आशा से रहित एवं भूख से शिथिल इन्द्रिय वाले सर्प की पेटिका में रात्रि में बिल बनाकर (खाने के लोभ से) पेटी में प्रविष्ट चूहा स्वयं ही सर्प के मुख में चला गया। सर्प चूहे के मांस भक्षण से तृप्त होकर उसी के द्वारा बनाए गए विवरमार्ग से बाहर निकल गया (स्वतन्त्र हो गया)। हे संसारवासियों ! देखों, मनुष्यों की उन्नति और अवनति में भाग्य ही कारण हुआ करता है।

**आङ्ग्लम्–** A rat making a hole in a basket-box, at night, fell into the mouth of snake who was coiled there in and all his senses were weakened due to hunger. Being satisfied by the flesh of mouse, the snake soon went out of the box by the same way made by the mouse. Therefore, O men, destiny alone is reason of progress and regress of men.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) समासः

भग्नाशस्य – भग्ना आशा यस्य, सः (बहुव्रीहिः) तस्य
यथा– विनष्टभार्यः, नष्टाशः

करण्डपिण्डिततनोः – करण्डे पिण्डितः, करण्डपिण्डितः (सप्त. तत्पु.)

www.thearyasamaj.org



| | | |
|---|---|---|
| | | करण्डपिण्डिता तनुः यस्य, तस्य (बहुव्रीहिः) यथा– पेटिकावलयिततनुः |
| म्लानेन्द्रियस्य | – | म्लानानि इन्द्रियाणि यस्य, तस्य (बहुव्रीहिः) यथा– ग्लानेन्द्रियः, फुल्लेन्द्रियः |

(ख) **कृदन्तः**

| | | |
|---|---|---|
| कृत्वा | – | कृ + क्त्वा। यथा– धृत्वा, हृत्वा, वृत्वा |
| निपतितः | – | नि√पत् + क्तः (कर्तरि क्तः) |
| तृप्तः | – | तृप् + क्तः, यथा– दृप्तः, सृप्तः, क्लृप्तः |
| यातः | – | या + क्तः, यथा– वातः |
| पश्यत | – | दृश् धातुः, लोट्, मपु. बहु. |
| म्लानम् | – | म्लै + क्त = म्लानम् |

(ii) **पर्यायशब्दाः**

| | | |
|---|---|---|
| आखुः | – | मूषकः, गिरिका, बालमूषिका, मूषिकः |
| विवरम् | – | बिलम्, कुहरं, छिद्रं, रन्ध्रम् |
| पिशितम् | – | पललं, तरलमांसम्, आमिषम्, क्रव्यम् |
| भोगी | – | उरगः, पन्नगः, पवनाशनः, सर्पः |
| दैवम् | – | भाग्यम्, दिष्टं, भागधेयम् |

(iii) **छन्दः** – शार्दूलविक्रीडितम्

(iv) **अलङ्कारः** – अर्थान्तरन्यासः

**अवधेयम्**

'नृ' शब्दस्य रूपाणि–

| | | | |
|---|---|---|---|
| प्र. | ना | नरौ | नरः |
| द्विती. | नरम् | नरौ | नॄन् |
| तृ. | न्रा | नृभ्याम् | नृभिः |
| चतु. | न्रे | नृभ्याम् | नृभ्यः |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| पं. | नुः | नृभ्याम् | नृभ्यः |
| षष्ठी | नुः | न्रोः | नृणाम्/नॄणाम् |
| सप्त. | नरि | न्रोः | नृषु |
| सम्बो. प्र. | हे नः ! | हे नरौ ! | हे नरः ! |

## अभ्यासः – 19
## श्लोकः – 79

1. श्लोकम् अधो लिखत–

.............................................................................................................

............................................................................................................. ।

.............................................................................................................

............................................................................................................. ॥

2. सन्धिं विसन्धिं वा कुरुत–

(i) तनोः म्लान इन्द्रियस्य – ..............................

(ii) कृत्वा आखुः विवरम् – ..............................

(iii) तृप्तस्तत्पिशितेन – ..............................

(iv) निपतितो नक्तं मुखे – ..............................

3. भोगिनः इति विशेष्यपदस्य विशेषणानि लिखत–

.............................................................................................................

4. तृतीयान्तपदानि लिखत–

.............................................................................................................

5. सप्तम्यन्तं पदं लिखत–

.................... .................... .................... .................... .................... ....................

www.thearyasamaj.org



6. षष्ठ्यन्तपदानि लिखत–

........ ........ ........ ........ ........ ........

7. क्तप्रत्ययान्तपदानि लिखत–

........ ........ ........ ........ ........ ........

8. अव्ययपदानि लिखत–

........................................

9. समाधत्त–

(i) भोगिनः मुखे किं कृत्वा मूषकः निपतितः ? ........................

(ii) भोगी क्षुधा कीदृशेन्द्रियः आसीत् ? ........................

(iii) भोगी केन तृप्तः ? ........................

(iv) केन मार्गेण भोगी बहिर्यातः ? ........................

10. क्तप्रत्ययान्तपदेन वाक्यं पूरयत–

(i) बन्धनकारणात् सर्पस्य आशा ........................ (भग्न)

(ii) बुभुक्षया मम इन्द्रियाणि सन्ति ........................ (म्लान)

(iii) आखुः स्वनिर्मितविवरकारणात् सर्पमुखे ........................ (निपतित)

(iv) मूषकेन निर्मितबिलेन सर्पाः बहिः ........................ (यात)

(v) आवां पायसभक्षणेन ........................ (तृप्त)

11. सन्धिं कुरुत–

(i) भग्न + आशस्य – ........................

(ii) कृत्वा + आखुः – ........................

(iii) कृतः + तत्पिशितेन – ........................

(iv) सत्वरम् + असौ – ........................

www.thearyasamaj.org



(v) यातः + पथा – ..............................

12. सन्धि कुरुत–

(i) पिण्डिततनोः + म्लानस्य – ..............................

(ii) म्लानस्य + इन्द्रियस्य – ..............................

(iii) निपतितः + नक्तम् – ..............................

(iv) तृप्तः + तस्याशनेन – ..............................

13. समस्तं पदं लिखत–

(i) नष्टः मनोरथः यस्य सः – ..............................

(ii) भग्ना आशा यस्य सः – ..............................

(iii) म्लानानि इन्द्रियाणि यस्य सः – ..............................

(iv) तस्य पिशितम्, तेन – ..............................

14. प्रश्नानाम् उत्तराणि दत्त–

(i) आखुः कुत्र स्वयं निपतितः ?

..............................

(ii) भोगी भग्नाशः कस्मात् आसीत् ?

..............................

(iii) भोगिनः इन्द्रियाणि कया म्लानानि आसन् ?

..............................

(iv) सर्पः सत्वरं केन मार्गेण गतः ?

..............................

(v) दैवं कस्य वृद्धौ क्षये च कारणमस्ति ?

..............................

www.thearyasamaj.org



15. रेखाङ्कितस्थाने पर्यायशब्दं विलिख्य वाक्यं पुनः लिखत–

(i) भोगिनः पिशितं भक्षयित्वा मयूरो हृष्टः। – ..........

(ii) मूषिकस्य विवरे सर्पाः वसन्ति। – ..........

(iii) अयं भोगी भयङ्करोऽस्ति। – ..........

(iv) आखुः गणेशस्य वाहनमस्ति। – ..........

(v) मम दैवम् एव अनिश्चितं वर्तते। – ..........

16. 'पथिन्' शब्दस्य रूपाणि लिखत–

(i) प्रथमा – .......... .......... ..........

(ii) तृतीया – .......... .......... ..........

(iii) षष्ठी – .......... .......... ..........

(iv) सप्तमी – .......... .......... ..........

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**खल्वाटो दिवसेश्वरस्य किरणैः सन्तापितो मस्तके**
**वाञ्छन्देशमनातपं विधिवशात्तालस्य मूलं गतः।**
**तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः**
**प्रायो गच्छति यत्र दैवहतकस्तत्रैव यान्त्यापदः॥ 80॥**

**पदच्छेदः**

खल्वाटः दिवस-ईश्वरस्य किरणैः सन्तापितः मस्तके
वाञ्छन् देशम् अनातपम् विधिवशात् तालस्य मूलम् गतः।
तत्र अपि अस्य महाफलेन पतता भग्नम् सशब्दम् शिरः
प्रायः गच्छति यत्र दैवहतकः तत्र एव यान्ति आपदः॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| खल्वाटः | अ. पुं. प्र. एक. कर्तृपदम् | अपि | अव्ययम् |
| दिवसेश्वरस्य | अ. पुं. षष्ठी एक. समस्तम् | अस्य | इदं- म. पुं. षष्ठी एक. |
| किरणैः | अ. पुं. तृ. बहु. अनुक्तकर्ता | महाफलेन | अ. नपुं. तृ. एक. समस्तम् |
| सन्तापितः | अ. पुं. प्र. एक. कृदन्तक्रिया-पदम् | पतता | पत् + शतृ - नपुं. तृ. एक. |
| | | भग्नम् | भज् + क्त - नपुं. प्र. एक. |
| मस्तके | अ. नपुं. सप्त. एक. | सशब्दं | (शब्देन सह) अ. नपुं. प्र. एक. समस्तम् |
| वाञ्छन् | त. पुं. प्र. एक. शत्रन्तपदम् | | |
| देशम् | अ. पुं. द्विती. एक. विशेष्यम् | शिरः | शिरस्- स. नपुं. प्र. एक. |
| अनातपम् | अ. पुं. द्विती. एक. वि. | प्रायः | अव्ययम् |
| विधिवशात् | अ. पुं. पं. एक. | गच्छति | गम्, लट् प्रपु. एक. |
| तालस्य | अ. पुं. षष्ठी एक. | यत्र | अव्ययम्, त्रलन्तं तद्धितान्तम् |
| मूलं | अ. नपुं. द्विती. एक. | दैवहतकः | अ. पुं. प्र. एक. समस्तम् |
| गतः | अ. पुं. प्र. एक. (गम् + क्त) कृदन्तपदम् | तत्र | तल्-अन्तम् अव्ययम् |
| | | एव | अव्ययम् |
| तत्र | तद् + त्रल्, सप्तम्यर्थे तद्धितान्तमव्ययम् | यान्ति | या - लट् प्रपु. बहु. |
| | | आपदः | आपद् - द. स्त्री. प्र. बहु. |

www.thearyasamaj.org



## आकाङ्क्षा

**यान्ति ।**

| | |
|---|---|
| काः यान्ति । | आपदः यान्ति । |
| आपदः कुत्र यान्ति ? | प्रायः दैवहतकः यत्र गच्छति तत्र एव आपदः यान्ति । |

**गतः ।**

| | |
|---|---|
| कः गतः ? | खल्वाटः गतः । |
| खल्वाटः कुत्र गतः ? | खल्वाटः तालस्य मूलं गतः । |
| कस्मात् (हेतोः) गतः ? | विधिवशात् गतः । |
| किं कुर्वन् / कथं (सन्) गतः ? | अनातपं देशं वाञ्छन् गतः । |
| अपि च कथं (सन्) गतः ? | दिवसेश्वरस्य किरणैः मस्तके सन्तापितः (सन्) गतः । |

**भग्नम् ।**

| | |
|---|---|
| कस्य किं भग्नम् ? | अस्य शिरः भग्नम् । |
| केन कथं भग्नम् ? | (तालस्य) पतता महाफलेन सशब्दं भग्नम् । |
| कुत्र अस्य शिरः भग्नम् ? | तत्र अपि (तालस्य मूले अपि / रक्षणार्थं चिते स्थानेऽपि) अस्य शिरः भग्नम् । |

## अन्वयः

खल्वाटः दिवसेश्वरस्य किरणैः मस्तके सन्तापितः (सन्) अनातपं देशं वाञ्छन् विधिवशात् तालस्य मूलं गतः । तत्र अपि पतता महाफलेन अस्य शिरः सशब्दं भग्नम्, प्रायः दैवहतकः यत्र गच्छति तत्र एव आपदः यान्ति ।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| खल्वाटः | शिरःकेशरहितः | गंजा | bald man |
| दिवसेश्वरस्य | सूर्यस्य | सूर्य के | of sun |
| किरणैः | अंशुभिः | किरणों से | by rays |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| मस्तके | शिरसि | मस्तक पर | on the head |
| सन्तापितः | संदग्धः (सन्) | तपाया गया/ जलाया गया | scorched |
| अनातपम् | धर्मरहितम् | धूप रहित | shady |
| देशम् | स्थानम् | स्थान को | place |
| वाञ्छन् | इच्छन् | चाहता हुआ | desiring/wishing |
| विधिवशात् | भाग्यवशात् | भाग्यवश | by fate |
| तालस्य | तालवृक्षस्य | तालवृक्ष के | of palm tree |
| मूलम् | मूलदेशे | मूल (जड़) में | in root |
| गतः | यातः | चला गया | went |
| तत्र अपि | तालवृक्षमूलेऽपि | ताड़ के वृक्ष के नीचे भी | under palm tree also |
| पतता | वृन्तात् भ्रंश्यता | डंठल से गिर रहे | falling from stalk |
| महाफलेन | पृथुफलेन | बड़े फल से | by big fruit |
| अस्य | खल्वाटस्य | खल्वाट का | of bald person |
| शिरः | मस्तकम् | शिर | head |
| सशब्दम् | शब्देन सहितं | ध्वनि के साथ | with crash |
| भग्नम् | स्फुटितम् | फट गया | was broken |
| प्रायः | प्रायेण | प्रायशः | normally |
| दैवहतकः | भाग्यहीनः | भाग्यहीन जन | unlucky person |
| यत्र | यस्मिन् देशे | जिस स्थान पर | wherever |
| गच्छति | याति | जाता है | goes |
| तत्र एव | तस्मिन् स्थाने एव | उसी स्थान पर | to that place |
| आपदः | विपत्तयः | विपत्तियाँ | misfortune |
| यान्ति | गच्छन्ति | चली जाती हैं | goes |

www.thearyasamaj.org



## भावार्थः

**संस्कृतम्–** खल्वाटो जनः सूर्यकिरणैः मस्तके सन्तापिते सति छायायुक्तं स्थानमिच्छन् तालवृक्षस्य नीचैः गतः। तत्र अपि तालवृक्षस्य पतता महता फलेन खल्वाटस्य शिरः ध्वनिपूर्वकं भग्नं जातम्। अनेन सिद्ध्यति यत् भाग्यहीनाः यत्र गच्छन्ति तत्रैव आपदोऽपि यान्ति।

**हिन्दी–** गंजा व्यक्ति सूर्य की किरणों से मस्तक के जलने पर धूप-रहित स्थान पर जाने की इच्छा करता हुआ तालवृक्ष के नीचे पहुँच गया। वहाँ भी ताल के गिर रहे बड़े फल से आवाज के साथ गंजे का सिर फूट गया। (ठीक ही कहा है कि) प्रायः भाग्यहीन व्यक्ति जहाँ जाता है, वहीं विपत्तियाँ भी पहुँच जाती हैं।

**आङ्ग्लम्–** A bald person being scorched on his head by the rays of the sun, wishing for shady place, went under a palm tree. Even there a big fruit falling from the tree broke his head with a great crash. It shows, wherever an unlucky man goes, misfrotune goes there or misfortune follows him.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

| | | |
|---|---|---|
| दिवेसेश्वरस्य | – | दिवस + ईश्वरस्य (गुणसन्धिः) यथा– दिनेश्वरः |
| तत्राप्यस्य | – | तत्र + अपि + अस्य<br>(दीर्घसन्धिः) (यण् सन्धिः) |
| तत्रैव | – | तत्र + एव (वृद्धिसन्धिः)<br>यथा– यथा + एव - यथैव |
| यान्त्यापादः | – | यान्ति + आपदः (यण् सन्धिः)<br>यथा– देवी + अपि = देव्यपि |
| खल्वाटो दिवसेश्वरस्य | – | खल्वाटः + दिवसेश्वरस्य (विसर्गसन्धिः) |
| सन्तापितो मस्तके | – | सन्तापितः + मस्तके (विसर्गसन्धिः) |
| प्रायो गच्छति | – | प्रायः + गच्छति (त्रिषु अपि विसर्गस्थानिक-रेफस्य उत्वम्, गुणश्च) |
| भाग्यरहितस्तत्र | – | भाग्यरहितः + तत्र (विसर्गस्य सः) (विसर्गसन्धिः) |

www.thearyasamaj.org



**(ख) समासः**

| | | |
|---|---|---|
| दिवसेश्वरस्य | – | दिवसस्य ईश्वरः, तस्य (षष्ठी-तत्पु.) |
| अनातपम् | – | अविद्यमानः आतपः यत्र, तम् (नञर्थ बहुव्रीहिः) यथा– अधनः, अपुत्रः |
| महाफलेन | – | महत् च तत् फलम्, तेन (बहुव्रीहिः) |
| सशब्दम् | – | शब्देन सह (बहुव्रीहिः) यथा– सध्वनिम्, सपुत्रम्, सजनकः |
| भाग्यरहितः | – | भाग्येन रहितः (तृ. तत्पु.) |
| भग्नम् | – | उभयत्र कर्मवाच्ये क्तप्रत्ययः अस्ति। अतः कर्तृपदं किरणः, महाफल इति अनुक्तं जातम्। ताभ्यां तृतीयाविभक्तिः भवति। शिरः, खल्वाटः इति कर्मपदम् उक्तम्। अतः उक्ते कर्मणि प्रथमा अभूत्, उभयत्र शब्दे। |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| सन्तापितः | – | सम् + तप् + णिच् + क्त-प्रत्ययः कर्मणि भवति। |
| गतः | – | गम् + क्त (कर्तरि क्तप्रत्ययः) |
| भग्नम् | – | भञ्ज् + क्त, कर्मणि क्तप्रत्ययः |
| पतता | – | पत् + लटः स्थाने शतृप्रत्ययः - पतत्, तृतीयैकवचनम्। महाफलेन इति अनुक्तकर्ता, तस्मात् तृतीया विभक्तिः भवति। महाफलेन इत्यस्य वि. - पतता इत्यस्ति। |
| गच्छति | – | गम् + लट् (वर्तमाने लट्) प्रपु. एक. |
| यान्ति | – | या + लट्, प्रपु. बहु. |

**(ii) पर्यायशब्दाः**

| | | |
|---|---|---|
| किरणः | – | अंशुः, मयूखः, रश्मिः, गभस्तिः |
| विधिः | – | विधानम्, दैवम्, भाग्यम् |

www.thearyasamaj.org



(iii) छन्दः – शार्दूलविक्रीडितम्

(iv) अलङ्कारः – अर्थान्तरन्यासः

---

## अभ्यासः – 30
### श्लोकः – 80

1. श्लोकं लिखत–

..................................................

.................................................. ।

..................................................

.................................................. ॥

2. सन्धिं विसन्धिं वा कुरुत–

(i) खल्वाटो दिवसेश्वरस्य – ..............................

(ii) विधिवशात्तालस्य मूलं गतः – ..............................

(iii) तत्र अपि अस्य – ..............................

(iv) दैवहतकः तत्र एव यान्ति आपदः – ..............................

3. उत्तराणि दत्त–

(i) खल्वाटः केन सन्तापितः ? – ..............................

(ii) खल्वाटः कस्मिन्नङ्गे सन्तापितः ? – ..............................

(iii) सन्तापितः खल्वाटः कुत्र गतः ? – ..............................

(iv) तालमूलं कथं गतः खल्वाटः ? – ..............................

(v) पतता फलेन कस्य शिरः भग्नम् ?– ..............................

(vi) आपदः कुत्र गच्छन्ति ? – ..............................

www.thearyasamaj.org



4. 'गम्' धातुरूपैः वाक्यं पूरयत–

(i) अहं यत्र .................... तत्र आपदः .................... ।

(ii) त्वं यत्र .................... तत्रैव इमे .................... ।

(iii) बालकौ क्रीडनाय .................... यूयं भोजनाय .................... ।

(iv) वयं चलचित्रं द्रष्टुं .................... युवां मन्दिरम् .................... ।

5. पदपरिचयं दत्त–

(i) दिवसेश्वरस्य – ....................

(ii) वाञ्छन् – ....................

(iii) महाफलेन – ....................

(iv) आपदः – ....................

6. सन्धिच्छेदं कुरुत–

(i) दिनेश्वरः – ....................

(ii) तत्राप्ययं जनः – ....................

(iii) रहितस्तत्रैव – ....................

(iv) दीर्घो ह्रस्वश्च – ....................

7. समस्तं पदं लिखत–

(i) न आघ्रातम् – ....................

(ii) महान् चासौ कालः – ....................

(iii) पुत्रेण सह वर्तते इति – ....................

(iv) अविद्यमानं धनं यस्य सः – ....................

8. प्रश्नानामुत्तराणि दत्त–

(i) यत्र भाग्यरहितः गच्छति तत्र प्रायः काः गच्छन्ति ?

....................

www.thearyasamaj.org



(ii) जनः तालस्य मूलं कथं गतः ?

..........................................................................................

(iii) खल्वाटस्य मस्तकं कस्यामशुभिः सन्तापितम् ?

..........................................................................................

(iv) अस्य श्लोकस्य प्रतिपाद्यः विषयः कः अस्ति ?

..........................................................................................

9. समुचितं योजयत–

| | | | |
|---|---|---|---|
| (i) | खल्वाटः | (क) | अनातपं वाञ्छति |
| (ii) | किरणाः सन्ति | (ख) | सन्तापितः |
| (iii) | सूर्यातपखिन्नः | (ग) | इमे दिनकरस्य |
| (iv) | पतता महाफलेन | (घ) | तत्र आपदः |
| (v) | यत्र भाग्यरहितः | (ङ) | शिरः भग्नम् |

10. रेखाङ्किततिङन्तक्रियापदस्थाने क्तप्रत्ययान्तस्य प्रयोगं कुरुत–
(आवश्यकतायां सत्यां कर्मणि प्रयोगः कार्यः)

(i) एनं सर्पः <u>अदंशत्</u>।

..........................................................................................

(ii) सः अद्य ग्रामम् <u>अगच्छत्</u>।

..........................................................................................

(iii) अहं त्वां किम् <u>अपृच्छम्</u>।

..........................................................................................

(iv) अस्य शिरः शिलया रोमः <u>अभञ्जत्</u>।

..........................................................................................

(v) सः ह्यः माम् <u>अपश्यत्</u>।

..........................................................................................

www.thearyasamaj.org



11. विग्रहवाक्यं लिखत–

(i) रात्रीश्वरः – ..........

(ii) अनाघ्रातम् – ..........

(iii) महाफलम् – ..........

(iv) अपुत्रः – ..........

(v) अधनस्य – ..........

12. गम् धातोः, या-धातोश्च लटि रूपाणि लिखत–

| | | |
|---|---|---|
| गच्छति | .......... | .......... |
| .......... | .......... | .......... |
| .......... | .......... | .......... |
| याति | .......... | .......... |
| .......... | .......... | .......... |
| .......... | .......... | .......... |

13. पर्यायशब्दान् लिखत–

(i) किरणः – ..........

(ii) ऐरावतः – ..........

(iii) दैवम् – ..........

(iv) आखुः – ..........

◆◆◆

www.thearyasamaj.org



### श्लोकः

गजभुजङ्गविहङ्गमबन्धनं
शशिदिवाकरयोर्ग्रहपीडनम् ।
मतिमताञ्च विलोक्य दरिद्रतां
विधिरहो बलवानिति मे मतिः ॥ 81 ॥

### पदच्छेदः

गज-भुजङ्ग-विहङ्गम-बन्धनम्
शशि-दिवाकरयोः ग्रह-पीडनम् ।
मतिमताम् च विलोक्य दरिद्रताम्
विधिः अहो बलवान् इति मे मतिः ॥

### पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| गजभुजङ्ग- | अ. नपुं. प्र. एक. | दरिद्रताम् | आ. स्त्री. द्विती. एक. |
| विहङ्गमबन्धनम् | समस्तम् | विधिः | इ. पुं. प्र. एक. |
| शशिदिवाकरयोः | अ. पुं. षष्ठी द्वि. समस्तम् | अहो | अव्ययम् |
| ग्रहपीडनम् | अ. नपुं. प्र. एक. कृदन्तम् | बलवान् | त. पुं. प्र. एक. तद्धितान्तम् |
| मतिमताम् | त. पुं. षष्ठी बहु. तद्धितान्तम् | इति | अव्ययम् |
| च | अव्ययम् | मे | अस्मद्- द. पुं. षष्ठी एक. |
| विलोक्य | ल्यप् प्रत्ययान्तम् अव्ययम् | मतिः | इ. स्त्री. प्र. एक. |

### आकाङ्क्षा

(जाता)

का (जाता) ? — मे मतिः (जाता)।

मे मतिः का ? — अहो ! विधिः बलवान् इति मे मतिः ।

*टिप्पणी–* "गजभुजङ्गमयोर्गृहबन्धनम्" इत्यपि पाठभेदः अस्ति ।
"गजभुजङ्गमयोरपि बन्धनम्" इत्यपि पाठान्तरम् अस्ति ।

www.thearyasamaj.org



| | |
|---|---|
| किं विलोक्य 'विधिः बलवानितिं' मे मतिः (जाता) ? | गज-भुजङ्गविहङ्गम-बन्धनं विलोक्य। |
| अपि च किं विलोक्य ? | शशिदिवाकरयोः ग्रहपीडनं विलोक्य। |
| पुनश्च किं विलोक्य ? | मतिमतां दरिद्रतां च विलोक्य। |

**अन्वयः**

गजभुजङ्गविहङ्गमबन्धनम्, शशिदिवाकरयोः ग्रहपीडनम् मतिमताञ्च दरिद्रतां विलोक्य अहो! विधिः बलवान् इति मे मतिः (जाता)।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| गजभुजङ्गविहङ्गम-बन्धनम् | मत्तगजस्य, व्यालस्य विहङ्गानां च नियमनं | हाथी, विषधर एवं पक्षियों का बन्धन | elephant, snake & birds bondages |
| शशि दिवाकरयोः | राहुणा सूर्याचन्द्रमसोः | सूर्य और चन्द्रमा का | sun & moon |
| ग्रहपीडनम् | ग्रसनम् | राहु ग्रह द्वारा ग्रसन | trapped by *Rāhu* planet |
| मतिमतां च | बुद्धिमतां च जनानां | और बुद्धिमान् जनों की | and of intelligent people |
| दरिद्रताम् | दारिद्र्यम् | दरिद्रता को | poverty |
| विलोक्य | निरीक्ष्य | देखकर | seeing |
| अहो | आश्चर्यं | अहा! | Oh! |
| विधिः | दैवम् | भाग्य | destiny |
| बलवान् | प्रबलः | प्रबल (है) | (is) supreme |
| इति | एवम् | ऐसी | this |
| मे | मम | मेरी | my |
| मतिः | बुद्धिः | बुद्धि | thinking/decision |
| (जाता) | अभवत् | हुई है | has |

www.thearyasamaj.org



## भावार्थः

**संस्कृतम्–** मत्तगजानां, विषाग्नियुक्तानां सर्पाणाम् अन्तरिक्षचारिणां च विहङ्गानां जालादिना बन्धनं विलोक्य सूर्यचन्द्रयोः राहुग्रसनं च विलोक्य, बुद्धिमतां जनानां दरिद्रतां च अवलोक्य अहो भाग्यमेव सर्वत्र प्रबलं भवतीति मम बुद्धिर्जायते।

**हिन्दी–** मदमस्त गज, भयङ्कर साँप एवं अन्तरिक्ष में विचरने वाले पक्षियों के बन्धन, सूर्य एवं चन्द्रमा का राहु द्वारा ग्रसित होना और बुद्धिमानों की दरिद्रता को देखकर अहो भाग्य ही प्रबल होता है, ऐसा मेरा निश्चय है।

**आङ्ग्लम्–** Seeing the intoxicated elephant, deadly poisonous snake Cobra & skyflying birds in bondages, seeing the Sun & Moon trapped by *Rāhu*, and seeing the poverty of intelligent persons, with surprise I can say, destiny is supreme.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

शशिदिवाकरयोर्ग्रहपीडनम् – शशिदिवाकरयोः + ग्रहपीडनम् (विसर्गसन्धिः)

विधिरहो – विधिः + अहो (उभयत्र अवसानभङ्गात् विसर्गः रेफत्वेन परिवर्तितः) (विसर्गसन्धिः)
यथा– हरिः + आह - हरिराह

मतिमताञ्च – मतिमताम् + च (मस्यानुस्वारः, अनुस्वारस्य परसवर्णः) यथा– किम् + चन - किञ्चन, शम् + करः - शङ्करः, विधुम् + तुदः - विधुन्तुदः

**(ख) समासः**

गजभुजङ्गविहङ्गमबन्धनम् – गजश्च भुजङ्गश्च विहङ्गमश्च इति - गजभुजङ्ग-विहङ्गमाः (इतरेतरयोगद्वन्द्वसमासः) तेषां बन्धनम् (षष्ठी तत्पु.)

शशिदिवाकरयोः – शशी च दिवाकरश्च - शशिदिवाकरौ, तयोः (द्वन्द्वसमासः)

www.thearyasamaj.org



(ग) कृदन्तः

| | | |
|---|---|---|
| बन्धनम् | – | बन्ध् + ल्युट्, (योरनिर्देशः) प्र. एक. |
| पीडनम् | – | पीड् + ल्युट् (योरनादेशः) |
| विलोक्य | – | वि√लोक् + क्त्वास्थाने ल्यप् |
| मतिमताम् | – | मतिः अस्ति एषाम् इति, मति + मतुप् - मतिमत्, षष्ठी बहु. |
| बलवान् | – | बलम् अस्ति अस्य इति, बल + मतुप् - बलवत् प्र. एक. यथा– श्रीमान्, धनवान्, विद्यावान्, धीमान् |

(ii) पर्यायशब्दाः

| | | |
|---|---|---|
| शशी | – | चन्द्रः, चन्द्रमाः विधुः राकेशः |
| विहङ्गमः | – | विहगः, विहङ्गः, खगः, पक्षी |
| भुजङ्ग | – | सर्पः, व्यालः, नागः, फणी |

(iii) छन्दः – द्रुतविलम्बितम्

(iv) अलङ्कारः – अर्थान्तरन्यासः

**अवधेयम्**

**काव्यसन्देशः** – महतां जनानां, जीवानामपि च बन्धनादिदर्शनेन जीवने भाग्यस्य प्राधान्यमिति सन्देशः।

---

## अभ्यासः – 31
## श्लोकः – 81

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

गज.................................................बन्धनं ......................................................पीडनम्।
मतिमताञ्च ................................ ................................ विधिरहो ................................ मे मतिः॥

www.thearyasamaj.org



2. संयोज्य वियोज्य वा लिखत–

(i) शशिदिवाकरयोः ग्रहपीडनम् – ..........

(ii) मतिमताम् च – ..........

(iii) विधिरहो बलवानिति – ..........

3. उत्तराणि दत्त–

(i) ग्रहपीडनम् कयोर्भवति ?

..........

(ii) केषां बन्धनं विलोक्यते ?

..........

(iii) मतिमतां किं विलोक्य कविः चकितो भवति ?

..........

(iv) कवेः का मतिर्विद्यते ?

..........

4. पदपरिचयं दत्त–

(i) शशिदिवाकरयोः – ..........

(ii) मतिमताम् – ..........

(iii) विलोक्य – ..........

(iv) बलवान् – ..........

5. उपयुक्तं शब्दम् उपयुक्तेन शब्देन योजयत–

| | | | |
|---|---|---|---|
| (i) | बन्धनम् | (क) | विधिः |
| (ii) | ग्रहपीडनम् | (ख) | मतिमताम् |
| (iii) | दरिद्रता | (ग) | शशिदिवाकरयोः |
| (iv) | बलवान् | (घ) | गजभुजङ्गविहङ्गमानाम् |

www.thearyasamaj.org



6. सन्धिं/सन्धिविच्छेदं कुरुत–

| | | | | |
|---|---|---|---|---|
| (i) | तयोः + ग्रहः | – | .................... | अयमस्ति। |
| (ii) | अहो विधिः + अयम् | – | .................... | बलवान्। |
| (iii) | मतिमताञ्च | – | .................... | इदं कार्यम्। |
| (iv) | शम् + करः | – | .................... | महादेवः। |
| (v) | विधुन्तुदः | – | .................... | राहुरस्ति। |

7. विग्रहं कुरुत–

(i) ग्रहपीडनम् – ....................

(ii) खगमृगमनुजबन्धनम् – ....................

(iii) गजभुजङ्गौ – ....................

8. प्रश्नानामुत्तराणि दत्त–

(i) शशिदिवाकरयोः पीडनं केन भवति ?

....................

(ii) गजभुजङ्गादीनां किं दृष्ट्वा विधेः बलवत्तां कथयति कविः ?

....................

(iii) केषां दरिद्रतां विलोक्य कविः विधेः बलवत्तां कथयति ?

....................

(iv) किं किं दृष्ट्वा 'विधिरहो बलवानिति' उच्यते कविना ?

....................

9. पर्यायशब्दैः वाक्यं पूरयत–

| | | | | |
|---|---|---|---|---|
| (i) | शशी | – | .................... | रात्रौ आकाशं पृथ्वीं च प्रकाशयति। |
| (ii) | विहङ्गमाः | – | .................... | आकाशे उड्डीयन्ते। |
| (iii) | भुजङ्गः | – | .................... | विषेण व्याप्तो भयङ्करो भवति। |
| (iv) | सूर्यः | – | .................... | सम्पूर्णमेव जगत् प्रकाशयति। |

www.thearyasamaj.org



10. **कर्मवाच्यवाक्यानि कर्तृवाच्ये परिवर्तयत–**

**यथा–** रामेण ग्रामः गतः = रामः ग्रामम् अगच्छत् / गतवान् ।

(i) मया अधुना पुस्तकानि पठितानि ।

..................................................

(ii) पतता महाफलेन शिरः भग्नम् ।

..................................................

(iii) त्वया बुधाः अवश्यं सन्तर्पिताः ।

..................................................

(iv) सूर्याचन्द्रमसोः राहुणा ग्रासः दृष्टः ।

..................................................

11. **ल्यप्-प्रत्ययं संयोज्य रूपाणि लिखत–**

(i) निर्✓ईक्ष + ल्यप् – ..................

(ii) वि✓धा + ल्यप् – ..................

(iii) आ✓गम् + ल्यप् – ..................

(iv) नि✓हन् + ल्यप् – ..................

(v) उत्✓स्था + ल्यप् – ..................

(vi) अव✓लोक् + ल्यप् – ..................

(vii) वि✓जि + ल्यप् – ..................

12. **अस्य श्लोकस्य संस्कृते अर्थं लिखत–**

..................................................

..................................................

..................................................

..................................................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**सृजति तावदशेषगुणाकरं**
**पुरुषरत्नमलङ्करणं भुवः।**
**तदपि तत्क्षणभङ्गिकरोति चेद्**
**अहह! कष्टमपण्डिततता विधेः॥ 82॥**

**पदच्छेदः**

सृजति तावत् अशेषगुण-आकरम्
पुरुषरत्नम् अलङ्करणम् भुवः।
तत् अपि तत्क्षण-भङ्गि करोति चेत्
अहह ! कष्टम् अपण्डितता विधेः॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| सृजति | सृज् + लट्, प्रपु. एक. (तिङन्तक्रियापदम्) | अपि | अव्ययम् |
| तावत् | अव्ययम् | तत्क्षणभङ्गि | न. नपुं. द्विती. एक., वि. समस्तम् |
| अशेषगुणाकरम् | अ. नपुं. द्विती. एक., वि. समस्तम् | करोति | कृ + लट्, प्रपु. एक. (तिङन्तक्रियापदम्) |
| पुरुषरत्नम् | अ. नपुं. द्विती. एक. (विशेष्यपदम्) | चेत् | अव्ययम् |
| | | अहह | अव्ययम् |
| अलङ्करणम् | अ. नपुं. द्विती. एक. (कृदन्तवि.) | कष्टम् | अ. नपुं. प्र. एक. |
| | | अपण्डितता | आ. स्त्री. प्र. एक. समस्तम् |
| भुवः | ऊ. स्त्री. षष्ठी एक. | विधेः | इ. पुं. षष्ठी एक. |
| तत् | द. नपुं. द्विती. एक. सर्व. | | |

www.thearyasamaj.org



## आकाङ्क्षा

**सृजति ।**

| | |
|---|---|
| कः सृजति ? | (विधिः) सृजति । |
| किं तावत् सृजति ? | पुरुषरत्नं तावत् सृजति । |
| कीदृशं पुरुषरत्नं सृजति ? | अशेषगुणाकरं, भुवः अलङ्करणं पुरुषरत्नं तावत् सृजति । |

**करोति चेत् ।**

| | |
|---|---|
| किं करोति चेत् ? | तत्क्षणभङ्गिकरोति चेत् । |
| किं तत्क्षणभङ्गि करोति चेत् ? | तदपि (विधिः यत् अशेषगुणकरं, भुवः अलङ्करणं पुरुषरत्नं सृजति तदपि) तत्क्षणभङ्गि करोति चेत् । |
| ...... चेत् किम् ? | ...... चेत् कष्टम् । |
| किं चेत् कष्टम् ? | (यत्) ..... पुरुषरत्नं सृजति, तदपि तत्क्षणभङ्गि करोति चेत् (तत्) कष्टम् । |
| अहह! (किम् एतत् ?) | अहह! विधेः अपण्डितता । |

## अन्वयः

(विधिः) अशेषगुणाकरम् भुवः अलङ्करणम् पुरुषरत्नं तावत् सृजति, तत् अपि तत्-क्षणभङ्गिकरोति चेत्, अहह! विधेः अपण्डितता कष्टम् ।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| (विधिः) | ब्रह्मा/विधाता | ब्रह्मा/विधाता | *Brahmā*/Creator |
| अशेषगुणाकरम् | सकल गुणनिधानम् | सम्पूर्ण गुणों का आकर | with all qualities |
| भुवः | पृथिव्याः | पृथ्वी का | of earth |
| अलङ्करणम् | आभूषणम्/मण्डनम् | आभूषण | ornament |
| पुरुषरत्नम् | नररत्नम्/नरश्रेष्ठं | श्रेष्ठ नर को | great man |
| सृजति | निर्माति | बनाता है | makes |
| तावत् | खलु | तो | then |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| तद् अपि | तं नरश्रेष्ठमपि/ तन्नररत्नमपि | उस नरश्रेष्ठ को भी | that gem of men |
| तत्क्षणभङ्गि | तत्क्षणभङ्गुरं | उसी समय नष्ट हो जाने वाला | short lived |
| करोति चेत् | निर्माति यदि | यदि बनाता है | if makes |
| अहह | अहो ! | अहो | alas! |
| विधेः | विधातुः | ब्रह्मा की | creator's |
| अपण्डितता | मूढता | मूर्खता | foolishness |
| कष्टम् | कष्टप्रदमस्ति | कष्टप्रद है | is painful |

## भावार्थः

**संस्कृतम्–** विधाता समग्रगुणनिधानं पृथिव्याः अलङ्करणभूतं कमपि नरश्रेष्ठं निर्माति। तादृशं पुरुषरत्नं सृजन्नपि यदि तत् क्षणभङ्गुरं नश्वरमेव विदधाति चेत्, अहो ब्रह्मणः मूर्खता कष्टदायिनी एव।

**हिन्दी–** विधाता सम्पूर्ण गुणों के आगार, पृथ्वी के अलङ्कार बने किसी पुरुषरत्न को बनाता तो है, किन्तु वैसे पुरुष को रचकर भी यदि उसे क्षणभङ्गुर (अस्थायी) बनाता है, तो अहो ! ब्रह्मा की यह मूर्खता कितनी कष्टदायिनी है।

**आङ्ग्लम्–** The creator does create a gem of man, an ornament of the earth with all qualities but makes him short-lived, then alas! the foolishness of the creator is much painful.

## निदर्शनम्

(i) व्याकरणम्

(क) **सन्धिः**

तावदशेषगुणकरम् – तावत् + अशेषगुण + आकरम्
(तावत् + अशेषगुण → जश्त्वसन्धिः) (अशेषगुण + आकरम् → दीर्घसन्धिः)

तदपि – तत् + अपि (तस्य जश्त्वेन दः) (जश्त्वसन्धिः)

चेदहह – चेत् + अहह (जश्त्वसन्धिः)

(ख) **समासः**

अशेषगुणाकरम् – न शेषाः अशेषाः (नञ् समासः) अशेषाश्च

www.thearyasamaj.org



| | | |
|---|---|---|
| | | ते गुणाः - अशेषगुणाः (कर्मधारयः) अशेषगुणानाम् आकरः, तम् (षष्ठी तत्पु.) |
| पुरुषरत्नम् | – | पुरुषेषु रत्नम् (सप्त. तत्पु.) |
| अलङ्करणम् | – | अलं करोति इति - अलम् + कृ + ल्युः, योरनादेशः। (मस्यानुस्वारपरसवर्णौ) |
| तत्क्षणभङ्गि | – | तच्च क्षणम् तत्क्षणम् (कर्मधारयः) तत्क्षणे भञ्जयति तत्छीलम् इति - तत्क्षणभञ्ज् + णिनिः नपुं. प्र. एक. यथा– तत्कालभङ्गि, यथाकालनाशी (पुं.) |
| अपण्डितता | – | न पण्डितः - अपण्डितः (नञ् समासः) अपण्डितस्य भावः इति, अपण्डित + तल् + टाप्, तलन्तं स्त्रियां भवति। यथा– अबुधता, असुजनता। |
| सृजति | – | सृज् + लट्, प्रपु. एक. (तुदादिगणस्थो धातुः) |
| करोति | – | कृ + लट्, प्रपु. एक. तनादिकृञ्भ्यः उः इति उ-विकरणम् यथा– तन् + लट् = तनोति |
| भुवः | – | भू शब्दः स्त्रीलिङ्गः, षष्ठी एक. |

(ख) **पर्यायशब्दाः**

| | | |
|---|---|---|
| आकरः | – | खनिः, निधानम्, निधिः |
| भूः | – | पृथ्वी, धरित्री, धरणी |
| विधिः | – | ब्रह्मा, विधाता, वेधाः |

(ii) **छन्दः** – द्रुतविलम्बितम्

**अवधेयम्**

**'भू' शब्दस्य रूपाणि स्मरत–**

| | | | |
|---|---|---|---|
| प्र. | भूः | भुवौ | भुवः |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| द्विती. | भुवम् | भुवौ | भुवः |
| तृ. | भुवा | भूभ्याम् | भूभिः |
| चतु. | भुवे | भूभ्याम् | भूभ्यः |
| पं. | भुवः | भूभ्याम् | भूभ्यः |
| षष्ठी | भुवः | भुवोः | भुवाम् |
| सप्त. | भुवि | भुवोः | भूषु |
| सम्बो. प्र. | हे भूः ! | हे भुवौ ! | हे भुवः ! |

## अभ्यासः – 32
## श्लोकः – 82

1. श्लोकं लिखत–

.............................................................................................

............................................................................................. ।

.............................................................................................

............................................................................................. ॥

2. संयोज्य वियोज्य वा लिखत–

(i) तावत्-अशेषगुण-आकरम् – ..........................................

(ii) पुरुषरत्नम् अलङ्करणम् भुवः – ..........................................

(iii) तदपि चेदहह – ..........................................

(iv) कष्टमपण्डितता – ..........................................

3. अव्ययपदानि लिखत–

.......................... .......................... .......................... ..........................

www.thearyasamaj.org



4. प्रथमान्तपदं नीचैः लिखत–

.................... ....................

5. द्वितीयान्तपदं लिखत–

.................... ....................

6. क्रियापदं नीचैः लिखत–

.................... ....................

7. समाधत्त–

(i) विधिः कं सृजति ?

........................................................................ ।

(ii) पुरुषरत्नं कस्याः अलङ्करणमस्ति ?

........................................................................ ।

(iii) क्षणभङ्गिपुरुषरत्नं विधेः कं गुणं प्रकटयति ?

........................................................................ ।

(iv) कविः कुत्र कष्टं व्यञ्जयति ?

........................................................................ ।

8. 'पुरुषरत्नम्' इत्यस्य विशेषणद्वयम् अधो लिखत–

.................................... ....................................

9. कोष्ठकस्थपदानां यथोचितं वाक्ये प्रयोगं कुरुत–

| करोति चेत्, मण्डनम्, इयम्, अपण्डितता |
|---|

(i) अयं जनः पृथिव्या .................... अस्ति।

(ii) विधातुः अपूर्वा रचना .................... अस्ति।

www.thearyasamaj.org



(iii) क्षणभङ्गि .................... विधेः .................... ।

10. विग्रहं समस्तं पदं वा लिखत–

(i) सकलगुणनिधानम् – ..............................

(ii) नररत्नम् – ..............................

(iii) तत्क्षणे नश्यति इति, तत् – ..............................

(iv) न बुधः, तस्य भावः – ..............................

11. कृ-धातोः लटि रूपाणि अस्मिन् पाठे कुत्रचित् सन्ति। तानि स्मृत्वा लिखत–

प्रपु. .................... .................... ....................
मपु. .................... .................... ....................
उपु. .................... .................... ....................

12. सृजति इति धातुरूपं तुदति इतिवद् भविष्यति। स्मरत लिखत च–

प्रपु. .................... .................... ....................
मपु. .................... .................... ....................
उपु. .................... .................... ....................

13. विशेषणं संयोज्य वाक्यं पूरयत–

(i) ब्रह्मा .................... .................... नरं सृजति।

(ii) किन्तु पुरुषरत्नम् असौ .................... करोति।

(iii) अनेन कर्मणा .................... विधिः प्रतीयते।

(iv) अस्या .................... सर्वे जीवाः अलङ्कारभूताः सन्ति।

14. सृज् कृञ् वा धातुरूपैः वाक्यानि पूरयत–

(i) द्वौ यान्त्रिकौ यन्त्राणि .................... ।

(ii) वयं दृढान् घटान् .................... ।

(iii) ते किमपि कार्यं न .................... ।

www.thearyasamaj.org



(iv) यूयमधुना मम कार्यमेव .................................. किम् ?

(v) विधातारः बहुविधान् पदार्थान् .................................. ।

**15. कोष्ठकयोर्मध्ये विग्रहवाक्यं दत्तमस्ति, तदनुगुणं समस्तपदं रिक्तस्थाने पूरयत–**

(i) अयं जनः .................................. अस्ति । (सकलाः गुणाः, तेषां निधिः)

(ii) अस्य नरस्य .................................. विलोकयतु । (न पण्डितः तस्य भावः, तम्)

(iii) एव मनुष्यः .................................. वर्तते । (विमृश्य करोति तच्छीलः =)

**16. पठितश्लोके किं छन्दः ?**

..................................................................................................................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**येनैवाम्बरखण्डेन संवीतो निशि चन्द्रमाः ।**
**तेनैव च दिवा भानुरहो दौर्गत्यमेतयोः ॥ 83 ॥**

**पदच्छेदः**

येन एव अम्बरखण्डेन संवीतः निशि चन्द्रमाः ।
तेन एव च दिवा भानुः अहो दौर्गत्यम् एतयोः ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| येन | यद्- द. पुं. तृ. एक., सर्व. | एव | अव्ययम् |
| एव | अव्ययम् | च | अव्ययम् |
| अम्बरखण्डेन | अ. पुं. तृ. एक. समस्तम् | दिवा | अव्ययम् |
| संवीतः | अ. पुं. प्र. एक. क्तान्तम् | भानुः | उ. पुं. प्र. एक. |
| निशि | निश्- श्. स्त्री. सप्त. एक. | अहो | अव्ययम् |
| चन्द्रमाः | चन्द्रमस्- स. पुं. प्र. एक. | दौर्गत्यम् | अ. नपुं. प्र. एक. (तद्धितान्तपदम्) |
| तेन | तद्- द. पुं. तृ. एक., सर्व. | एतयोः | एतद्- द. पुं. षष्ठी द्वि., सर्व. |

**आकाङ्क्षा**

**संवीतः ।**

| | |
|---|---|
| कः संवीतः ? | चन्द्रमाः संवीतः । |
| केन चन्द्रमाः संवीतः ? | अम्बरखण्डेन संवीतः । |
| अम्बरखण्डेन कदा चन्द्रमा संवीतः ? | अम्बरखण्डेन निशि चन्द्रमाः संवीतः । |
| अपि च कः संवीतः ? | भानुः संवीतः । |
| भानुः कदा संवीतः ? | भानुः दिवा संवीतः । |
| भानुः दिवा केन संवीतः ? | येनैव अम्बरखण्डेन निशि चन्द्रमाः संवीतः, तेनैव अम्बरखण्डेन भानुः दिवा संवीतः । |

**(इति) अहो दौर्गत्यम् ।**

| | |
|---|---|
| कयोः दौर्गत्यम् ? | एतयोः (सूर्य-चन्द्रमसोः) दौर्गत्यम् । |

www.thearyasamaj.org



अन्वयः

येन अम्बरखण्डेन निशि चन्द्रमाः संवीतः, तेन एव च दिवा भानुः (संवीतः), अहो ! एतयोः दौर्गत्यम् ।

पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| येन | यत्कर्तृकेन | जिस | which |
| अम्बरखण्डेन | आकाशवस्त्रशकलेन | आकाशरूपी वस्त्र के टुकड़े से | by sky as piece of cloth |
| निशि | रात्रौ | रात्रि में | in night |
| चन्द्रमाः | शशी | चन्द्रमा | moon |
| संवीतः | आच्छादितः (भवति) | आच्छादित होता है | is covered |
| तेन एव च | आकाशवस्त्रखण्डेन च | और उसी आकाशरूपी वस्त्र के टुकड़े से | and by the same piece of cloth |
| दिवा | दिने | दिन में | in day |
| भानुः | सूर्यः | सूर्य | sun |
| (संवीतो भवति) | (आच्छादितो भवति) | (आच्छादित होता है) | (is covered) |
| अहो ! | आश्चर्यम् | आश्चर्य है | wonder |
| एतयोः | सूर्यचन्द्रयोः | सूर्य और चन्द्र की | Sun's & Moon's |
| दौर्गत्यम् | दुर्गतित्वम् | (यह) दुर्गति conditon | (this) pitiable |

भावार्थः

**संस्कृतम्–** रात्रौ चन्द्रः येन अम्बरशकलेन आच्छादितो भवति तेनैव आकाशवस्त्रशकलेन च सूर्योऽपि दिने आच्छादितो भवतीति आश्चर्यम् ! एतयोः इयं संकोचदशाप्राप्तिः एव दौर्गत्यम् अस्ति ।

**हिन्दी–** रात्रि में चन्द्रमा जिस आकाशरूपी वस्त्र के खण्ड से आच्छादित होता है, उसी वस्त्रखण्ड से दिन में सूर्य भी आच्छादित होता है। इन दोनों की यह दुर्गति आश्चर्यकारक है।

**आङ्ग्लम्–** The sky as a piece of cloth which covers the moon in the night, the same covers the sun in the daytime. Their such pitiable condition is very astonishing.

www.thearyasamaj.org



## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

येनैवाम्बरखण्डेन – येन + एव + अम्बरखण्डेन
(वृद्धिसन्धिः) (दीर्घसन्धिः)

तेनैव – तेन + एव (वृद्धिसन्धिः)

संवीतो निशि – संवीतः + निशि (विसर्गस्थानिकरेफस्य उत्वं, गुणश्च) यथा– रामः + नमस्कार्यः = रामो नमस्कार्यः

भानुरहो – भानुः + अहो (विसर्गः रेफत्वेन परिवर्तितः अवसानाभावात्)

**(ख) समासः**

अम्बरखण्डेन – अम्बरम् एव खण्डः तेन (कर्मधारयः) अम्बरस्य खण्डः, तेन, (षष्ठी तत्पु.) कर्मणि अनुकर्तुः तृतीया अभूत्।

**(ग) कृदन्तः**

संवीतः – सम्√वी + क्त (कर्मणि) सम√व्येञ् + क्त इत्यपि भवितुमर्हति।

चन्द्रमाः – चन्द्रमस् शब्दः पुंल्लिङ्गः अत्र कर्म वर्तते। संवीतः इत्यत्र कर्मणि क्तविधानात् कर्म उक्तं जातम्। अतः उक्ते कर्मणि चन्द्रमस-शब्दात् प्रथमा भवति।

भानुः – इत्यत्रापि उक्ते कर्मणि प्रथमा।

निशि – निश् शब्दः स्त्रीलिङ्गः, सप्तम्येकवचने रूपम्।

दौर्गत्यम् – दुर्गतेः भावः। दुर्गति + ष्यञ्, आद्यचो वृद्धिः।

www.thearyasamaj.org



(घ) **पर्यायशब्दाः**

अम्बरम् (आकाशार्थे) – व्योमः, नभः, आकाशम्

अम्बरम् (वस्त्रार्थे) – वासः, वस्त्रम्

अम्बरम् – व्योमः, आकाशम्, पुष्करम्, वासः, वस्त्रम्

संवीतः – रुद्धः, आवृतः, आच्छादितः

(ii) **छन्दः** – अनुष्टुप्-छन्दः

**अवधेयम्**

**निट् इति शब्दस्य रूपाणि स्मृत्वा पृथक्पत्रे लिखत–**

| | | | |
|---|---|---|---|
| **प्र.** | निट्-निड् | निशौ | निशः |
| **द्विती.** | निशम् | निशौ | निशः |
| **तृ.** | निशा | निड्भ्याम् | निड्भिः |
| **चतु.** | निशे | निड्भ्याम् | निड्भ्यः |
| **पं.** | निशः | निड्भ्याम् | निड्भ्यः |
| **षष्ठी** | निशः | निशोः | निशाम् |
| **सप्त.** | निशि | निशोः | निक्षु |
| **सम्बो. प्र.** | हे निट्! | हे निशौ! | हे निशः! |

---

## अभ्यासः – 33
## श्लोकः – 83

1. **श्लोकं स्मृत्वा लिखत–**

येनैवाम्बरखण्डेन संवीतो .................... चन्द्रमाः ।
.................... च दिवा .................... दौर्गत्यमेतयोः ॥

2. **सन्धिं विसन्धिं वा कुरुत–**

(i) येन + एव + अम्बरखण्डेन – ....................

(ii) संवीतः + निशि – ....................

www.thearyasamaj.org



(iii) तेनैव च – ..........

(iv) दौर्गत्यमेतयोः – ..........

3. **प्रथमान्त-पदानि अधो लिखत–**

.......... .......... .......... ..........

4. **तृतीयान्तपदानि अधो लिखत–**

.......... .......... ..........

5. **अव्ययपदानि नीचैः लिखत–**

.......... .......... .......... ..........

..........

6. **षष्ठ्यन्तं सप्तम्यन्तं च पदं लिखत–**

.......... ..........

7. **समाधत्त–**

(i) रात्रौ चन्द्रमाः केन संवीतो भवति ?

..........

(ii) भानुः केन दिवा संवीतो भवति ?

..........

(iii) एतयोः दौर्गत्यं किमस्ति ?

..........

(iv) एतयोः दुर्गतौ कारणं किम् ?

..........

www.thearyasamaj.org



**8. कोष्ठकस्थ-पदानां वाक्ये प्रयोगं कुरुत–**

| |
|---|
| **दिवाकरनिशाकरयोः, वस्त्रखण्डेन, निशि, दिवा** |

(i) अयं लघुना .................................. आच्छादितो भवति ।

(ii) .............................. चन्द्रमसः प्रकाशः आह्लादको भवति ।

(iii) भानुः .................................. प्रचण्डस्तपति ।

(iv) अहो एतयोः .......................... .......................... दौर्गत्यम् !

**9. पदपरिचयं दत्त–**

(i) अम्बरखण्डेन – ..........................................................................

(ii) चन्द्रमाः – ..........................................................................

(iii) एतयोः – ..........................................................................

(iv) दौर्गत्यम् – ..........................................................................

**10. 'अहो दौर्गत्यमेतयोः' इत्यस्याः पङ्क्तेः आशयं प्रकाशयत–**

..........................................................................................................

..........................................................................................................

..........................................................................................................

**11. सन्धिं विसन्धिं वा कुरुत–**

(i) देवः + हसति – ..........................................................................

(ii) रामः + गच्छति – ..........................................................................

(iii) तेनैवायं दृष्टः – ..........................................................................

(iv) दौर्गत्यमेतयोः – ..........................................................................

**12. विग्रहं प्रदर्शयत–**

(i) वस्त्रखण्डेन – ..........................................................................

www.thearyasamaj.org



(ii) आकाशकुसुमेन – ..........

(iii) धनलोभेन – ..........

**13. क्तप्रत्ययं संयोज्य रूपं लिखत–**

(i) सृज् + क्त – ..........

(ii) दृश् + क्त – ..........

(iii) हन् + क्त – ..........

(iv) प्रच्छ् + क्त – ..........

(v) शुष् + क्त – ..........

(vi) पच् + क्त – ..........

**14. कर्मवाच्ये परिवर्तयत–**

(i) एनं संसारं कः सृष्टवान् – ..........

(ii) सः ग्रामे मां दृष्टवान् – ..........

(iii) रामः रावणं हतवान् – ..........

(iv) पाचकः व्यञ्जनानि पक्तवान् – ..........

(v) रामः गुरुं पृष्टवान् – ..........

**15. चन्द्रमस्-निश्-शब्दयोः रूपप्रयोगेण वाक्यं पूरयत–**

(i) .......... .......... प्रकाशते।

(ii) .......... प्रकाशो .......... भवति।

(iii) .......... निट् शोभिता भवति।

(iv) द्वयोः .......... एकत्र दर्शनं कथम्।

(v) निशिचराः .......... विचरन्ति।

**16. रेखाङ्कितपदस्य पर्यायशब्दं प्रयुज्य अन्यद्वाक्यं लिखत–**

(i) दिवाकरः <u>दिवा</u> प्रकाशते। – ..........

www.thearyasamaj.org



(ii) अम्बरम् विस्तीर्णमस्ति। – ..........

(iii) संवीतम् इदं गृहं तृणैः। – ..........

(iv) अहह विधेः विधानम्। – ..........

17. श्लोकस्य भावार्थं संस्कृतभाषया लिखत–

..........

..........

..........

..........

..........

..........

..........

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**अयममृतनिधानं नायकोऽप्योषधीनाम्**
**शतभिषगनुयातः शम्भुमूर्ध्नोऽवतंसः।**
**विरहयति न चैनं राजयक्ष्मा शशाङ्कम्**
**हतविधिपरिपाकः केन वा लङ्घनीयः॥ 84॥**

**पदच्छेदः**

अयम् अमृतनिधानम् नायकः अपि ओषधीनाम्
शतभिषग्-अनुयातः शम्भुमूर्ध्नः अवतंसः।
विरहयति न च एनम् राजयक्ष्मा शशाङ्कम,
हतविधि-परिपाकः केन वा लङ्घनीयः॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| अयम् | इदम्- म. पुं. प्र. एक., सर्व. (विशेष्यम्) | न, च | अव्यये |
| | | एनम् | एतद्- द. पुं. द्विती. एक. सर्व. |
| अमृतनिधानम् | अ. नपुं. प्र. एक., वि. समस्तम् | राजयक्ष्मा | न. पुं. प्र. एक. |
| नायकः | अ. पुं. प्र. एक., वि. समस्तम् | शशाङ्कम् | अ. पुं. द्विती. एक. |
| अपि | अव्ययम् | हतविधिपरिपाकः | अ. पुं. प्र. एक. समस्तम् (उक्तं कर्म) |
| ओषधीनाम् | इ. स्त्री. षष्ठी बहु. | | |
| शतभिषगनुयातः | अ. पुं. प्र. एक., वि. समस्तम् | केन | किम्- म. पुं. तृ. एक. सर्व. (अनुक्तकर्तरि तृतीया) |
| शम्भुमूर्ध्नः | न. पुं. षष्ठी एक. | | |
| अवतंसः | अ. पुं. प्र. एक. वि. | वा | अव्ययम् |
| विरहयति | विरह + णिच् + लट्, प्रपु. एक. | लङ्घनीयः | अ. पुं. प्र. एक. (कृदन्तक्रिया) |

**आकाङ्क्षा**

**लङ्घनीयः।**

| | |
|---|---|
| कः लङ्घनीयः ? | हतविधिपरिपाकः लङ्घनीयः। |
| हतविधिपरिपाकः केन लङ्घनीयः ? | केन वा लङ्घनीयः (न केनापि)। |

www.thearyasamaj.org



न च विरहयति ।

| | |
|---|---|
| का न विरहयति ? | राजयक्ष्मा न विरहयति । |
| राजयक्ष्मा कं न विरहयति ? | राजयक्ष्मा एनं शशाङ्कं न विरहयति । |
| अयं शशाङ्कः कीदृशः ? | अयम् अमृतनिधानम्, ओषधीनां नायकः, शतभिषगनुयातः, शम्भुमूर्ध्नः अवतंसः च । |

## अन्वयः

अयम् अमृनिधानम्, ओषधीनाम् नायकः अपि शतभिषगनुयातः शम्भुमूर्ध्नः अवतंसः (अपि अस्ति, तथापि) एनं शशाङ्कं राजयक्ष्मा न च विरहयति, हतविधिपरिपाकः केन वा लङ्घनीयः ।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| अयम् | पुरोदृश्यमानः चन्द्रः | यह दिखाई देता चन्द्रमा | this moon |
| अमृतनिधानम् | पीयूषनिधिः | अमृत की निधि | the repository of ambrosia |
| ओषधीनाम् | भैषज्यानाम् | औषधियों का | of medicines |
| नायकः अपि | स्वामी अपि | स्वामी होता हुआ भी | though lord |
| शतभिषगनुयातः | शतभिषजा नक्षत्रेण अनुसृतः ! शतं भिषजाः वैद्याः, तैः अनुगतः | सैकड़ों वैद्यों से अनुगम्यमान । शतभिषा नक्षत्र से अनुगत | followed by many physicians |
| शम्भुमूर्ध्नः | शिवमस्तकस्य | शिव के मस्तक का | on the forehead of Lord Śiva |
| अवतंसः | भूषणम् | भूषण | an ornament |
| अपि अस्ति | अपि वर्तते | भी है | is also |
| तथापि | तथापि | फिर भी | even then |
| एनं शशाङ्कम् | इमं चन्द्रमसम् | इस चन्द्रमा को | that the moon |
| राजयक्ष्मा | क्षयरोगः | क्षयरोग (राजयक्ष्मा) | tuberculosis |
| न च | नैव | नहीं ही | (is) not |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| विरहयति | मुञ्चति | छोड़ता है | relieved |
| हतविधि | दुर्दैवस्य | दुर्भाग्य का | Alas, the fated |
| परिपाकः | फलम् | फल | result |
| केन वा | केन वा जनेन | किसके द्वार। | by whom |
| लङ्घनीयः | लङ्घितुं योग्यः | पार करने योग्य | could be infringed |

## भावार्थः

**संस्कृतम्–** समक्षं दृश्यमानश्चन्द्रः अमृतनिधिः, ओषधीनाञ्च पतिरपि अस्ति, शतसंख्याकैः वैद्यैः अनुगम्यमानः (श्लेषपक्षे-शतभिषानक्षत्रेण अनुगम्यमानः) कल्याणकारि-शिवमस्तकस्य भूषणमपि अस्ति, तथापि एनं चन्द्रं क्षयरोगः (राज्ञः यक्ष्मा, राजा चासौ यक्ष्मा वा) न मुञ्चति। सत्यमस्ति, दुर्दैवस्य फलं केन लङ्घयितुं योग्यं भवति ? न केनापि लङ्घयितुं शक्यते विधिः इत्याशयः।

**हिन्दी–** सामने दिख रहा यह चन्द्रमा अमृत का निधान है, औषधियों का स्वामी है, सैकड़ों वैद्यों से अनुसृत है (श्लेषपक्ष में - शतभिषा नामक नक्षत्र से अनुगत है) और कल्याणकारी शिव के मस्तक का भूषण भी है, फिर भी इस चन्द्र को क्षयरोग (श्लेषपक्ष में - राजयक्ष्मा r हृदयस्थलीय कलङ्क = धब्बा) नहीं छोड़ता है। सच है, दुर्भाग्य के फल को कौन लांघ सकता है। (दुर्दैव का फल अनुल्लंघनीय है।)

**आङ्ग्लम्–** The moon is the repository of ambrosia, Lord of medicines, followed by many physiciand (*vaidyas*), and is ornament on the forehead of Lord Śiva, even then, that moon is not relieved by *Rājayakshmā*. It is true, that no one can infringe the command of misfortune.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

नायकोऽप्योषधीनाम् – नायकः + अपि + ओषधीनाम् (प्रथमे पदे रेफस्योत्वं गुणः, द्वितीये यण् सन्धिः) यथा– नारायणोऽप्यैश्वर्यवान्।

शम्भुमूर्ध्नोऽवतंसः – शम्भुमूर्ध्नः + अवतंसः (उत्वम्, गुणश्च स्वादिसन्धिः)

www.thearyasamaj.org



| | | |
|---|---|---|
| चैनम् | – | च + एनम् (वृद्धिसन्धिः)<br>यथा– एवैनम्, तथैकम् |

**(ख) समासः**

| | | |
|---|---|---|
| अमृतनिधानम् | – | अमृतस्य निधानम् (षष्ठी तत्पु.)<br>यथा– कीलालनिधानम्, पीयूषनिधिः |
| शतभिषगनुयातः | – | शतं च ते भिषजः इति शतभिषजः (कर्मधारयः), शतभिषग्भिः अनुयातः (तत्पु.) अथवा– शतभिषक् = शतभिषानक्षत्रम्, तेन अनुयातः<br>यथा– सैन्यगणानुयातः, लोभरोगानुयातः |
| शम्भुमूर्ध्नः | – | शम्भोः मूर्धा, तस्य (षष्ठी तत्पु.)। शं = कल्याणं भवति अस्मात् इति शम्भुः, तस्य मूर्धा, तस्य इत्यर्थो वा |
| राजयक्ष्मा | – | राज्ञः यक्ष्मा (षष्ठी तत्पु.) राजा चासौ यक्ष्मा इति (कर्मधारयः) |
| हतविधिपरिपाकः | – | हतः विधिः यस्य सः हस्तविधिः (बहुव्रीहिः) हतविधेः परिपाकः (षष्ठी तत्पु.)<br>यथा– हतभाग्यफलम्, नष्टदैवपरिपाकः |

**(ग) तद्धितान्तः**

| | | |
|---|---|---|
| नायकः | – | नी + ण्वुल् प्रत्ययः (वु इत्यस्य अकादेशः, धातोरीकारस्य वृद्धिः ऐकारः, तस्य आयादेशः)<br>यथा– चायकः, पावकः, कारकः, धारकः। |
| विरहयति | – | वि✓रह् त्यागे (चुरादि) लट्लकारः, प्रपु. एक.<br>यथा– प्रकथयति, विगणयति |

**(घ) पर्यायशब्दाः**

| | | |
|---|---|---|
| अवतंसः | – | उत्तंसः, भूषणम्, कर्णपूरः, शेखरः |
| यक्ष्मा | – | क्षयः, शोषः |

www.thearyasamaj.org



| | | |
|---|---|---|
| राजयक्ष्मा | – | रोगविशेषः |
| नायकः | – | नेता, स्वामी |
| ओषधिः | – | औषधम्, फलपाकान्ताः ओषध्यो भवन्ति। |

(ii) **छन्दः** – मालिनी

**लक्षणम्** – ननमयययुतेयं मालिनी भोगिलोकैः

(iii) **अलङ्कारः**

काव्यशास्त्रीयम् – बहुविधसाधनसम्पन्नोऽपि जनः प्रतिकूलभाग्यस्य दुष्परिणामं भुङ्क्ते एवेति श्लेषमाध्यमेन चन्द्रदृष्टान्तमुपस्थापयन् कविः कथयति।

---

## अभ्यासः – 34
### श्लोकः – 84

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

........................................................................

........................................................................ ।

........................................................................

........................................................................ ॥

2. **संयोज्य वियोज्य वा लिखत–**

(i) नायकः अपि ओषधीनाम् – ..........................

(ii) शम्भुमूर्ध्नः अवतंसः – ..........................

(iii) शतभिषगनुयातः – ..........................

(iv) अयममृतनिधानम् न चैनम् – ..........................

3. **प्रथमान्तपदानि अधो लिखत–**

.................... .................... .................... ....................

.................... .................... .................... ....................

www.thearyasamaj.org



4. द्वितीयान्तपदं नीचैः लिखत–

.................... ....................

5. षष्ठ्यन्तपदम् अधोलिखत–

.................... ....................

6. अव्ययपदम्, तृतीयान्तम्, क्रियापदम् च अधो लिखत–

| अव्ययपदम् | तृतीयान्तम् | क्रियापदम् |
|---|---|---|
| .................... | .................... | .................... |
| .................... | | .................... |
| .................... | | |
| .................... | | |

7. उत्तराणि दत्त–

(i) अमृतनिधानं को वर्तते ? – ....................

(ii) ओषधीनां पतिरपि कैरनुयातोऽस्ति ? – ....................

(iii) कस्यायं शशी अवतंसः ? – ....................

(iv) शशाङ्कं को न त्यजति ? – ....................

8. अयं (चन्द्रः) इति विशेष्यमस्ति। अस्य विशेषणानि श्लोकं दृष्ट्वा नीचैः लिखत–

.................... .................... ....................

.................... ....................

9. पदपरिचयं दत्त–

(i) हतविधिपरिपाकः – ....................

(ii) केन – ....................

(iii) लङ्घनीयः – ....................

www.thearyasamaj.org



**10. सन्धिविच्छेदं सन्धिं वा कुरुत–**

(i) नारायणोऽप्यैश्वर्यवान् – ..........

(ii) शतमूर्ध्नोऽवतारः – ..........

(iii) च + एनम् – ..........

(iv) तथा + अपि + एवम् – ..........

**11. समस्तपदं लिखत–**

(i) नष्टं भाग्यं यस्य, तस्य फलम् – ..........

(ii) सैन्यानां गणः, तेन अनुयातः – ..........

**12. पुरुष-वचन-निर्देशं कुरुत–**

(i) विरहयन्ति – ..........

(ii) विरहयसि – ..........

(iii) विरहयावः – ..........

**13. प्रश्नानामुत्तराणि दत्त–**

(i) राजयक्ष्मां कं न जहति ?

..........

(ii) अमृतनिधिः ओषधीनाञ्च नायकः कः ?

..........

(iii) कस्यावतसश्चन्द्रोऽस्ति ?

..........

(iv) शतभिषगनुयातः इत्यस्यार्थद्वयं लिखत ?

..........

www.thearyasamaj.org



14. रेखाङ्कितपदस्य स्थाने पर्यायशब्दं प्रयुज्य वाक्यं लिखत–

(i) चन्द्रः अमृत**निधानम्** अस्ति। – ..........
(ii) **शिवमस्तकस्य** अवतंसः विधुः। – ..........
(iii) त्वं कस्य **अवतंसः** असि। – ..........
(iv) **शशाङ्कं** राजयक्ष्मा न त्यजति। – ..........
(v) अयं **नेता** अस्माकं सर्वेषाम्। – ..........

15. कोष्ठकस्थ-पदानां वाक्ये प्रयोगं कुरुत–

| ओषधीनाम्, नष्टभाग्यफलं, उत्तंसः, सैन्यगणानुयातः |
|---|

(i) दुःखं सहमानोऽयं .......... भुङ्क्ते।
(ii) कार्तिकेयः .......... ।
(iii) चन्द्रः शिवशिरसः .......... अस्ति।
(iv) चन्द्रः नायकोऽ .......... वर्तते।

16. अनीयर्-प्रत्ययः कर्मणि भावे वा भवति। एनं अनीयर्-प्रत्ययं संयोज्य वाक्यं पूरयत–

(i) मया इदं कार्यं .......... (कृ + अनीयर्)
(ii) त्वया पाठ्यग्रन्थाः .......... (प्र✓दृश् + अनीयर्)
(iii) दुर्जनसंगतिः सर्वथा .......... (त्यज् + अनीयर्)
(iv) सद्गुणाः अस्माभिः .......... (धृ + णिच् + अनीयर्)
(v) विधिना ललाटलिखितं न .......... (लङ्घ + अनीयर्)

17. ण्वुल्प्रत्ययान्तपदेन वाक्यं पूरयत–

(i) सूर्यः अहोरात्रस्य .......... अस्ति। (कृ)
(ii) अयं तव ऋणस्य .......... वर्तते। (धृ)
(iii) अग्निः सर्वेषां .......... विद्यते। (पू)
(iv) हनूमान् वानराणां .......... आसीत्। (नी)

www.thearyasamaj.org



18. वि✓रह्, प्र✓कथ्, प्र✓गण्, धातूनां रूपेण वाक्यं पूरयत–

(i) पाण्डुरोगः शशिनं न ........................ ।

(ii) अयं कथावाचकः कथां ........................ ।

(iii) ते मन्दिरे रूप्यकाणि ........................ ।

(iv) अपोषकान्नभक्षिणः यक्ष्मा न ........................ ।

(v) अहं सुवर्णपणकान् साधु ........................ ।

(vi) यूयं कस्य समाचारान् ........................ ।

19. अनेन पद्येन कविः किं सन्दिशति ?

........................................................................................................

........................................................................................................

........................................................................................................

◆◆◆

www.thearyasamaj.org



## श्लोकः

**प्रियसख ! विपद्दण्डाघातप्रपातपरम्परा-**
**परिचयबले चिन्ताचक्रे निधाय विधिः खलः ।**
**मृदमिव बलात् पिण्डीकृत्य प्रगल्भकुलालवद्**
**भ्रमयति मनो नो जानीमः किमत्र विधास्यति ॥ 85 ॥**

## पदच्छेदः

प्रियसख ! विपद्-दण्डाघात-प्रपात-परम्परा-
परिचय-बले चिन्ताचक्रे निधाय विधिः खलः ।
मृदम् इव बलात् पिण्डीकृत्य प्रगल्भ-कुलालवत्
भ्रमयति मनः नो जानीमः किम् अत्र विधास्यति ॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| प्रियसख ! | अ. पुं. सम्बो. एक. समस्तम् | पिण्डीकृत्य | ल्यबन्तम् अव्ययम् |
| विपद्दण्डाघात-<br>प्रपातपरम्परा-<br>परिचयबले | अ. नपुं. सप्त. एक.<br>समस्तम् (विशेष्यम्) | प्रगल्भकुलालवत् | अव्ययम् समस्तम्, च<br>वतिप्रत्ययान्तं पदम् |
| चिन्ताचक्रे | अ. नपुं. सप्त. एक. समस्तम्,<br>विशेष्यम् | भ्रमयति | भ्रम् + णिच् + लट्, प्रपु.<br>एक. (तिङन्तक्रिया) |
| | | मनः | स. नपुं. द्विती. एक. |
| निधाय | ल्यबन्तम् अव्ययम् | नो | अव्ययम् |
| विधिः | इ. पुं. प्र. एक. कर्तृपदम्<br>(विशेष्यम्) | जानीमः | ज्ञा + लट्, उपु. बहु.<br>(तिङन्तक्रिया) |
| खलः | अ. पुं. प्र. एक. वि. | किम् | अव्ययम् |
| मृदम् | मृद्- द. स्त्री. द्विती. एक. | अत्र | अव्ययम् |
| इव | अव्ययम् | विधास्यति | वि✓धा + लृट् (भविष्यत्<br>कालः) प्रपु. एक. तिङन्तक्रिया |
| बलात् | अव्ययम् | | |

www.thearyasamaj.org



## आकाङ्क्षा

**नो जानीमः ।**

| | |
|---|---|
| किं नो जानीमः ? | किम् अत्र विधास्यति (इति) नो जानीमः । |
| कः अत्र किं विधास्यति (यत्) न जानीमः ? | विधिः अत्र किं विधास्यति इति न जानीमः । |

**भ्रमयति ।**

| | |
|---|---|
| कः भ्रमयति ? | खलः विधिः भ्रमयति । |
| किंवत् भ्रमयति ? | प्रगल्भकुलालवत् भ्रमयति । |
| विधिः किं भ्रमयति ? | विधिः मनः भ्रमयति । |
| विधिः मनः काम् इव भ्रमयति ? | विधिः मनः मृदम् इव भ्रमयति । |
| विधिः मनः किं कृत्वा भ्रमयति ? | विधिः मनः बलात् पिण्डीकृत्य भ्रमयति । |
| मनः कुत्र निधाय भ्रमयति ? | मनः चिन्ताचक्रे निधाय भ्रमयति । |
| कीदृशे चिन्ताचक्रे निधाय भ्रमयति ? | विपद्दण्डाघातप्रयातपरम्परापरिचयबले चिन्ताचक्रे भ्रमयति । |

## अन्वयः

हे प्रियसख ! खलः विधिः प्रगल्भकुलालवत् मनः मृदम् इव बलात् पिण्डीकृत्य विपद्दण्डाघातप्रपात-परम्परापरिचयबले चिन्ताचक्रे निधाय भ्रमयति । अत्र किं विधास्यति (इति) नो जानीमः ।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| हे प्रियसख ! | हे प्रियमित्र ! | हे प्रियमित्र ! | O friend ! |
| खलः | दुष्टः | दुष्ट | wicked |
| विधिः | विधाता | विधाता | the creator |
| प्रगल्भकुलालवत् | प्रौढकुम्भकारवत् | प्रौढ़ कुम्हार के समान | like expert potter |
| मनः | चित्तम् | मन को | mind |
| मृदम् इव | मृत्तिकाम् इव | मिट्टी के समान | like clay |
| बलात् | हठात् | बलपूर्वक | forcibly |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| पिण्डीकृत्य | पिण्डं विधाय | पिण्ड बनाकर | making ball |
| विपद्दण्डाघात-<br>प्रपातपरम्परा-<br>परिचयबले | विपत्तेः प्रहाराणां<br>प्रपतनापरम्परायाः<br>परिचयशक्तिरूपे | विपत्ति रूपी दण्ड प्रहारों<br>के करने की परम्परा<br>की जानकारी रूपी बल<br>वाले | strokes of rod of<br>adversities |
| चिन्ताचक्रे | चिन्तारूपिणि चक्रे | चिन्तारूपी चक्र में | on wheel of anxiety |
| निधाय | निक्षिप्य | रखकर | keeping |
| भ्रमयति | परिभ्रामयति | घुमाता है | revolves |
| अत्र | अस्मिन् भ्रमे | इस घुमाव में | in this rotation |
| किं विधास्यति (इति) | किं करिष्यति (इति) | वह क्या करेगा (यह) | what he will do |
| नो जानीमः | न विद्मः | हम नहीं जानते | we do not know |

## भावार्थः

**संस्कृतम्–** हे प्रियमित्र ! दुष्टो विधाता प्रौढकुम्भकारवत् मम मनः मृत्तिकामिव बलपूर्वकं पिण्डं विधाय विपत्तिरूपदण्डप्रहाराणां प्रपतनपरम्परायाः परिचयरूपिबलयुक्ते चिन्तारूपिणि चक्रे निधाय भ्रमयति। अत्र भ्रमे सः किं करिष्यति इति वयं न जानीमः।

**हिन्दी–** प्रिय मित्र ! दुष्ट विधाता प्रौढ़ कुम्हार की भाँति मेरे मन को मिट्टी के समान बलपूर्वक पिण्ड बनाकर विपत्ति रूपी दण्डों के आघातों के लगने की परम्परा से परिचित शक्ति वाले चिन्ता रूपी चाक पर रखकर घुमा रहा है। इस घुमाव में वह क्या करेगा हम यह नहीं जानते।

**आङ्ग्लम्–** Dear friend ! Wicked fate like an expert potter making my mind forcibly as a ball of clay whirls it round on the wheel of anxiety which is being revolved by the stroke of rod of affliction; we do no know, what he will do in this rotation.

## निदर्शनम्

(i) व्याकरणम्

(क) सन्धिः

कुलालवद् भ्रमयति – कुलालवत् + भ्रमयति (जश्त्वसन्धिः)

यथा– तत् + वत् + भ्रमः (तद्वद्भ्रमः)

मनो नो – मनः + नो (उत्वगुणसन्धिः)

www.thearyasamaj.org



(ख) **समासः**

| | | |
|---|---|---|
| प्रियसख | – | प्रियश्चासौ सखा च इति, प्रियसखि + टच् समासान्तः, इकारलोपः (कर्मधारयः) यथा– राजसखः, देवसखः |
| विपद्दण्डाघातप्रपात-परम्परापरिचयबले | – | विपत्तिरेव दण्डः विपत्तिदण्डः (कर्मधारयः) तस्य आघाताः विपत्तिदण्डाघाताः, तेषां प्रपाताः विपद्दण्डाघात-प्रपाताः, तेषां परम्परा विपद्दण्डा-घातप्रपातपरम्परा, तस्याः परिचयः विपद्दण्डाघात-प्रपातपरम्परापरिचयः (षष्ठी तत्पु.) विपद्दण्डा-घातप्रपातपरम्परापरिचयः एव बलं यस्य, तस्मिन् (बहुव्रीहिः) |
| चिन्ताचक्रे | – | चिन्ता एव चक्रम्, तस्मिन् (कर्मधारयः) |
| प्रगल्भकुलालवत् | – | प्रगल्भश्चासौ कुलालश्च इति प्रगल्भकुलालः (कर्मधारयः) तेन तुल्यं इत्यर्थे वतिप्रत्ययः वतिप्रत्ययान्तम् अव्ययं भवति। |

(ग) **कृदन्तः**

| | | |
|---|---|---|
| निधाय | – | नि✓धा + क्त्वास्थाने ल्यप् यथा– प्रदाय, आदाय, विधाय |
| पिण्डीकृत्य | – | अपिण्डं पिण्डं विधाय इति, पिण्ड + च्वि + कृ + क्त्वास्थाने ल्यप् (तुगागमः) = पिण्डीकृत्य यथा– चूर्णीकृत्य, दृढीकृत्य, विधानीकृत्य |
| भ्रमयति | – | भ्रम् + णिच् = भ्रमि + लट् प्रपु. एक. |
| जानीमः | – | ज्ञा धातुः जा-आदेशः + लट्लकारः, श्नाविकरणः, उपु. बहु. यथा– क्रीणीमः, लुनीमः, पुनीमः। |
| विधास्यति | – | वि✓धा + लृट् (भविष्यति काले) प्रपु. एक. |

www.thearyasamaj.org



(घ) **पर्यायशब्दाः**

| | | |
|---|---|---|
| प्रगल्भः | – | प्रौढः |
| प्रपातः | – | प्रपतनम्, अटहः |
| खलः | – | शठः, दुष्टः, दुर्जनः |

(ii) **छन्दः** – हरिणी-छन्दः

**लक्षणम्** – नसमरसलागः षड्वेदैर्हयैर्हरिणी मता।

(iii) **अलङ्कारः** – कुलालसादृश्यं विधेः प्रतिपादितम्। अतः उपमालङ्कारः। (रूपकम् अपि)

**अवधेयम्**

**वि✓धा + लृट् रूपाणि (भविष्यत्काले)–**

| | | | |
|---|---|---|---|
| **प्रपु.** | विधास्यति | विधास्यतः | विधास्यन्ति |
| **मपु.** | विधास्यसि | विधास्यथः | विधास्यथ |
| **उपु.** | विधास्यामि | विधास्यावः | विधास्यामः |

**ज्ञाधातोः रूपाणि लटि परस्मैपदे एतानि सन्ति–**

| | | | |
|---|---|---|---|
| **प्रपु.** | जानाति | जानीतः | जानन्ति |
| **मपु.** | जानासि | जानीथः | जानीथ |
| **उपु.** | जानामि | जानीवः | जानीमः |

---

## अभ्यासः – 35
## श्लोकः – 85

1. **श्लोकं पूरयत–**

प्रियसख ! विपद.............................................................परम्परा

...............बले ...............चक्रे ............... ............... खलः।

www.thearyasamaj.org



मृदमिव .................. पिण्डीकृत्य ....................कुलाल............
.................. मनो नो .................. .................. विधास्यति ॥

2. **संयोज्य वियोज्य वा लिखत–**

(i) विपद् दण्ड-आघात प्रपाते – ..................

(ii) मृदम् इव पिण्डीकृत्य – ..................

(iii) मनो नो जानीमः – ..................

(iv) किमत्र – ..................

3. **अव्ययपदानि अधोलिखत–**

..................

..................

4. **प्रथमान्तपदम् अधो लिखत–**

..................

5. **तिङन्तक्रियापदानि नीचैः लिखत–**

..................

6. **सप्तम्यन्तपदं द्वितीयान्तपदं च लिखत–**

.................. ..................

.................. ..................

7. **उत्तराणि दत्त–**

(i) कविः पद्ये कं सम्बोधयति ?

..................

www.thearyasamaj.org



(ii) विधिः कुत्र निधाय मनः भ्रमयति ?

..........................................................................................

(iii) कुलालवद् विधिः किं करोति ?

..........................................................................................

(iv) मनः काम् इव पिण्डीकरोति विधिः ?

..........................................................................................

**8. पदपरिचयं दत्त–**

(i) चिन्ताचक्रे – ..............................

(ii) भ्रमयति – ..............................

(iii) कुलालवत् – ..............................

(iv) प्रियसख – ..............................

**9. वाक्ये प्रयोगं कुरुत–**

| **जानीमः, भ्रमयति, प्रियसख !, पिण्डीकृत्य** |
|---|

(i) विधिः चिन्ताचक्रे मनः .................... ।

(ii) कुम्भकारः मृदम् .................... चक्रे निदधाति ।

(iii) वयं न .................... नियतिः का अस्ति ।

(iv) .................... चिन्तां न करोतु ।

**10. ल्यप् प्रत्ययं संयोज्य लिखत–**

(i) प्र√दा + ल्यप् – ..............................

(ii) वि√धा + ल्यप् – ..............................

(iii) आ√गम् + ल्यप् – ..............................

(iv) प्र√कृ + ल्यप् – ..............................

www.thearyasamaj.org



(v) सम्√हृ + ल्यप् – ..........

(vi) अधि + कृ + ल्यप् – ..........

**11. समस्तं पदं विग्रहं वा कुरुत–**

(i) देवस्य सखा, तम् – ..........

(ii) सरलः च पन्थाः, सः – ..........

(iii) राज्ञः सखा – ..........

(iv) प्रौढ पण्डितवत् – ..........

(v) ध्यानचक्रम् – ..........

**12. प्रश्नानाम् उत्तराणि दत्त–**

(i) विपद्दण्डाघात इत्यत्र विपतिः कीदृशी उक्ता ?

..........

(ii) प्रगल्भकुलालवत् कस्य कार्यं वर्णितम् ?

..........

(iii) मनः कस्मिन् चक्रे निधाय भ्रमयति विधिः ?

..........

(iv) कुलालः बलात् कां पिण्डीकरोति ?

..........

**13. रेखाङ्कितपदस्य पर्यायशब्दं विलिख्य अन्यद्वाक्यं लिखत–**

(i) अयं जनः प्रौढः विद्वान् आस्त। – ..........

(ii) दण्डाघातस्य प्रपाताः भवन्ति। – ..........

(iii) अयं शठः अकार्यं कराति। – ..........

www.thearyasamaj.org



**14. ल्यबन्तप्रयोगेन वाक्यं पूरयत–**

(i) चौरः धनम् .................... पलायितः। (अप√हृ)

(ii) सः तस्मात् ग्रन्थम् .................... गच्छति। (आ√दा)

(iii) कर्मकराः कार्याणि .................... गताः। (वि√धा)

(iv) ते गुप्तं स्थानं .................... आगच्छन्ति। (प्र√दृश्)

(v) चक्रे .................... मृदं घटं करोति। (नि√धा)

(vi) ते अत्र .................... तत्र गच्छन्तु। (आ√गम्)

**15. विधा इति धातोः लृटः रूपाणि रिक्ते स्थले पूरयत–**

(i) किं त्वं मत्कार्यं .................... ।

(ii) नाहं तव कार्यं .................... ।

(iii) भाग्यमेव सर्वं .................... ।

(iv) अत्रत्याः जनाः चित्राणि .................... ।

(v) यूयमवश्यं परेषाम् उपकारं .................... ।

(vi) वयं जनाः जनलाभम् .................... ।

**16. च्विप्रत्ययान्तेन वाक्यं पूरयत–**

(i) सैनिकाः मनांसि .................... युद्ध्यन्ति। (दृढ + कृ)

(ii) बलवानयं लौहमपि .................... क्षिपति। (चूर्ण + कृ)

(iii) कुमुदं .................... प्रस्तौति। (कमल + कृ)

(iv) मृत्तिकां .................... स्थापयति। (पिण्ड + कृ)

(v) धनानि .................... प्रत्यागतः। (व्यय + कृ)

**17. श्लोकस्याशयं संस्कृतेन लिखत–**

....................................................................................................

....................................................................................................

....................................................................................................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

विरम विरमायासादस्माद् दुरध्यवसायतो
विपदि महतां धैर्यध्वंसं यदीक्षितुमीहसे।
अयि जडमते! कल्पापायेऽप्यपेतनिजक्रमाः
कुलशिखरिणः क्षुद्रा नैते न वा जलराशयः॥ 86 ॥

**पदच्छेदः**

विरम विरम आयासात् अस्मात् दुरध्यवसायतः
विपदि महतां! धैर्यध्वंसं यदि ईक्षितुम् ईहसे।
अयि जडमते कल्पापाये अपि अपेतनिजक्रमाः
कुलशिखरिणः क्षुद्राः न एते न वा जलराशयः॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| विरम | वि✓रम् + लोट्, मपु. एक. (तिङन्तक्रिया) | अयि | अव्ययम् (सम्बोधने) |
| | | जडमते ! | इ. पुं. सम्बो. एक. समस्तम् |
| विरम | विरम् + लोट्, मपु. एक. | कल्पापाये | अ. पुं. सप्त. एक. समस्तम् |
| आयासात् | अ. पुं. पं. एक. (विशेष्यम्) | अपि | अव्ययम् |
| अस्मात् | इदम्- म. पुं. पं. एक., सर्व., वि. | अपेतनिजक्रमाः | अ. पुं. प्र. बहु. समस्तम्, (विशेष्यम्) |
| दुरध्यवसायतः | अव्ययम् (पञ्चम्यर्थे) समस्तं, (तद्धितान्तवि.) | कुलशिखरिणः | न. पुं. प्र. बहु. समस्तम्, (विशेष्यम्) |
| विपदि | द. स्त्री. सप्त. एक. | | |
| महताम् | त. पुं. षष्ठी बहु. | क्षुद्राः | अ. पुं. प्र. बहु. वि. |
| धैर्यध्वंसम् | अ. पुं. द्विती. एक. | न | अव्ययम् |
| यद् | अव्ययम् | एते | एतद्- द. पुं. प्र. बहु., सर्व. |
| ईक्षितुम् | अव्ययम् (तुमुन्नन्तम्) | | |
| ईहसे | ईह् + लट्, मपु. एक. आत्मने. (तिङन्तक्रिया) | न, वा | अव्यये |
| | | जलराशयः | इ. पुं. प्र. बहु. |

www.thearyasamaj.org



## आकाङ्क्षा

अयि जडमते ! विरम।

| | |
|---|---|
| कस्मात् विरम ? | अस्माद् दुरध्यवसायतः आयासात् विरम। |
| कस्मात् दुरध्यवसायातः आयासात् विरम ? | यत् विपदि महतां धैर्यध्वंसम् ईक्षितुम् ईहसे (इत्येतस्मात् आयासात्) विरम। |
| किमर्थं विरम ? | (यतो हि) कल्पापायेऽपि अपेतनिजक्रमाः एते कुलशिखरिणः जलराशयः वा क्षुद्रा न (सन्ति)। |

## अन्वयः

अयि जडमते! (यतो हि) यद् विपदि महतां धैर्यध्वंसम् ईक्षितुम् ईहसे (तर्हि सः दुरध्यवसायः एव)। (यतो हि) कल्पापाये अपि अपेतनिजक्रमाः एते कुलशिखरिणः जलराशयः वा क्षुद्राः न (सन्ति)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| अयि जडमते! | अयि मन्दबुद्धे! | हे मन्दबुद्धि विधाता! | O fool fate! |
| यद् | यत् | जो | which |
| विपदि | विपत्तौ | विपत्ति में | in difficulty |
| महताम् | महापुरुषाणाम् | महापुरुषों के | of good persons |
| धैर्यध्वंसम् | धैर्यनाशम् | धैर्य का नाश | destroy/destruction of the courage |
| ईक्षितुम् | द्रष्टुम् | देखना | to see |
| ईहसे | वाञ्छसि | चाहते हो | want |
| तर्हि सः | तर्हि सः | तो वह | then that |
| इति अस्मात् | एतस्मात् | इस | this |
| दुरध्यवसायतः | दुःसाध्यात्/व्यर्थरूयात् | दुःसाध्य/व्यर्थ | from wicked/ unachievable |
| आयासात् | परिश्रमात् | परिश्रम से | endeavour |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| विरम | विरतो भव | रुक जाओ | stop |
| (यतो हि) | (यतो हि) | (क्योंकि) | (because) |
| कल्पापाये अपि | कल्पान्तेऽपि | कल्पान्त में भी | in the time of dissolution |
| अपेतनिजक्रमाः | नष्टस्वमर्यादाः | नष्ट हुई मर्यादा वाले | which transgress their limits |
| एते | इमे | ये | these |
| कुलशिखरिणः | कुलाचलाः | (महेन्द्रादि) कुलपर्वत | great mountains |
| जलराशयः वा | समुद्राः वा | या समुद्र | or oceans |
| क्षुद्राः | तुच्छाः | तुच्छ | insignificant |
| न (सन्ति) | न (विद्यन्ते) | नहीं (हैं) | (is) not |

## भावार्थः

**संस्कृतम्–** हे जडबुद्धे विधातः ! विपत्तौ महापुरुषाणां धैर्यनाशं द्रष्टुं यद् इच्छसि तद् वृथा। तस्मात् दुर्व्यापाररूपश्रमात् विरतो भव। यतो हि कल्पान्ते, नष्टमर्यादाः अपि कुलपर्वताः मलयमहेन्द्रादयो जलराशिभूताः सागरा वा क्षुद्राः न भवन्ति। अर्थात् महत्यां विपदि अपि मानोन्नताः धैर्यं न त्यज्यन्ति।

**हिन्दी–** हे जड़मति विधाता ! विपत्तिकाल में जो महापुरुषों के धैर्य का नाश तुम देखना चाहते हो, इस दुराग्रहरूप प्रयास से रुको, रुको। क्योंकि कल्पान्त में नष्ट हुई मर्यादा वाले कुलपर्वत या सागर तुच्छ नहीं होते हैं।

**आङ्ग्लम्–** O fool fate ! If you want to destroy the courage of great persons in the time of difficulties, disjunct from this bad and wicked endeavour because, the *kulparvatas* (great mountains) and oceans which transgress their limits in the time of dissolutions (*Kalpānta*) are not insignificant.

www.thearyasamaj.org



## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

विरमायासादस्मात् – विरम + आयासात् + अस्मात्
(दीर्घसन्धिः) (जश्त्वसन्धिः)

दुरध्यवसायतः – दुर् + अधि + अवसायतः
(यण् सन्धिः) (यण् सन्धिः)

यदीक्षितुमीहसे – यत् + ईक्षितुम् + ईहसे (तस्य जश्त्वं दः)

कल्पापायेऽप्यपेतनिजक्रमाः – कल्प + अपाये + अपि + अपेत निजक्रमाः
(दीर्घसन्धिः) (पूर्वरूपसन्धिः) (यण्सन्धिः)

क्षुद्रा नैते – क्षुद्राः + न + एते (विसर्गस्थानिकरेफस्य यत्वं, लोपश्च, वृद्धिसन्धिः)

#### (ख) समासः

दुरध्यवसायतः – दुष्टः अध्यवसायः, दुरध्यवसायः (प्रादि-समासः) तस्मात् इत्यर्थे तसिल् (दुरध्यवसाय + तस्)

धैर्यध्वंसम् – धैर्यस्य ध्वंसः, तम् (षष्ठी-तत्पु.)

जडमते – जडा मतिः यस्य सः, सम्बोधने एक. (बहुव्रीहिः)
यथा– मन्दमतिः, तीव्रबुद्धिः

कल्पापाये – कल्पस्य अपायः, तस्मिन् (षष्ठी तत्पु.)
यथा– कल्पान्ते, कल्पनाशे

अपेतनिजक्रमाः – अपेतः निजः क्रमः येषाम्, ते (बहुव्रीहिः)
यथा– विनष्टस्वमार्यादाः हृतस्वधनाः

जलराशयः – जलानां राशिः (षष्ठी तत्पु.), ते

www.thearyasamaj.org



| | | |
|---|---|---|
| विरम | – | वि√रम् + लोट् (व्याङ्परिभ्योरमः इति परस्मै.) मपु. एक. यथा– पठ, गच्छ |
| ईहसे | – | ईह् + लट्, मपु. एक. आत्मने. यथा– सेवसे |
| ईक्षितुम् | – | ईक्ष् + तुमुन् (इडागमः) मान्तकृत् अव्ययं भवति। यथा– पठितुम्, द्रष्टुम् |

(ग) **पर्यायशब्दाः**

| | | |
|---|---|---|
| विपद् | – | आपद्, अपायः |
| जडः | – | मन्दः, मूढः, मूर्खः |
| क्षुद्रः | – | नीचः, अधमः, निम्नः |

(ii) **छन्दः** – हरिणी

**लक्षणम्** – नसमरसलाः षड्वेदाश्वैस्तथा हरिर्णागुहः

---

**अभ्यासः – 36**

**श्लोकः – 86**

1. **श्लोकं पूरयत–**

.................................................................

................................................................. ।

.................................................................

................................................................. ॥

2. **संयोज्य वियोज्य वा लिखत–**

(i) विरम आयासात् अस्मात् – ..................

(ii) यत् ईक्षितुम् ईहसे – ..................

(iii) कल्पापायेऽप्यपेतनिजक्रमाः – ..................

(iv) क्षुद्रा नैते – ..................

www.thearyasamaj.org



3. अव्ययपदानि नीचैः लिखत–

..............................................................................................................................

4. पञ्चम्यन्तपदानि अधो लिखत–

..............................................................................................................................

5. सप्तम्यन्तपदे षष्ठ्यन्तपदं च नीचैः लिखत–

.................................................... ..................................... .....................................

....................................................

6. तिङन्तक्रियापदानि अधो लिखत–

..............................................................................................................................

7. समाधत्त–

(i) कविः दुरध्यवसायात् कं विरन्तुं कथयति ?

..............................................................................................................................

(ii) विधाता किं द्रष्टुम् ईहते ?

..............................................................................................................................

(iii) कल्पापाये के अपेतनिजक्रमाः भवन्ति ?

..............................................................................................................................

(iv) कल्पान्ते के क्षुद्राः न भवन्ति ?

..............................................................................................................................

(v) कविरत्र किं सन्दिशति ?

..............................................................................................................................

www.thearyasamaj.org



8. कोष्ठकस्थ-पदानां वाक्ये प्रयोगं कुरुत–

| महताम्, विरम, ईहसे, एते |
|---|

(i) अरे दुष्ट ! दुष्कार्यात् .................... ।
(ii) आपदि .................... धैर्यनाशो न भवति।
(iii) त्वं कम् ईक्षितुम् .................... ।
(iv) .................... कुलशिखरिणः क्षुद्राः न भवन्ति।

9. विशेषणं लिखत–

(i) आयासात् – .................... ....................
(ii) कुलशिखरिणः – .................... ....................

10. पदपरिचयं दत्त–

(i) विरम – ....................
(ii) धैर्यध्वंसम् – ....................
(iii) कल्पापाये – ....................
(iv) जलराशयः – ....................

11. श्लोकस्य आशयं संस्कृतभाषया लिखत–

....................
....................
....................
....................
....................
....................
....................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

> दैवेन प्रभुणा स्वयं जगति यद्यस्य प्रमाणीकृतं
> तत्तस्योपनमेन्मनागपि महान्नैवाश्रयः कारणम् ।
> सर्वाशापरिपूरके जलधरे वर्षत्यपि प्रत्यहं
> सूक्ष्मा एव पतन्ति चातकमुखे द्वित्राः पयोबिन्दवः ॥ 87 ॥

**पदच्छेदः**

दैवेन प्रभुणा स्वयम् जगति यत् यस्य प्रमाणी-कृतम्
तत् तस्य उपनमेत् मनाक् अपि महान् न एव आश्रयः कारणम् ।
सर्वाशापरिपूरके जलधरे वर्षति अपि प्रत्यहम्
सूक्ष्माः एव पतन्ति चातक-मुखे द्वित्राः पयो-बिन्दवः ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| दैवेन | अ. नपुं. तृ. एक. अनुक्त-कर्ता (विशेष्यम्) | कारणम् | अ. नपुं. प्र. एक., वि |
| प्रभुणा | उ. पुं. तृ. एक., वि. | सर्वाशापरिपूरके | अ. पुं. सप्त. एक., वि. समस्तम् |
| स्वयम् | अव्ययम् | जलधरे | अ. पुं. सप्त. एक. समस्तम् (विशेष्यम्) |
| जगति | जगत्- त. नपुं. सप्त. एक. | वर्षति | त. पुं. सप्त. एक. (शत्रन्तम्) |
| यत् | यद्- द. नपुं. प्र. एक., सर्व. (उक्तकर्म) | अपि | अव्ययम् |
| यस्य | यद्- द. पुं. षष्ठी एक., सर्व. | प्रत्यहम् | अव्ययम्, समस्तम् |
| प्रमाणीकृतम् | अ. नपुं. प्र. एक. (क्तान्तक्रिया) | सूक्ष्माः | आ. स्त्री. प्र. बहु., वि. |
| तत् | तद्- द. नपुं. प्र. एक., सर्व. | एव | अव्ययम् |
| तस्य | तद्- द. पुं. षष्ठी एक., सर्व. | पतन्ति | पत् + लट्, प्रपु. बहु. (तिङन्तक्रिया) |
| उपनमेत् | उपनम् + वि.लि. प्रपु. एक. (तिङन्तक्रिया) | चातकमुखे | अ. नपुं. सप्त. एक. समस्तम् |
| मनाक्, अपि | अव्ययपदे (वि.) | | |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| महान् | त. पुं. प्र. एक., वि. | द्वित्राः | आ. स्त्री. प्र. बहु., वि. समस्तम् |
| न, एव | अव्ययपदे | | |
| आश्रयः | अ. पुं. प्र. एक., वि. | पयोबिन्दवः | उ. स्त्री. प्र. बहु. (विशेष्यम्) |

## आकाङ्क्षा

**मनाक् अपि न कारणम्।**

| | |
|---|---|
| किं मनाक् अपि न कारणम् ? | आश्रयः एव मनाक् अपि न कारणम्। |
| कीदृशः आश्रयः एव न कारणम् ? | महान् आश्रयः एव न कारणम्। |

**उपनमेत्।**

| | |
|---|---|
| किम् कस्य उपनमेत् ? | यत् यस्य प्रमाणीकृतम् तत् तस्य उपनमेत्। |
| केन कथं प्रमाणीकृतम् ? | दैवेन स्वयं प्रमाणीकृतम्। |
| कीदृशेन दैवेन ? | प्रभुणा दैवेन। |
| कुत्र प्रमाणीकृतम् ? | जगति प्रमाणीकृतम्। |

**पतन्ति।**

| | |
|---|---|
| के पतन्ति ? | पयोबिन्दवः पतन्ति। |
| कीदृशाः कति पयोबिन्दवः पतन्ति ? | सूक्ष्माः द्वित्राः एव पयोबिन्दवः पतन्ति। |
| कुत्र पतन्ति ? | चातकमुखे पतन्ति। |
| कदा (कस्मिन् सति) अपि पतन्ति ? | सर्वाशापरिपूरके जलधरे प्रत्यहं वर्षति (सति) अपि पतन्ति। |

## अन्वयः

प्रभुणा दैवेन स्वयं जगति यत् यस्य प्रमाणीकृतम्, तत् तस्य उपनमेत्, महान् आश्रयः मनाक् अपि (अत्र) न एव कारणम्। सर्वाशापरिपूरके जलधरे प्रत्यहं वर्षति अपि सूक्ष्माः द्वित्राः पयोबिन्दवः एव चातकमुखे पतन्ति।

www.thearyasamaj.org



पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| प्रभुणा | समर्थेन | समर्थ द्वारा | all-powerful |
| दैवेन | भाग्येन/विधिना | भाग्य के द्वारा | by fate |
| स्वयम् | आत्मना | स्वयं ही | self |
| जगति | संसारे | संसार में | in world |
| यत् | वस्तु | जो पदार्थ | the thing |
| यस्य | यस्य जनस्य कृते | जिसके निमित्त | for whom |
| प्रमाणीकृतम् | निर्मितं/निर्दिष्टं वा | निर्दिष्ट कर दिया गया | allotted |
| तत् | वस्तु | वह पदार्थ | that substance |
| तस्य | तस्य जनस्य | उस जन के | his |
| उपनमेत् | समीपं गच्छेत्/प्राप्नुयात् | पास चला जाएगा (उसे प्राप्त कर लेगा) | will be got by him |
| महान् आश्रयः | महदाश्रयणम्/महतामाश्रयो | महापुरुषों का आश्रय | support of big men |
| मनाक् अपि | वा ईषदपि | थोड़ा भी | least |
| (अत्र) | प्राप्ति विषये | इस प्राप्ति में | here |
| न एव | न चापि | नहीं ही | never |
| कारणम् | निमित्तं भवति | कारण बनता है | becomes cause |
| सर्वाशापरिपूरके | सर्वमनोरथपूरणसमर्थे | सभी की आशा को पूर्ण करने वाले | fulfilling everyone's hope |
| जलधरे | वारिदे | मेघ के | clouds |
| प्रत्यहम् | प्रतिदिनम् | प्रतिदिन | daily |
| वर्षति अपि | वर्षणं कुर्वति अपि | बरसने पर भी | even though rain |
| सूक्ष्माः | कृशाः/तनवः | सूक्ष्म | tiny |
| द्वित्राः | द्वौ वा त्रयो वा (स्वल्पाः) | दो तीन | two or three |
| पयोबिन्दवः एव | जललवाः एव/ जलकणाः एव | जल की बून्दें ही | active drops of water |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| चातकमुखे पतन्ति | सारङ्गमुखे निपतन्ति | चातक के मुख में गिरती हैं | in beak of *Chāṭaka* fall |

## भावार्थः

**संस्कृतम्–** समर्थेन विधिना यस्य जनस्य कृते यद् वस्तु निर्दिष्टं तत् वस्तु तस्य समीपं गच्छेत् एव, अस्मिन् विषये महतामाश्रयः स्वल्पमपि कारणीभूतं न भवति। यथा सर्वेषां मनोरथपूरकः जलधरः प्रतिदिनं वर्षति, तथापि चातकस्य मुखे सूक्ष्माः कतिपयाः एव जलबिन्दवः पतन्ति।

**हिन्दी–** समर्थ विधि ने जिसके लिए जितना निर्दिष्ट कर दिया उसको उतना ही प्राप्त होता है, महान् व्यक्ति का सहारा इसमें थोड़ा भी कारण नहीं बन पाता है। जैसे कि सभी की आशाओं के पूरक मेघ के प्रतिदिन बरसने पर भी चातक के मुख में जल की दो-तीन सूक्ष्म बून्दें ही गिरती हैं।

**आङ्ग्लम्–** Every one gets in this world what almighty has allotted to him. Support of big men does not become the least cause in it. Only two or three tiny drops of water fall in the beak of *Chāṭaka* bird even though the clouds rain daily.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

तस्योपनमेन्मनागपि – तस्य + उपनमेत् + मनाक् + अपि
(गुणसन्धिः) (जश्त्वानुनासिकसन्धिः) (जश्त्वसन्धिः)

नैवाश्रयः कारणम् – न + एव + आश्रयः + कारणम् (वृद्धिदीर्घसन्धी, ककारे परे विसर्गस्य विसर्गश्च (विसर्गसन्धिः)

वर्षत्यपि – वर्षति + अपि (यण्-सन्धिः)

सूक्ष्मा एव – सूक्ष्माः एव (विसर्गस्थानिकरेफस्य यत्वं, यलोपश्च)

www.thearyasamaj.org



| | | |
|---|---|---|
| प्रमाणीकृतम् | – | अप्रमाणं प्रमाणं कृतम् इति, प्रमाण + च्वि - प्रमाणी + कृ + क्त-प्रत्ययः कर्मणि |
| दैवेन प्रभुणा प्रमाणीकृतम् | – | अप्रमाणं प्रमाणं कृतम् इति, प्रमाण + च्वि = प्रमाणी + कृ + क्तः प्रत्ययः कर्मणि। |

(ख) **समासः**

| | | |
|---|---|---|
| सर्वाशापरिपूरके | – | सर्वेषाम् आशाः, सर्वाशाः, सर्वाशानां परिपूरकः तस्मिन् (षष्ठी-तत्पु.) यथा– सर्वमनोरथपूरकः, सकलकामसाधकः |
| जलधरे | – | धरतीति धरः (धृ + अच्) जलानां धरः तस्मिन्। षष्ठी तत्पु. यथा– चक्रधरः, हंसधरः, शक्तिधरः |
| प्रत्यहम् | – | अहः अहः इति, प्रत्यहन् टच् समासान्तः टिलोपः, सोरम् (अव्ययीभावः) यथा– प्रतिदिनम्, प्रतिवासरम्, प्रतिराजम् |
| चातकमुखे | – | चातकस्य मुखम्, तस्मिन् (षष्ठी तत्पु.) |
| द्वित्राः | – | द्वौ वा त्रयो वा इति द्वित्रि + डच्, टिलोपः, द्वित्र इति। प्र. बहु. (बहुव्रीहिः) |
| पयोबिन्दवः | – | पयसां बिन्दवः - पयसः + बिन्दु इति। सस्य रुत्वम् रोः उत्वं, गुणश्च = पयोबिन्दु इति। प्र. बहु. यथा– पयोगुणाः, अधोगतिः |
| उपनमेत् | – | उप✓नम् + विधिलिङ्, प्रपु. बहु. यथा– उपगच्छेत्, भवेत्, पठेत् इति |
| पतन्ति | – | पत् + लट्, प्रपु. बहु. यथा– खादन्ति, गच्छन्ति |

(ii) **पर्यायशब्दाः**

| | | |
|---|---|---|
| चातकः | – | तोककः, सारङ्गः |
| जलधरः | – | वारिदः, अम्बुवाहः, मेघः |
| बिन्दुः | – | कणः, लवः |

www.thearyasamaj.org



(iii) छन्दः – शार्दूलविक्रीडितम्

(iv) अलङ्कारः – दृष्टान्तालङ्कारः

---

## अभ्यासः – 37

### श्लोकः – 87

1. श्लोकं स्मृत्वा लिखत–

..............................................................................................

.............................................................................................. ।

..............................................................................................

.............................................................................................. ॥

2. संयोज्य वियोज्य वा लिखत–

(i) तत् + तस्य + उपनमेत् + मनाक् + अपि – ..............................

(ii) वर्षति + अपि + प्रति + अहम् – ..............................

(iii) महान्नैवाश्रयः कारणम् – ..............................

(iv) यद्यस्य सूक्ष्मा एव – ..............................

3. विशेष्यपदं विशेषणपदं च लिखत–

| विशेष्यम् | वि. | |
|---|---|---|
| .................... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | | |

4. प्रथमान्तपदानि अधो लिखत–

.............. .............. .............. .............. ..............

.............. .............. .............. .............. ..............

www.thearyasamaj.org



5. तृतीयान्तपदे लिखत–

................................ ................................

6. क्रियापदानि लिखत–

................................ ................................ ................................ ................................

7. प्रश्नानामुत्तराणि दत्त–

(i) संसारे प्रभुः कः स्वीकृतः ?

................................................................................................

(ii) वस्तुप्राप्तौ किं कारणं, किन्न कारणम् ?

................................................................................................

(iii) यत् यस्य प्रमाणीकृतं तत् तस्य किं स्यात् ?

................................................................................................

(iv) सर्वाशापूरकः कः अत्र कथितः ?

................................................................................................

(v) कति जलबिन्दवः कुत्र पतन्ति ?

................................................................................................

8. पदपरिचयं दत्त–

(i) दैवेन प्रभुणा – ................................................

(ii) उपनमेत् – ................................................

(iii) वर्षति – ................................................

(iv) पयोबिन्दवः – ................................................

(v) मनागपिः – ................................................

www.thearyasamaj.org



9. स्वयम्, मनाक्, प्रत्यहम्, नैव - एतेषां पदानां वाक्ये प्रयोगं कुरुत–

..............................................................................

..............................................................................

..............................................................................

..............................................................................

10. 'सूक्ष्मा एव पतन्ति चातकमुखे द्वित्राः पयोबिन्दवः' अस्याः पङ्क्तेरर्थं संस्कृते लिखत–

..............................................................................

..............................................................................

..............................................................................

11. कोष्ठकनिर्देशेन वाक्यं पूरयत –

(i) सः भाग्यदत्तं धनम् .................... (उप✓नम् + विधिलिङ्)

(ii) तौ पुस्तके .................... (उप✓नम् + विधिलिङ्)

(iii) अह इतोऽधिकं किम् .................... (उप✓नम् + विधिलिङ्)

(iv) तव मुखे दुग्धकणाः .................... (पत् + लट्)

(v) यूयं कुत्र गच्छत .................... (प्रति + अहन्)

(vi) यः विद्यायाः धरः सः इत्युच्यते .................... । (विद्या + धृ)

(vii) देवाः शक्तेः धराः अतः .................... सन्ति । (शक्ति-धृ)

(viii) सर्वेषां मनोरथानां पूरकः .................... अयमस्ति । (समस्तम्)

(ix) पयसां बिन्दवः .................... अत्र पतन्ति । (समस्तम्)

12. समाधत्त–

(i) मनाक् अपि कारणं किं नास्ति ?

..............................................................................

(ii) जनः केन प्रमाणीकृतं लभते ?

..............................................................................

www.thearyasamaj.org



(iii) चातकमुखे कति पयोबिन्दवः पतन्ति ?

..........................................................................................

(iv) प्रत्यहं मेघे वर्षति अपि चातकमुखे जलानि कथं न पतन्ति ?

..........................................................................................

(v) चातकः पक्षी अस्ति पशुर्वा ?

..........................................................................................

13. समुचितं योजयत–

| अ-भागः | | ब-भागः | |
|---|---|---|---|
| (i) | यत् यस्य प्रमाणीकृतम् | (क) | चातकमुखे द्वित्राः पयोबिन्दवः |
| (ii) | सर्वाशापरिपूरके | (ख) | दैवेन प्रभुणा स्वयं जगति |
| (iii) | सूक्ष्मा एव पतन्ति | (ग) | जलधरे वर्षत्यपि |
| (iv) | आश्रयः मनागपि | (घ) | न कारणम् |

14. कोष्ठकस्थ-समुचितपदेन वाक्यं पूरयत–

**मनाक् अपि, पञ्चशाः, उपनमेत्, जलधरे**

(i) अस्मिन् स्थले प्रत्यहं .................... जनाः आगच्छन्ति।

(ii) यत् यस्य निर्दिष्टं तत् तस्य .................... ।

(iii) सर्वाशापरिपूरके .................... वर्षत्यपि चातकः पिपासितः एव।

(iv) विधेः लेख समक्षं .................... महतामाश्रयः नोपकरोति।

15. उप√नम्-धातोः विधिलिङ्रूपाणि लिखत–

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्रपु. | .................... | उपनमेताम् | .................... |
| मपु. | उपनमेः | .................... | .................... |
| उपु. | .................... | .................... | उपनमेम |

◆◆◆

www.thearyasamaj.org

# अष्टमः पाठः – कर्मफलम्/सत्कर्मप्रशंसा/पुण्यफलम्

**श्लोकः**

नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगाः
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।
फलं कर्मायत्तं किममरगणैः किञ्च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ 88 ॥

**पदच्छेदः**

नमस्यामः देवान् ननु हतविधेः ते अपि वशगाः
विधिः वन्द्यः सः अपि प्रति-नियत-कर्मैक-फलदः ।
फलम् कर्मायत्तम् किम् अमरगणैः किम् च विधिना
नमः तत् कर्मभ्यः विधिः अपि न येभ्यः प्रभवति ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् |
|---|---|
| नमस्यामः | नम + लृट्, प्रपु. बहु. |
| देवान् | अ. पुं. द्विती. बहु. |
| ननु | अव्ययम् |
| हतविधेः | इ. पुं. षष्ठी एक. |
| ते | तद्- द. पुं. प्र. बहु., सर्व. |
| अपि | अव्ययम् |
| वशगाः | अ. पुं. प्र. बहु. |
| विधिः | इ. पुं. प्र. एक. (विशेष्यम्) |
| वन्द्यः | अ. पुं. प्र. एक. |
| सः | तद्- द. पुं. प्र. एक. सर्व. |
| अपि | अव्ययम् |
| प्रतिनियतकर्मैक- | अ. पुं. प्र. एक., वि. |
| कर्मायत्तम् | अ. नपुं. प्र. एक., वि. समस्तम् |
| किम् | म. नपुं. प्र. एक. (सर्व.) |
| अमरगणैः | अ. पुं. तृ. बहु. |
| किञ्च | अव्ययम् |
| विधिना | इ. पुं. तृ. एक. |
| नमः | अव्ययम् |
| तत्कर्मभ्यः | न. नपुं. चतु. बहु. |
| विधिः | इ. पुं. प्र. एक. |
| अपि | अव्ययम् |
| न | अव्ययम् |
| येभ्यः | यत्- त. पुं. चतु. बहु. सर्व. |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| फलदः | समस्तम् | प्रभवति | प्र√भू + लट्, प्रपु. एक. |
| फलम् | अ. नपुं. प्र. एक. (विशेष्यम्) | | |

## आकाङ्क्षा

**नमस्यामः ।**

कान् नमस्याम् ? — देवान् नमस्यामः ।

ननु ते अपि कीदृशाः ? — ननु ते अपि वशगाः ।

कस्य वशगाः ? — हतविधेः वशगाः ।

**वन्द्यः ।**

(तर्हि) कः वन्द्यः ? — विधिः वन्द्यः ।

सोऽपि कीदृशः ? — सोऽपि प्रतिनियतकर्मैकफलदः ।

फलं (च) कीदृशम् ? — फलं (च) कर्मायत्तम् ।

(तर्हि) किम् अमरगणैः ? किं च विधिना ? — (न किमपि !)

**(अतः) नमः ।**

केभ्यः नमः ? — (अतः) तत्कर्मभ्यः नमः ।

कीदृशेभ्यः कर्मभ्यः नमः ? — न प्रभवति तत्कर्मभ्यः नमः ।

## अन्वयः

देवान् नमस्यामः, ननु ते अपि हतविधेः वशगाः, विधिः वन्द्यः, (किन्तु) सः अपि प्रतिनियतकर्मैकफलदः, फलं कर्मायत्तम् (यदि) किम् अमरगणैः विधिना च किम् ? तत्कर्मभ्यः नमः, येभ्यः विधिः अपि न प्रभवति ।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| देवान् | अमरान् | देवों को | to gods |
| नमस्यामः | नमस्कुर्मः | नमस्कार करते हैं | salute |
| ननु | निश्चयेन | निश्चय ही | surely |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| ते अपि | देवा अपि | देवता भी | gods also |
| हतविधेः | दुष्टविधातुः | दुष्ट विधाता के | wicked desting |
| वशगाः | वशङ्गताः | वश में हैं | depend on |
| विधिः | ब्रह्मा | ब्रह्मा | *Brahmā* |
| वन्द्यः | वन्दनीयः | वन्दनीय है | is respectable |
| (किन्तु) सः अपि | किन्तु विधिरपि | किन्तु ब्रह्मा भी | but *Brahmā* also |
| प्रतिनियतकर्मैक-फलदः | तत्तन्निश्चितकर्मफलदः | उन-उन कर्मों के निश्चित फलों को देने वाले हैं | gives consequence according to deeds |
| फलम् | (शुभाशुभम्) फलम् | (शुभ-अशुभ) फल | (good or bad) result |
| कर्मायत्तम् यदि | कर्माधीनम् यदि अस्ति | यदि कर्म के अधीन है तो | consequence is dependent on deed (*Karma*) |
| किम् अमरगणैः | किं देवगणैः | देवताओं को नमस्कार से क्या लाभ | what to saluting the gods |
| विधिना च किम् ? | ब्रह्मणा (भाग्येन) च किं प्रयोजनम् ? | और ब्रह्मा को नमस्कार करने से क्या लाभ ? | to *Brahmā*/*desting* salutation |
| तत्कर्मभ्यः | तत्पुण्यपापदायकेभ्यः प्रयत्नरूपकर्मभ्यः | उन पुण्य-पाप रूपी फलों के दाता कर्म को | to those deeds |
| नमः | नमोऽस्तु | नमस्कार हो | salutation |
| येभ्यः | येभ्यः कर्मभ्यः | जिन कर्मों से | those deeds |
| विधिः अपि | ब्रह्मा अपि | ब्रह्मा भी | *Brahmā* also |
| न प्रभवति | न समर्थोऽपि | समर्थ नहीं है | is not powerful |

## भावार्थः

**संस्कृतम्–** वयं देवान् नमस्कुर्मः, किन्तु तेऽपि दुष्टभाग्यविधातुः वशम्वदाः सन्ति, अतः विधाता अपि वन्दनीयः अस्ति, किन्तु सोऽपि प्रत्येकं कर्मणः निश्चितं फलमेव दातुं समर्थोऽस्ति। यदि फलं च कर्मणामधीनं वर्तते तदा अन्यदेवगणैः विधात्रा वा किं प्रयोजनमस्माकम्। यस्मात् कर्मणः विधाताः अपि सामर्थ्यवान् नास्ति, तत्कर्मभ्यः मम नमोऽस्तु।

**हिन्दी–** हम देवों को नमस्कार करते हैं, किन्तु वे भी विधाता के वश में हैं, अतः विधाता

www.thearyasamaj.org



वन्दनीय तो है, किन्तु वह भी प्रत्येक शुभाशुभ कर्म के लिए निश्चित फल को ही देने में समर्थ है। यदि फल कर्म के अधीन है तो अन्य देवों एवं विधाता से हमें क्या प्रयोजन ! चूँकि कर्म से अधिक सामर्थ्यवान् विधाता भी नहीं है, अतः इन (सत्) कर्मों को ही नमस्कार है।

**आङ्ग्लम्–** We salute to gods, but as they are also dependent upon desting, so it is respectable to us. But it also gives good or bad consequences according to the deeds. If consequences depend upon deed (*Karma*) then what have we to do with the gods, because *desting* is also not powerful than *Karma*. We, therefore, bow to deed (*Karma*).

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

देवान्ननु – देवान् + ननु तस्य जश्त्वेन दः, दस्यानुनासिको नः

हतविधेस्तेऽपि – हतविधेः + ते + अपि (विसर्गस्य सः, पूर्वरूपसन्धिः)

सोऽपि – सः + अपि (विसर्गस्थानिकरेफस्य उत्वं, गुणश्च)

नमस्तत्कर्मभ्यो विधिरपि – नमः + तत्कर्मभ्यः + विधिः + अपि विसर्गस्य सत्वम्, उत्वं गुणश्च, अवसानन्नाशे विसर्गः रेफो जातः

**(ख) समासः**

हतविधेः – हतश्चासौ विधिश्च, तस्य (कर्मधारयः) यथा– दुष्टदैवस्य

वशगाः – वशं गच्छति इत्यर्थे-वशोपपदात् गम्धातोः डः गमः टेरमो लोपः (उपपदसमासः) प्र. बहु. यथा– विहगाः, समीपगाः, दूरगाः

प्रतिनियतकर्मैकफलदः – प्रतिनियतं च तत् कर्म - प्रतिनियतकर्म एकं फलं एकफलम्, एकं फलं ददाति इति-एकफलोपपदात् दा धातोः क-प्रत्ययः धातोराकारः

www.thearyasamaj.org



| | | |
|---|---|---|
| | | लोपः (उपपदसमासः) निश्चितफलदः इत्यर्थः (कर्मधारयः, द्विगुः) प्रतिनियतकर्मणाम् एकफलदः (षष्ठी तत्पु.) |
| कर्मायत्तम् | – | कर्मणः आयत्तम्, (षष्ठी तत्पु.) कर्मणि आयत्तं वा (सप्त. तत्पु.) |
| अमरगणैः | – | अमराणां गणाः, तैः (षष्ठी तत्पु.) |
| तत् कर्मभ्यः | – | तानि च कर्माणि, तेभ्यः (कर्मधारयः) अत्र नमः इत्यस्य योगे "नमः स्वस्तीति" चतुर्थी भवति। अमरगणैः, विधिना इत्यनयोः प्रयोजनयोगे तृतीया भवति। |
| वन्द्यः | – | वन्द् + ण्यत् (कर्मणि) |
| नमस्यामः | – | नमस् शब्दात् पूजायामर्थे क्यच् - नमस्य इति नामधातुः, उपु. बहु. (लट्लकारः) |
| प्रभवति | – | प्र√भू + लट्, प्रपु. एक. |

(ग) **पर्यायशब्दाः**

| | | |
|---|---|---|
| देवः | – | अमरः, सुरः, निर्जरः |
| जलधरः | – | मेघः, वारिदः |
| मुखम् | – | वदनं, आननम् |

(ii) **छन्दः** – शिखरिणी छन्दः

---

**अभ्यासः – 38**
**श्लोकः – 88**

1. **श्लोकं पूरयत–**

नमस्यामो .................... हतविधेस्तेऽपि ....................

.................... सोऽपि प्रतिनियत....................फलदः।

www.thearyasamaj.org



फलं कर्मायत्तं .................................................. किञ्च विधिना
.................. कर्मभ्यो ...................... ............ ...................... प्रभवति ॥

2. संयोज्य वियोज्य वा लिखत–

(i) नमस्यामः देवान् ननु – ..................................................
(ii) विधिः वन्द्यः सः अपि – ..................................................
(iii) किममरगणैः किञ्च – ..................................................
(iv) नमस्तत्कर्मभ्यो विधिरपि – ..................................................

3. प्रथमान्तपदानि अधो लिखत–

.............................. .............................. .............................. ..............................
.............................. .............................. .............................. ..............................

4. अव्ययपदानि अधो लिखत–

.............................. .............................. ..............................

5. चतुर्थ्यन्तं पदम् तृतीयान्तञ्च पदं लिखत–

.............................. ..............................
.............................. ..............................
.............................. ..............................

6. क्रियापदम् अधो लिखत–

.............................. .............................. ..............................
.............................. .............................. ..............................

7. प्रश्नानामुत्तराणि दत्त–

(i) कविः प्रथमं कं वन्दते ?

..................................................................................................................

www.thearyasamaj.org



(ii) देवाः कस्य वशगाः सन्ति ?

..........

(iii) विधिः कीदृशः फलदोऽस्ति ?

..........

(iv) विधेरपि कः समर्थोऽस्ति ?

..........

8. प्रदत्तपदैः सार्थकवाक्यानि रचयत–

(वयम्, अमरगणैः, विधिः, वशगाः, देवान्, देवाऽपि, किं प्रयोजनम्, हतविधेः सन्ति, नमस्यामः, देवेभ्योऽपि अधिको विद्यते)

..........

..........

..........

..........

9. "नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति" इत्यस्याः पङ्क्तेरर्थं लिखत–

..........

..........

..........

..........

10. समस्तं पदं लिखत–

(i) दुष्टं च तत् दैवम्, तस्य – ..........

(ii) समीपे गच्छन्ति इति – ..........

(iii) विहायसा गच्छन्ति इति – ..........

(iv) धनं ददातीति – ..........

www.thearyasamaj.org



11. लकारपुरुषवचनानि लिखत–

(i) प्रभवन्ति – ..........
(ii) प्रभवामः – ..........
(iii) प्रभवसि – ..........
(iv) प्रभवतः – ..........

12. समाधत्त–

(i) अमरगणैः विधिना वा कथं न प्रयोजनमस्ति ?

..........

(ii) विधिः कथं वन्द्योऽस्ति ?

..........

(iii) कविः केभ्यः नमः इति वदति ?

..........

(iv) केभ्यः विधिः न प्रभवति ?

..........

(v) अस्मिन् पद्ये कस्य महत्त्वं प्रतिपादयति कविः ?

..........

13. समुचितं योजयत–

| | | | |
|---|---|---|---|
| (i) | वशगाः | (क) | किञ्च विधिना |
| (ii) | वन्द्यः | (ख) | फलम् |
| (iii) | कर्मायत्तम् | (ग) | प्रतिनियतकर्मैकफलदः |
| (iv) | किममरगणैः | (घ) | विधिः |
| (v) | विधिः | (ङ) | तेऽपि देवाः |

14. विग्रहं कुरुत–

(i) हतविधेः – ..........

www.thearyasamaj.org



(ii) कर्मायत्तम् – ..........

(iii) अमरगणैः – ..........

(iv) तत्कर्मभ्यः – ..........

15. पर्यायशब्दान् लिखत–

(i) विधिः – ..........

(ii) देवः – ..........

(iii) जलधरः – ..........

(iv) मुखम् – ..........

16. संस्कृतेन श्लोकस्यार्थं लिखत–

..........

..........

..........

..........

..........

◆◆◆

www.thearyasamaj.org



श्लोकः

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे ।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥ 89 ॥

पदच्छेदः

ब्रह्मा येन कुलालवत् नियमितः ब्रह्माण्ड-भाण्ड-उदरे
विष्णुः येन दश-अवतार-गहने क्षिप्तः महासङ्कटे ।
रुद्रः येन कपाल-पाणि-पुटके भिक्षा-अटनं कारितः
सूर्यः भ्राम्यति नित्यम् एव गगने तस्मै नमः कर्मणे ॥

पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| ब्रह्मा | न. पुं. प्र. एक. (कर्मणि प्र.) | रुद्रः | अ. पुं. प्र. एक. (उक्ते कर्मणि प्र.) |
| येन | यद्- द. नपुं. तृ. एक., सर्व. (अनुक्तकर्तरि तृ.) | येन | यद्- द. नपुं. तृ. एक. सर्व. (अनुक्तकर्ता) |
| कुलालवत् | वत्प्रत्ययान्तम् अव्ययम् | | |
| नियमितः | अ. पुं. प्र. एक. (क्तान्तक्रिया-पदम्) | कपालपाणिपुटके | अ. नपुं. सप्त. एक. समस्तम् |
| ब्रह्माण्डभाण्डोदरे | अ. नपुं. सप्त. एक. समस्तम् | भिक्षाटनम् | अ. नपुं. द्विती. एक. समस्तम् |
| विष्णुः | उ. पुं. प्र. एक. (उक्ते कर्मणि प्र.) | कारितः | अ. पुं. प्र. एक. (क्तान्तक्रियापदम्) |
| येन | यद्- द. नपुं. तृ. एक. सर्व. (अनुक्तकर्ता) | सूर्यः | अ. पुं. प्र. एक. |
| | | भ्राम्यति | भ्रम् + लट्, प्रपु. एक. (तिङन्तक्रियापदम्) |
| दशावतारगहने | अ. नपुं. सप्त. एक. समस्तम् (विशेष्यम्) | नित्यम्, एव | अव्ययपदे |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| क्षिप्तः | अ. पुं. प्र. एक. क्तान्त-क्रियापदम् | गगने | अ. नपुं. सप्त. एक. |
| | | तस्मै | तद्- द. नपुं. चतु. एक. सर्व. |
| महासङ्कटे | अ. नपुं. सप्त. एक., वि. समस्तम् | नमः | अव्ययम् (क्रियावाचकम्) |
| | | कर्मणे | न. नपुं. चतु. एक. |

## आकाङ्क्षा

नमः।

| | |
|---|---|
| कस्मै नमः ? | कर्मणे नमः। |
| कीदृशाय कर्मणे नमः ? | येन ब्रह्मा कुलालवत् ब्रह्माण्डभाण्डोदरे नियमितः। |
| अपि च कीदृशाय कर्मणे नमः ? | येन (कर्मणा) विष्णुः दशावतारगहने महासङ्कटे क्षिप्तः। |
| अपि च कीदृशाय कर्मणे नमः ? | येन रुद्रः कपालपाणिपुटके भिक्षाटनं कारितः। |
| अपि च कीदृशाय कर्मणे नमः ? | (येन) सूर्यः नित्यम् एव गगने भ्राम्यति तस्मै (तादृशाय) कर्मणे नमः। |

## अन्वयः

येन ब्रह्मा कुलालवत् ब्रह्माण्डभाण्डोदरे नियमितः, येन विष्णुः दशावतारगहने महासङ्कटे क्षिप्तः, येन (च) रुद्रः कपालपाणिपुटके भिक्षाटनं कारितः, सूर्यः नित्यम् एव गगने भ्राम्यति, तस्मै कर्मणे नमः।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| येन | कर्मणा | जिस कर्म के द्वारा | by which *Karma* |
| ब्रह्मा | विधाता | विधाता | *Brahmā* |
| कुलालवत् | घटकारवत् | कुम्हार के समान | like a potter |
| ब्रह्माण्डभाण्डोदरे | ब्रह्माण्डमेव भाण्डं, तस्य कुक्षौ (विविध-वस्तुनिर्माणे) | ब्रह्माण्ड रूपी महापात्र के उदर में (मध्य में) | in the center of pot-like universe |
| नियमितः | नियन्त्रितः | नियन्त्रित कर दिया गया | confined |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| येन | कर्मणा | जिस कर्म के द्वारा | by which *Karma* |
| विष्णुः | श्रीहरिः | भगवान् विष्णु | Lord *Viṣṇu* |
| दशावतारगहने | मत्स्यादिदशावतारैः गम्भीरे अथवा मत्स्यादिदशावताररूपे | मत्स्यादि दश अवतार ग्रहण करने के गंभीर या दशावतार रूपी | take ten incarnations |
| महासङ्कटे | महाक्लेशे | महासंकट में | in vary trouble |
| क्षिप्तः | निक्षिप्तः | डाल दिया गया | was put in |
| येन च | कर्मणा | और जिस कर्म के द्वारा | by which *Karma* |
| रुद्रः | शिवः | शिव | *Śiva* |
| कपालपाणिपुटके | कपालयुतकरस्थपुटके | कपाल से युक्त हाथ रूपी पुटक में | in palm attached with skull |
| भिक्षाटनम् | भिक्षायै पर्यटनं | भिक्षा के लिए | to beg |
| कारितः | कारितः | पर्यटन करने लगे | visited |
| सूर्यः | रविः | सूर्यः | Sun |
| नित्यम् एव | सर्वदैव | सदा ही | always |
| गगने | आकाशे | आकाश में | in sky |
| भ्राम्यति | पर्यटति | घूमता रहता है | wanders |
| तस्मै | सकलनियन्त्रे | उस सम्पूर्ण नियन्ता | that complete ruler |
| कर्मणे | कर्मणे | कर्म को | *Karma* |
| नमः | नमः अस्ति | नमस्कार है | salute |

## भावार्थः

**संस्कृतम्–** यत् कर्म ब्रह्माणं ब्रह्माण्डनिर्माणरूपे महापात्रोदरे कुम्भकारवत् नियमितवत्, यच्च कर्म भगवन्तं विष्णुं दशावतारधारणरूपे गम्भीरे महासङ्कटे न्यक्षिपत्, यच्च कर्म शिवेन करस्थकपालपात्रे भिक्षाटनम् अकारयत्, येन कर्मणा कारणेन च सूर्यः सर्वदैव आकाशे परिभ्रमन् एव भवति, तस्मै सकलनियन्त्रकाय कर्मणे नमः।

**हिन्दी–** जिस कर्म के ब्रह्मा को ब्रह्माण्डरूपी महापात्र के उदर में नियन्त्रित कर दिया, जिस कर्म ने विष्णु को दशावतार ग्रहण करने के गम्भीर महासंकट में डाल दिया; जिस कर्म ने शिव को करस्थ नरकपाल में भिक्षाटन करा दिया और जिस कर्म के कारण सूर्य आकाश में सर्वदा घूमता ही रहता है, उस कर्म को नमस्कार है।

www.thearyasamaj.org



**आङ्ग्लम्**– Salutation to that *Karma* (deed) by whom Lord *Brahma* was deputed in primordial egg like a potter; by whom *Viṣṇu* was deputed to take very troublesome ten incarnations; by whom Lord *Śiva* was confirmed to beg in his palm attached with skull and by whom the sun is compelled to ever wander in the Sky.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

| | | |
|---|---|---|
| कुलालवन्नियमितः | – | कुलालवत् + नियमितः (तस्य जश्त्वेन दः, दस्यानुनासिको नः) यथा– तस्मान्नास्ति |
| क्षिप्तो महासङ्कटे | – | क्षिप्तः + महासङ्कटे (विसर्गस्थानिक रेफस्य उत्वं, गुणश्च) |
| रुद्रो येन | – | रुद्रः + येन (विसर्गसन्धिः) |
| तस्मै नमः कर्मणे | – | नमः योगे तत्पदात् कर्मनूपदाच्च चतुर्थी भवति। |
| कुलालवत् | – | कुलालेन तुल्यम् इत्यर्थे– कुलाल + वति प्रत्ययः यथा– ब्राह्मणवत्, क्षत्रियवत्, वति-प्रत्ययान्तमव्ययम्। |

**(ख) समासः**

| | | |
|---|---|---|
| ब्रह्माण्डभाण्डोदरे | – | ब्रह्माण्डम् एव भाण्डम् (कर्मधारयः) तस्य उदरम्, (षष्ठी तत्पु.) तस्मिन्। |
| दशावतारगहने | – | दश च ते अवताराः इति दशावताराः तस्मिन् द्विगुः दशावतारैः गहनम् (तृ. तत्पु.)। |
| महासङ्कटे | – | महत् च तत् सङ्कटम् (कर्मधारयः) तस्मिन् |
| कपालपाणिपुटके | – | कपाल एव पाणिपुटकम् (कर्मधारयः) तस्मिन् |
| भिक्षाटनम् | – | भिक्षायै अटनम् (चतु. तत्पु.) |

**(ग) पर्यायशब्दाः**

| | | |
|---|---|---|
| ब्रह्मा | – | विधाता, सुरज्येष्ठः, परमेष्ठी, स्वयम्भूः पितामहः |

www.thearyasamaj.org



| | | |
|---|---|---|
| भाण्डम् | – | आवपनम्, पात्रम्, अमत्रम्, भाजनम् |
| रुद्रः | – | शिवः, शङ्करः, मृडः, शम्भुः |
| गहनम् | – | वनम्, दुःखम्, गभीरम् |

(ii) छन्दः – शार्दूलविक्रीडितम्

(iii) विशेषः – ब्रह्मादीनामपि नियन्त्रकं कर्म जीवने प्रधानं भवति ।

---

## अभ्यासः – 39
### श्लोकः – 89

1. श्लोकं स्मृत्वा लिखत–

..........................................................................

.......................................................................... ।

..........................................................................

.......................................................................... ॥

2. संयोज्य वियोज्य वा लिखत–

(i) कुलालवत् नियमितः – ..........................

(ii) ब्रह्मा + अण्ड + भाण्ड + उदरे – ..........................

(iii) भिक्षाटनं कारितः – ..........................

(iv) विष्णुर्येन दशावतारगहने – ..........................

3. चतुर्थ्यन्तपदे अधोलिखत–

.......................................... ..........................................

4. सप्तम्यन्तपदानि नीचैः लिखत–

.......................................... ..........................................

www.thearyasamaj.org



.................................... ....................................

.................................... ....................................

5. क्तान्तक्रियापदानि तिङन्तक्रियापदं च लिखत–

क्तान्तक्रियापदानि – .................. .................. ..................

तिङन्तक्रियापदम् – .................. .................. ..................

6. प्रश्नानामुत्तराणि दत्त–

(i) ब्रह्मा कुलालवत् कुत्र नियमितः ?

............................................................................

(ii) विष्णुः कर्मणा कुत्र क्षिप्तः ?

............................................................................

(iii) कर्मणा रुद्रः किं कारितः ?

............................................................................

(iv) केन कारणेन सूर्यो नित्यमेव गगने भ्राम्यति ?

............................................................................

7. पदपरिचयं दत्त–

(i) कुलालवत् – ............................................

(ii) दशावतारगहने – ............................................

(iii) कारितः – ............................................

(iv) भ्राम्यति – ............................................

8. समुचितपदेन रिक्तं स्थानं पूरयत–

| विष्णुः, नियोजितः, पातितः, कारयति, सर्वदैव |
|---|

(i) ब्रह्माण्डे पदार्थनिर्माणाय ब्रह्मा .................. ।

www.thearyasamaj.org



(ii) दशावतारगहने महासङ्कटे .................. कर्मणा .................. ।

(iii) कर्म रुद्रेण नरकपाले भिक्षां .................. ।

(iv) आकाशे सूर्यः .................. कर्मवशात् भ्राम्यति ।

9. **'तस्मै नमः कर्मणे' इत्यस्याः पङ्क्तेः आशयं लिखत–**

..................................................................................

..................................................................................

..................................................................................

10. **सन्धिं सन्धिविच्छेदं वा कुरुत–**

(i) तस्मात् + न + अस्ति = .................. .................. श्रेष्ठो जनः ।

(ii) अयम् + क्षिप्तः + वने = .................. .................. दुष्टेन ।

(iii) रुद्रो येन = .................. भिक्षां कारितः ।

(iv) गगने सूर्यः + भ्राम्यति = .................. ।

11. **विग्रहं कुरुत–**

(i) ब्राह्मणवत् – ..................................................

(ii) महाद्रोहः – ..................................................

(iii) लोकभाण्डोदरे – ..................................................

(iv) तीर्थाटनम् – ..................................................

12. **प्रश्नानाम् उत्तराणि दत्त–**

(i) **ब्रह्माण्डभाण्डोदरे कः नियमितः ?**

..................................................................................

(ii) **विष्णुः कस्मिन् महासङ्कटे पातितः ?**

..................................................................................

www.thearyasamaj.org



(iii) **भिक्षाटनं कारितः कोऽस्ति ?**

..................................................................................................................

(iv) **कर्म सूर्यं कुत्र भ्रामयति ?**

..................................................................................................................

(v) **अत्र पद्ये कः सन्देशोऽस्ति ?**

..................................................................................................................

**13. उपयुक्तमंशम् उपयुक्तेन अंशेन सह योजयत–**

| **'अ' भागः** | | **'ब' भागः** | |
|---|---|---|---|
| (i) | ब्रह्मा येन | (क) | कपालपाणिपुटके |
| (ii) | क्षिप्तो महासङ्कटे | (ख) | कुलालवन्नियमितः |
| (iii) | भिक्षाटनं कारितः | (ग) | दशावतारगहने |
| (iv) | तस्मै नमः | (घ) | नित्यमेव गगने |
| (v) | सूर्यो भ्राम्यति | (ङ) | कर्मणे |

**14. क्तप्रत्ययान्तेन क्रियापदेन कर्मणि वाक्यं परिवर्तयत–**

(i) कुम्भकारवत् ब्रह्माणं जगन्निर्माणे कर्मण्ययोजयत्।

..................................................................................................................

(ii) कर्म भगवन्तं विष्णुं सङ्कटे अक्षिपत्।

..................................................................................................................

(iii) रुद्रं भिक्षाटनं कारितवान् विधिः।

..................................................................................................................

(iv) कर्म सूर्यम् आकाशे अभ्रामयत्।

..................................................................................................................

www.thearyasamaj.org



15. नमः, स्वस्ति, सह, साकम्, विना इत्येषां वाक्ये प्रयोगं कुर्वन् उपयुक्तां विभक्तिं निर्दिशत–

........................................................................................................................

........................................................................................................................

........................................................................................................................

........................................................................................................................

........................................................................................................................

........................................................................................................................

........................................................................................................................

16. श्लोकस्यार्थं संस्कृतभाषया लिखत–

........................................................................................................................

........................................................................................................................

........................................................................................................................

........................................................................................................................

........................................................................................................................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

या साधूंश्च खलान् करोति विदुषो मूर्खान्हितान्द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ।
तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितं
हे साधो ! व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः ॥ 90 ॥

**पदच्छेदः**

या साधून् च खलान् करोति विदुषः मूर्खान् हितान् द्वेषिणः
प्रत्यक्षम् कुरुते परोक्षम् अमृतम् हालाहलम् तत्क्षणात् ।
ताम् आराधय सत्-क्रियाम् भगवतीम् भोक्तुम् फलम् वाञ्छितम्
हे साधो ! व्यसनैः गुणेषु विपुलेषु आस्थाम् वृथा मा कृथाः ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् |
|---|---|
| या | यत्- द. स्त्री. प्र. एक., सर्व. |
| साधून् | उ. पुं. द्विती. बहु., वि. |
| च | अव्ययम् |
| खलान् | अ. पुं. द्विती. बहु. (विशेष्यम्) |
| करोति | कृ + लट्, प्रपु. एक. (तिङन्तक्रिया) |
| विदुषः | विदुस्- स. पुं. द्विती. बहु. (विशेष्यम्) |
| मूर्खान् | अ. पुं. द्विती. बहु., वि. |
| हितान् | अ. पुं. द्विती. बहु. (विशेष्यम्) |
| द्वेषिणः | द्वेषिन्- न. पुं. द्विती. बहु., वि. |
| प्रत्यक्षम् | अव्ययम्, समस्तम् |
| कुरुते | कृ + लट्, प्रपु. एक. आत्मने. (तिङन्तक्रिया) |
| आराधय | आ✓राध + णिच् + लोट्, मपु. एक. (तिङन्तक्रिया) |
| सत्क्रियाम् | आ. स्त्री. द्विती. एक. (विशेष्यम्) |
| भगवतीम् | ई. स्त्री. द्विती. एक., वि. |
| भोक्तुम् | तुमुन्नन्तम् अव्ययम् |
| फलम् | अ. नपुं. द्विती. एक. |
| वाञ्छितम् | अ. नपुं. द्विती. एक. (क्तान्तवि.) |
| हे | अव्ययम् |
| साधो ! | उ. पुं. सम्बो. प्र. एक. |
| व्यसनैः | अ. नपुं. तृ. बहु. |
| गुणेषु | अ. पुं. सप्त. बहु. (विशेष्यम्) |
| विपुलेषु | अ. पुं. सप्त. बहु., वि. |
| आस्थाम् | आ. स्त्री. द्विती. एक. |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| परोक्षम् | अव्ययम्, समस्तम् | वृथा | अव्ययम् |
| अमृतम् | अ. नपुं. द्विती. एक. | मा | अव्ययम् |
| हालाहलम् | अ. नपुं. द्विती. एक. | कृथाः | कृ + लङ्, मपु. एक. |
| तत्क्षणात् | अ. नपुं. पं. एक. समस्तम् | | |
| ताम् | तद्- द. स्त्री. द्विती. एक. सर्व., वि. | | |

## आकाङ्क्षा

**आराधय।**

| | |
|---|---|
| काम् आराधय ? | सत्क्रियाम् आराधय। |
| कीदृशीं सत्क्रियाम् आराधय ? | भगवतीं सत्क्रियाम् आराधय। |
| पुनः कीदृशीं भगवतीं सत्क्रियाम् आराधय ? | या (भगवती सत्क्रिया) खलान् साधून् करोति, मूर्खान् विदुषः करोतिः, द्वेषिणः हितान् करोति, परोक्षं प्रत्यक्षं कुरुते, हालाहलं तत्क्षणात् अमृतं (कुरुते) तां भगवतीम् आराधय। |
| तां भगवतीं किमर्थम् (किं कर्तुम्) आराधय? | वाञ्छितं फलं भोक्तुं तां भगवतीं सत्क्रियाम् आराधय। |

**मा कृथाः।**

| | |
|---|---|
| कां मा कृथाः ? | आस्थां मा कृथाः। |
| कीदृशीम् आस्थां मा कृथाः ? | वृथा आस्थां मा कृथाः। |
| केषु वृथा आस्थां मा कृथाः ? | व्यसनैः विपुलेषु गुणेषु वृथा आस्थां मा कृथाः। |

## अन्वयः

हे साधो ! या खलान् साधून् करोति, विदुषः मुर्खान् (करोति) द्वेषिणः हितान् (करोति) परोक्षं प्रत्यक्षं कुरुते, हालाहलं तत्क्षणात् अमृतं (कुरुते), वाञ्छितं फलं भोक्तुं तां भगवतीं सत्क्रियाम् आराधय। व्यसनैः विपुलेषु गुणेषु वृथा आस्थां मा कृथाः।

www.thearyasamaj.org



**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| हे साधो ! | हे सत्पुरुष ! | हे सज्जन ! | O gentleman ! |
| या | सत्क्रिया | जो अच्छी क्रिया | the good act |
| खलान् | दुर्जनान् | दुष्टों को | to wicked people |
| साधून् | सज्जनान् | सज्जन | good persons |
| करोति | विदधाति | बनाती है | makes |
| विदुषः | पण्डितान् | पण्डित | learned |
| मूर्खान् | मूढान् | मूर्खों को | to fools |
| (करोति) | (विधत्ते) | (बनाती है) | (makes) |
| द्वेषिणः | रिपून् | शत्रुओं को | to enemies |
| हितान् | हितकरान् | हितकारी | friends |
| (करोति) | (विदधाति) | (बनाती है) | (makes) |
| परोक्षम् | अप्रत्यक्षम् | परोक्ष को | to invisible |
| प्रत्यक्षम् | इन्द्रियविषयम् | प्रत्यक्ष | visible |
| कुरुते | विधत्ते | करती है | makes |
| हालाहलम् | गरलम् | विष को | poison |
| तत्क्षणात् | सद्यः एव | तत्काल ही | suddenly/ immediately |
| अमृतम् (कुरुते) | पीयूषं (करोति) | अमृत (बनाती है) | (makes) ambrosia |
| वाञ्छितम् | अभीष्टम् | इच्छित | desired |
| फलम् | कार्यफलम् | कर्म के फल को | consequence of *Karma* |
| भोक्तुम् | प्राप्तुम् | भोगने के लिए/ प्राप्त करने के लिए | to obtain |
| ताम् | प्रसिद्धाम् | उस | that |
| भगवतीम् | ऐश्वर्यादिदायिनीम् | ऐश्वर्यादि को देने वाली भगवती | goddess of virtuous action |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| सत्क्रियाम् | शोभनक्रियाम् | सत्क्रिया (सत्कर्म) को | good acts |
| आराधय | सेवस्व/भजस्व | आराधना करो | pray |
| व्यसनैः | विपत्तिकारणैः | विपत्तियों के कारण | due to affliction |
| विपुलेषु | प्रचुरेषु | प्रचुर | qualities |
| गुणेषु | विपत्तिवद्गुणेषु | विपत्तियों वाले गुणों में | so many (plenty) of |
| वृथा | व्यर्थम् एव | व्यर्थ ही | containing affliction |
| आस्थाम् | अभिनिवेशम्/श्रद्धाम् | श्रद्धा | vain attachment |
| मा | नहि | नहीं | not |
| कृथाः | कार्षीः | करो | do |

**भावार्थः**

**संस्कृतम्–** हे सज्जन ! या सत्क्रिया दुर्जनान् साधून्, मूर्खान् विदुषः, शत्रून् सुहृदश्च करोति, परोक्षं प्रत्यक्षं, सद्य एव गरलं पीयूषं विदधाति तां भगवतीं सत्क्रियां मनोवाञ्छितफलभोगाय सेवस्व। आपत्तिकारणैः विपत्तिबहुलेषु गुणेषु वृथा आसक्तिं न प्रदर्शयतु। अर्थात् सर्वेषां श्रेयसां हेतुभूतां सत्क्रियाम् एव भजताम् जनः।

**हिन्दी–** हे सज्जन ! जो सत्क्रिया (सत्कर्म) दुष्टों को सज्जन, मूर्खों को विद्वान्, शत्रुओं को हितकारी बनाती है और परोक्ष को प्रत्यक्ष, तत्काल ही विष को अमृत बना देती है, सत्क्रिया रूपी भगवती की अपने मनोवाञ्छित फलों को भोगने के लिए आराधना करो। विपत्ति के कारणों से अन्य बहुत से दुःखपूर्ण गुणों में व्यर्थ ही आसक्ति मत करो।

**आङ्ग्लम्–** O good man ! To enjoy your desired consequence, worship that goddess of Virtuous action which changes the wicked persons in good ones, fools into learned ones, enemies into friends, invisible to visible and poison in ambrosia instantly. Do not have vain attachment for other qualities full of afflictions.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

साधूंश्च – साधून् + च (नस्य रुः, नश्छव्यप्रशानिति सूत्रम् + रेफात् पूर्वस्यानुस्वारः, रेफस्य विसर्गः,

www.thearyasamaj.org



| | | |
|---|---|---|
| | | विसर्गस्य सः सस्य श्चुत्वम्; यथा– महान् + च = महाँश्च, महान् + तथा = महांस्तथा |
| प्रत्यक्षम् | – | अक्ष्णोः अभिमुखम् (अव्ययीभावसमासः) प्रति + अक्षि + टच् = प्रत्यक्षम् |
| परोक्षम् | – | अक्ष्णोः परम् (अव्ययीभावः) परोक्षे लिडिति निर्देशात् रूपम् |
| सत्क्रियाम् | – | सती चासौ क्रिया च इति सत्क्रिया, ताम् (कर्मधारयः) |
| कुरुते | – | कृ + लट् (उभयपदित्वात् आत्मनेपदम्, उ-विकरणो धातुः) प्रपु. एक., यथा– तनुते, सुनुते। |
| आराधय | – | आ✓राध् + णिच् + लोट्, मपु. एक. |
| मा कृथा | – | माङ् इत्युपपदात् कृ धातोः लुङ्लकारः। मपु. एक. आत्मनेपदे प्रयोगः। न माङ्योगे इति अटो निषेधः। लुङ् भूतेऽर्थे प्रयुज्यते। |
| हे साधो | – | साधु शब्दस्य सम्बोधनैकवचने रूपम्। यथा– भानो ! दयालो ! |

**(ख) पर्यायशब्दाः**

| | | |
|---|---|---|
| व्यसनम् | – | विपद् भ्रंशः, दोषः, आपत्तिः |
| खलः | – | दुर्जनः, शठः, दुष्टः |
| हालाहलम् | – | विषम्, गरलम् |
| आस्था | – | श्रद्धा, विश्वासः |

**(ii) छन्दः** – शार्दूलविक्रीडितम्

www.thearyasamaj.org



कृधातोः लटि आत्मनेपदे रूपाणि अभ्यस्यत–

| | | | |
|---|---|---|---|
| प्रपु. | कुरुते | कुर्वाते | कुर्वते |
| मपु. | कुरुषे | कुर्वाथे | कुरुध्वे |
| उपु. | कुर्वे | कुर्वहे | कुर्महे |

(कृधातोः) लुङि उभयपदे रूपाणि पठतअभ्यस्यत च (परस्मैपदम्)–

| | | | |
|---|---|---|---|
| प्रपु. | अकार्षीत् | अकार्ष्टाम् | अकार्षुः |
| मपु. | अकार्षीः | अकार्ष्टम् | अकार्ष्ट |
| उपु. | अकार्षम् | अकार्ष्व | अकार्ष्म |

आत्मनेपदम् –

| | | | |
|---|---|---|---|
| प्रपु. | अकृत | अकृषाताम् | अकृषत |
| मपु. | अकृथाः | अकृषाथाम् | अकृढ्वम् |
| उपु. | अकृषि | अकृष्वहि | अकृष्महि |

---

## अभ्यासः – 40
## श्लोकः – 90

1. श्लोकं पूरयत–

या .................. खलान् .................. विदुषो .................. द्वेषिणः
.................. .................. परोक्षममृतं हालाहलं .................. ।
तामाराधय सत्क्रियां भगवतीं .................. फलं ..................
.................. .................. व्यसनैर्गुणेषु .................. .................. मा कृथाः ॥

www.thearyasamaj.org



2. संयोज्य वियोज्य वा लिखत–

(i) साधून च विदुषः मूर्खान् = ..........

(ii) परोक्षम् अमृतम्, ताम् आराधय = ..........

(iii) व्यसनैर्गुणेषु विपुलेष्वास्थां = ..........

(iv) भोक्तुं फलं वाञ्छितं = ..........

3. द्वितीयान्त-पदानि अधो लिखत–

..........

..........

..........

4. अव्ययपदानि अधो लिखत–

.......... .......... .......... ..........

.......... .......... ..........

5. प्रश्नानामुत्तराणि दत्त–

(i) कविः कं सम्बोध्य उपदिशति ?

..........

(ii) या दुर्जनान् साधून् करोति सा का ?

..........

(iii) द्वेषिणोऽपि हितान् का विदधाति ?

..........

(iv) सत्क्रिया तत्क्षणात् कम् अमृतं कुरुते ?

..........

(v) मनोवाञ्छितफलं भोक्तुं काम् आराधयेत् जनः ?

..........

www.thearyasamaj.org



6. श्लोके यथा प्रयुक्तं तथा द्वितीयान्तपदानां युग्मं प्रदर्शयत–

| | | | | |
|---|---|---|---|---|
| साधून् | सत्क्रियां | विदुषः | भगवतीम् | खलान् |
| मूर्खान् | परोक्षम् | हालाहलम् | अमृतं | प्रत्यक्षम् |

यथा– साधून् खलान्

.................................... ....................................

.................................... ....................................

.................................... ....................................

.................................... ....................................

7. "हे साधो ! व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः" इत्यस्याः पङ्क्तेराशयं प्रकाशयत–

........................................................................

........................................................................

........................................................................

8. सन्धिं सन्धिच्छेदं वा कुरुत–

(i) महान् + च = ....................................

(ii) देवान् + तथा = ....................................

(iii) साधूंश्च = ....................................

(iv) हरींस्तथा = ....................................

9. समाधत्त–

(i) कविः काम् आराधयितुं कथयति ?

........................................................................

(ii) कस्याः कृपया परोक्षं प्रत्यक्षं भवति ?

........................................................................

(iii) मूर्खान् विदुषः का करोति ?

........................................................................

www.thearyasamaj.org



(iv) कया द्वेषिणः हिताः विधीयन्ते ?

..............................................................................................................

(v) कुत्र 'आस्थां मा कृथाः' इति कविः निर्दिशति ?

..............................................................................................................

10. युग्मस्थ-पदानां वाक्ये प्रयोगं कुरुत–

| |
|---|
| साधून्-मूर्खानपि, दुर्जनानपि-पण्डितान्, अदृष्टं-दृष्टमपि, धनिनः-दरिद्रान् |

..............................................................................................................

..............................................................................................................

..............................................................................................................

11. उपयुक्तपदं विधाय रिक्तस्थलं पूरयत–

(i) सा देवी तस्मिन् महादेवे श्रद्धाम् .............................. (कृ + लुङ् परस्मै.)

(ii) त्वम् अद्य कस्मिन् स्थले कार्यम् .............................. (कृ + लुङ्, परस्मै.)

(iii) आवां ह्यः कार्यं न .............................. (कृ + लुङ्, परस्मै.)

(iv) अहं विद्यालये नियमेनाध्यापनम् .............................. (कृ + लुङ्, आत्मने.)

(v) युवां कार्यालये सम्यक्कार्यम् .............................. (कृ + लुङ्, आत्मने.)

(vi) ते तत्र झण्डारोहणं परह्यः .............................. (कृ + लुङ्, आत्मने.)

(vii) यूयं तस्मिन् द्रोहिणि आस्थां मा .............................. (कृ + लुङ्, परस्मै.)

(viii) तौ सैनिकौ तस्मिन् नृपे विश्वासं मा .............................. (कृ + लुङ्, परस्मै.)

(ix) वयमपि तस्मिन् आस्थां मा .............................. (कृ + लुङ्, परस्मै.)

12. तुमुन् प्रत्ययान्तेन वाक्यानि पूरयत–

(i) किं कार्यं .............................. अत्रागच्छः । (वि✓धा)

(ii) यूयम् अस्माकं मनोरथं .............................. आगच्छत । (पूर्)

(iii) रामायणस्य कथां .............................. जनाः आगच्छन् । (श्रु)

www.thearyasamaj.org



(iv) अभीष्टं .................................. वयम् आगच्छाम। (लभ्)

(v) पदार्थान् .................................. अयम् आगच्छत्। (उप√भुज्)

(vi) विधाता जगत् .................................. यतते। (सृज्)

(vii) नेत्रसुखदं पुष्पं .................................. अहमागच्छम्। (दृश्)

13. रेखाङ्कितपदानां पर्यायं उपयुज्य वाक्यं लिखत–

(i) खलाः बहवोऽत्र निवसन्ति। – ..................................

(ii) गरलमपि अमृतं विदधाति कर्म। – ..................................

(iii) यशसि अभिरुचिः, व्यसनं श्रुतौ भवेत्। – ..................................

14. श्लोकार्थं संस्कृते लिखत–

..................................................................................................

..................................................................................................

..................................................................................................

..................................................................................................

◆◆◆

www.thearyasamaj.org



## श्लोकः

शुभ्रं सद्म सविभ्रमा युवतयः श्वेतातपत्रोज्ज्वला
लक्ष्मीरित्यनुभूयते चिरमनुस्यूते शुभे कर्मणि।
विच्छिन्ने नितरामनङ्गकलहक्रीडात्रुटत्तन्तुकं
मुक्ताजालमिव प्रयाति झटिति भ्रश्यद्दिशो दृश्यताम्॥ 91 ॥

## पदच्छेदः

शुभ्रम् सद्म सविभ्रमाः युवतयः श्वेत-आतपत्र-उज्ज्वला
लक्ष्मीः इति अनुभूयते चिरम् अनुस्यूते शुभे कर्मणि।
विच्छिन्ने नितराम् अनङ्गकलह-क्रीडात्रुटत्-तन्तुकम्
मुक्ताजालम् इव प्रयाति झटिति भ्रश्यत् दिशः दृश्यताम्॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| शुभ्रम् | अ. नपुं. प्र. एक. वि. | कर्मणि | न. नपुं. सप्त. एक. विशेष्यम् |
| सद्म | न. नपुं. प्र. एक. विशेष्यम् | विच्छिन्ने | अ. नपुं. सप्त. एक. वि. |
| सविभ्रमाः | आ. स्त्री. प्र. बहु. समस्तम् वि. | नितराम् | अव्ययम् |
| युवतयः | इ. स्त्री. प्र. बहु. विशेष्यम् | अनङ्गकलह-क्रीडात्रुटत्तन्तुकम् | अ. नपुं. प्र. एक. समस्तम् |
| श्वेतातपत्रोज्ज्वला | आ. स्त्री. प्र. एक. समस्तम् वि. | मुक्ताजालम् | अ. नपुं. प्र. एक. समस्तम् |
| | | इव | उपमानवाचि अव्ययम् |
| लक्ष्मीः | ई. स्त्री. प्र. एक. विशेष्यम् | प्रयाति | प्र√या + लट्, प्रपु. एक. |
| इति | अव्ययम् | झटिति | अव्ययम् |
| अनुभूयते | अनु√भू + कर्मणि लट् प्रपु. एक. | भ्रश्यत् | त. - नपुं. प्र. एक. शत्रन्तम् |
| चिरम् | अव्ययम् | दिशः | दिश्- श. स्त्री. द्वि. बहु. |
| अनुस्यूते | अ. नपुं. सप्त. एक. क्तान्तपदम् | दृश्यताम् | दृश् + कर्मणि लोट् प्रपु. एक. |
| शुभे | अ. नपुं. सप्त. एक. वि. | | |

www.thearyasamaj.org



## आकाङ्क्षा

**अनुभूयते।**

| | |
|---|---|
| किम् अनुभूयते ? | शुभ्रं सद्म, सविभ्रमाः युवतयः, श्वेतातपत्रोज्ज्वला लक्ष्मीः इति (एतत् सर्वम्) अनुभूयते। |
| शुभ्रं सद्म, सविभ्रमाः युवतयः श्वेतातपत्रोज्ज्वला लक्ष्मीः (इत्येत्सर्वं) कदा अनुभूयते ? | चिरम् अनुस्यूते शुभे कर्मणि (विद्यमाने सति) शुभ्रं सद्म सविभ्रमाः युवतयः श्वेतातपत्रोज्ज्वला लक्ष्मीः (इत्येत्सर्वम्) अनुभूयते। |

**दृश्यताम्।**

| | |
|---|---|
| किं दृश्यताम् ? | प्रयाति इति दृश्यताम्। |
| किं प्रयाति इति दृश्यताम् ? | पूर्वोक्तं-शुभ्रं सद्म .... इत्यादिकं यदनुभूयते तत्सर्वं प्रयाति इति दृश्यताम्। |
| (पूर्वोक्तं सर्वं) कथं कुत्र प्रयाति इति दृश्यताम् ? | झटिति दिशः प्रयाति इति दृश्यताम्। |
| कथम् इव (पूर्वोक्तं शुभ्रं सद्म इत्यादि) झटिति दिशः प्रयाति इव दृश्यताम् ? | अनङ्ग-कलह-क्रीडा-त्रुटत्तन्तुकं मुक्ताजालम् इव भ्रश्यद् झटिति (पूर्वोक्तं) दिशः प्रयाति इति दृश्यताम्। |
| कस्मिन् (सति) .... दिशः प्रयाति इति दृश्यताम् ? | विच्छिन्ने (शुभे कर्मणि विच्छिन्ने सति) ... दिशः प्रयाति इति दृश्यताम्। |

## अन्वयः

चिरम् अनुस्यूते शुभे कर्मणि शुभ्रं सद्म, सविभ्रमाः युवतयः, श्वेतातपत्रोज्ज्वला लक्ष्मीः इति अनुभूयते। विच्छिन्ने (शुभे कर्मणि) नितराम् अनङ्गकलहक्रीडात्रुटत्तन्तुकम् मुक्ताजालम् इव भ्रश्यत् झटिति दिशः प्रयाति इति दृश्यताम्।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| चिरम् | बहोः कालात् | बहुत समय से | since a long time |
| अनुस्यूते | अनुवर्तिते | किये जा रहे | collected |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| शुभे | पुण्यजनके | पुण्यदायक | pious |
| कर्मणि | सुकृति (सति) | कर्म के रहने पर | good deed |
| शुभ्रम् | धवलम् | धवल | glorious |
| सद्म | प्रासादम् | महल | palace |
| सविभ्रमाः | विलासवत्यः | विलास वाली | sporting |
| युवतयः | तरुण्यः | युवतियाँ | ladies |
| श्वेतातपत्रोज्ज्वला | श्वेतछत्रशोभिता | श्वेतछत्र से उज्ज्वल | white umbrella |
| लक्ष्मीः | राजलक्ष्मीः | राजलक्ष्मी | wealth |
| इति | एतत् सर्वम् | ये सभी | all this |
| अनुभूयते | उपभुज्यते | भोगे जाते हैं | is enjoyed |
| विच्छिन्ने (शुभे कर्मणि) | नष्टे पुण्यकर्मणि | पुण्यकर्मों के नष्ट हो जाने पर | on finishing of good deeds |
| अनङ्गकलहक्रीडा-त्रुटत्तन्तुकम् | कामकेलिरूपरतियुद्धे छिन्दत् तन्तुकम् | कामक्रीडा रूप रतियुद्ध के कारण टूट रही डोर वाली | due to love quarrels like garland |
| मुक्ताजालम् | मुक्ताहारम् इव | मोतियों की माला के समान | of pearls |
| भ्रश्यत् | अधःपतत् | बिखरते हुए | scatter |
| झटिति | शीघ्रम् | शीघ्र ही | suddenly |
| दिशः | दिक्षु | दिशाओं में | in directions |
| प्रयाति | गच्छति | जा रहा है | is going |
| इति | एवम् | यह | this |
| दृश्यताम् | अवलोक्यताम् | देखें | see |

## भावार्थः

**संस्कृतम्–** चिरकालात् सञ्चीयमाने शुभकर्मणि शुभ्रं भवनं, विलासवत्यः युवतयः श्वेतछत्रालङ्कृता राजलक्ष्मीः इत्येतत् सर्वं जनैः उपभुज्यते, तस्मिन् शुभकर्मणि नष्टे सति कामक्रीडाकलहेन त्रुटत्तन्तुकम् मुक्ताजालम् इव अधःपतत् शीघ्रं सर्वं दिक्षु गच्छति, विलीनं भवतीति वा जनाः पश्यन्तु ।

www.thearyasamaj.org



**विशेषः–** शुभकर्मवशात् जनः सर्वम् ऐहिकं सुखवस्तु लभते, नष्टे तु तस्मिन् झटिति सर्वं नश्यति। अतः जनाः शुभकर्मणि संलग्नाः एव भवेयुरिति भावः।

**हिन्दी–** चिरकाल से शुभकर्म का संचय किये जाते रहने पर स्वच्छ भवन, विलासवती युवतियाँ एवं श्वेतछत्रों से अलङ्कृत राजलक्ष्मी का भोग लोगों द्वारा किया जाता है, किन्तु शुभकर्म के नष्ट होने पर काम की कलहक्रीडा के कारण टूट रहे तन्तुवाले मोतियों के हार के समान गिरकर सब कुछ शीघ्र ही सभी दिशाओं में विलीन हो जाते हैं, यह लोग देखें।

**आङ्ग्लम्–** When good deeds are collected since long time a glorious building, suporting ladies and royal prosperity accompanied by white umbrella-all these are enjoyed. But when the good deeds are finished, all these vanish in directions like pearls of a garland whose thread is broken in the quarrels of amorous sport.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

श्वेतातपत्रोज्ज्वला – श्वेत + आतपत्र + उज्ज्वला (दीर्घसन्धिः, गुणसन्धिश्च)

लक्ष्मीरित्यनुभूयते – लक्ष्मीः + इति + अनुभूयते (विसर्गसन्धिः, यणसन्धिश्च)

अनुस्यूते – अनु✓सिव् + क्तप्रत्ययः (धातोर्वस्य ऊठ्, इकारस्य यण्) अनुस्यूत् इति। सप्त. एक.

विच्छिन्ने – वि✓छिद् + क्तः (दतयोर्नः रदाभ्यामिति सूत्रेण) सप्त. एक.

भ्रश्यत् – भ्रंश् + लटःस्थाने शतृ-प्रत्ययः, श्यन् नलोपः प्रथमैकवचने नपुंसके रूपम्। यथा– दिव्यत्, नृत्यत्।

#### (ख) समासः

सविभ्रमाः – विभ्रमेण सह वर्तते या इति सविभ्रमा (बहुव्रीहिः) यथा– सविलासा, समङ्गला सानुरोध

श्वेतातपत्रोज्ज्वला – श्वेतं च तत् आतपत्रम्, श्वेतातपत्रम् (कर्मधारयः)

www.thearyasamaj.org



श्वेतातपत्रेण उज्ज्वला (तृ. तत्पु.) यथा– कृष्णचामरसंयुता-शुभ्रातपत्रप्रकाशा ।

अनङ्गकलहक्रीडात्रुटत्तन्तुकम् – अनङ्गस्य कलहः अनङ्गकलहः (षष्ठी तत्पु.) अनङ्गकलहः एव क्रीडा, अनङ्गकलहक्रीडा (कर्मधारयः) अनङ्गकलहक्रीडायाः त्रुटत्तन्तुर्यस्य, तत् (व्यधिकरणबहुव्रीहिः)

मुक्ताजालम् – मुक्तायाः जालम् (षष्ठी-तत्पु.)

अनुभूयते – अनु✓भू धातोः कर्मवाच्ये लट्, यक्, आत्मनेपदम् । प्र. पुं. एकवचनम् । यथा– अनुदीयते, प्रचीयते । शुभ्रादिषु उक्ते कर्मणि प्रथमा भवति ।

दृश्यताम् – दृश् धातोः कर्मणि लोट्, यक्, आत्मनेपदम् । प्र. पु. एकवचनम् । यथा– सृज्यताम्, दीयताम्, प्रव्यताम् ।

प्रयाति – प्र✓या + लट्, कर्तृवाच्ये । प्र. पु. एकवचनम् । यथा– विभाति, प्रवाति ।

(ख) **पर्यायशब्दाः**

शुभ्रम् – शुचिः, स्वच्छम्, श्वेतम्, पाण्डुरम्, शुक्लम्

सद्म – वेश्म, निकेतनम्

आतपत्रम् – छत्रम्

अनङ्गः – कामः, कन्दर्पः, दर्पकः

(ii) **छन्दः** – शार्दूलविक्रीडितम्

(iii) **अलङ्कारः** – उपमा

www.thearyasamaj.org



## अभ्यासः - 41
## श्लोकः - 91

1. श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–

............ सद्म ............ ............ श्वेतात............

लक्ष्मीरित्यनुभूयते ............ शुभे ............ ।

............ नितरामनङ्ग............ तन्तुकं

मुक्ताजालमिव ............ ............ भ्रश्यद्............ ............ ॥

2. सन्धिं विसन्धिं वा कुरुत–

(i) श्वेतातपत्रोज्ज्वला – ............

(ii) लक्ष्मीरित्यनुभूयते – ............

(iii) चिरम् अनुस्यूते – ............

(iv) नितराम् अनङ्गकलहक्रीडात्रुटत्तन्तुकम् – ............

3. क्रियापदानि अधो लिखत–

............

4. अव्ययपदानि अधो लिखत–

............

5. प्रश्नानामुत्तराणि दत्त–

(i) कस्मिन् अनुस्यूते सद्म युवतयः लक्ष्मीश्च उपभुज्यते ?

............

(ii) विच्छिन्ने कर्मणि किं भवति ?

............

www.thearyasamaj.org



(iii) कविरत्र किं सन्दिशति ?

..............................................................................

(iv) त्रुटत्तन्तुमुक्ताजालमिव झटिति दिशः किं प्रयाति ?

..............................................................................

6. **यथोचित अव्ययपदेन वाक्यं पूरयत–**

**नितराम्, इव, झटिति**

(i) रामस्य दर्शनेन हनूमान् .............................. प्रासीदत् ।

(ii) अस्या नवयौवनायाः मुखं चन्द्र .............................. अस्ति ।

(iii) नष्टे शुभे कर्मणि तस्य फलानि .............................. विलुप्तानि जायन्ते ।

7. **विशेष्यं विशेषणेन सह योजयत–**

| | | | |
|---|---|---|---|
| (i) | चिरमनुस्यूते | (क) | सविभ्रमाः |
| (ii) | श्वेतातपत्रोज्ज्वला | (ख) | कर्मणि |
| (iii) | सद्म | (ग) | शुभ्रम् |
| (iv) | युवतयः | (घ) | शुभ-कर्मणि |
| (v) | विच्छिन्ने | (ङ) | लक्ष्मीः |

9. **सन्धिं कुरुत–**

(i) शुभ्र + आतपत्र + उत् + ज्वला – ..............................

(ii) लक्ष्मी + इति + अनुभूयते – ..............................

(iii) चिरम् + अनुसि + ऊते – ..............................

10. **विग्रहवाक्यं लिखत–**

(i) सविलासाः – ..............................

(ii) शुभ्रातपत्रदीप्ता – ..............................

www.thearyasamaj.org



(iii) युद्धक्रीडात्रुटद्गात्रम् – ..........

11. **कर्मणि लटि लोटि च रूपाणि लिखत–**

**अनु✓भू-लट्–**

| | | |
|---|---|---|
| .......... | .......... | .......... |
| .......... | अनुभूयेथे | .......... |
| अनुभूये | .......... | .......... |

**दृश्-लोट्–**

| | | |
|---|---|---|
| दृश्यस्व | .......... | .......... |
| .......... | .......... | .......... |
| .......... | .......... | .......... |

12. **प्रश्नानामुत्तराणि दत्त–**

(i) शुभ्रं सद्म, सविलासाः युवतयश्च केन उपभुज्यन्ते ?

..........

(ii) अनुस्यूते शुभे कर्मणि अन्यत् किम् उपभुज्यते ?

..........

(iii) झटिति किम् दिशः प्रयाति ?

..........

(iv) मुक्ताजालं कीदृशमत्र वर्णितम् ?

..........

13. **श्लोकस्यार्थं स्वभाषया लिखत–**

..........

..........

www.thearyasamaj.org



..............................................................................................

..............................................................................................

..............................................................................................

**14. निर्दिष्टरूपेण वाक्यं पूरयत–**

(i) वयम् इतः झटिति .................................... (प्र✓या + लट्)

(ii) अस्माभिः सुकृतूफलम् .................................... (उप✓भुज् + लट्)

(iii) भवद्भिः अत्र दृश्यमिदं .................................... (दृश् + लोट्)

(iv) शुभकर्मफलानि अवश्यम् .................................... (अनु✓भू + लट्)

**15. पर्यायशब्दान् लिखत–**

(i) .................... वस्त्रम् अस्ति। (शुभ्रम्)

(ii) मम .................... देहल्याम् अस्ति। (सद्म)

(iii) .................... प्रभावः दरीदृश्यते। (अनङ्गस्य)

(iv) .................... अतीव रमणीयमस्ति। (आतपत्रम्)

**16. कोष्ठकस्थपदानाम् विग्रहवाक्यं समस्तं पदं वा लिखत–**

(i) (शुभ्रातपत्रशोभितो) .................................... राजा अस्ति।

(ii) (सविभ्रमा) .................................... इयं बाला पश्यति।

(iii) (मुक्ताजालम्) .................................... त्रुटितम्।

(iv) (स्वच्छेन आतपत्रेण राजिता) .................................... राज्यश्रीः।

(v) (अनुरोधेन सह वर्तन्ते इति) .................................... स्त्रियः आगताः।

(vi) (त्रुटन् तन्तुर्यस्य, तत्) .................................... माल्यम् अस्ति।

**17. अव्ययपदानां प्रयोगेन वाक्यानि रचयत–**

(i) नितराम् – ....................................................

(ii) झटिति – ....................................................

www.thearyasamaj.org



(iii) वृथा – ..............................

(iv) इव – ..............................

(v) सदा – ..............................

(vi) च – ..............................

(vii) एव – ..............................

(viii) अपि – ..............................

18. श्लोके कस्य माहात्म्यम् वर्णितम् इति अधो लिखत–

..............................

..............................

..............................

..............................

..............................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी।**
**तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता॥ 92॥**

**पदच्छेदः**

कर्म-आयत्तम् फलम् पुंसाम् बुद्धिः कर्म-अनुसारिणी।
तथा-अपि सुधिया भाव्यम् सुविचार्य एव कुर्वता॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| कर्मायत्तम् | अ. नपुं. प्र. एक., वि. समस्तम् | तथा, अपि | अव्ययपदे |
| | | सुधिया | ई. पुं. तृ. एक. |
| फलम् | अ. नपुं. प्र. एक. विशेष्यम् | भाव्यम् | अ. नपुं. प्र. एक. (कृदन्तक्रियापदम्) |
| पुंसाम् | स. पुं. षष्ठी बहु. | सुविचार्य | ल्यबन्तम् अव्ययम् |
| बुद्धिः | इ. स्त्री. प्र. एक. विशेष्यम् | एव | अव्ययम् |
| कर्मानुसारिणी | ई. स्त्री. प्र. एक., वि. समस्तम् | कुर्वता | त. पुं. तृ. एक. (शत्रन्तं विशेष्यम्) |

**आकाङ्क्षा**

**कर्मायत्तं (भवति)।**

किं कर्मायत्तं भवति ? — फलं कर्मायत्तं (भवति)।
केषां फलं कर्मायत्तं (भवति) ? — पुंसां (कर्मणां) फलं कर्मायत्तं (भवति)।

**कर्मानुसारिणी।**

का कर्मानुसारिणी ? — बुद्धिः कर्मानुसारिणी।
तथापि किम् ? — तथापि भाव्यम्।
केन भाव्यम् ? — सुधिया भाव्यम्।
सुधिया कथं भाव्यम् ? — सुधिया सुविचार्य एव कुर्वता भाव्यम्।

www.thearyasamaj.org



## अन्वयः

पुंसां फलं यद्यपि कर्मायत्तं, बुद्धिः (च) कर्मानुसारिणी (भवति) तथापि सुधिया सुविचार्य एव कुर्वता भाव्यम्।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| पुंसाम् | पुरुषाणाम् | पुरुषों का | men's |
| फलम् | सुखदुःखादिकं फलम् | सुख-दुःख आदि फल | consequences |
| (यद्यपि) | (यद्यपि) | (यद्यपि) | (although) |
| कर्मायत्तम् | निजकृतपापपुण्यादि कर्मणाम् अधीनम् | स्वयं कृत कर्म के अधीन (होता है) | depends on their action |
| बुद्धिः (च) | अथ बुद्धिः | और बुद्धि | and mind |
| कर्मानुसारिणी | कर्मणः अनुगामिनी | कर्म का अनुसरण करने वाली | following the action |
| (भवति) | (जायते) | (होती है) | (becomes) |
| तथापि | एवं सत्यपि | ऐसा होने पर भी | even so |
| सुधिया | बुद्धिमता जनेन | बुद्धिमान मनुष्यों को | wise men |
| सुविचार्य एव | सम्यक् चिन्तयित्वा एव | अच्छी तरह विचार करके ही | after mature consideration |
| कुर्वता | कर्मकरेण | कार्य करने वाला | doing their action |
| भाव्यम् | भवितव्यम् | होना चाहिए | should be |

## भावार्थः

**संस्कृतम्–** मनुष्याणां सुखदुःखादिफलं कर्मणाम् अधीनं भवति, बुद्धिश्चापि कर्मणि अनुसरति, तथापि बुद्धिमान् मनुष्यः सम्यक् विचारं कृत्वैव कर्म कुर्वन् भवेत्।

**हिन्दी–** मनुष्यों के सुख-दुःख आदि फल पूर्व जन्मकृत कर्मों के अधीन है और बुद्धि भी कृत-कर्म का ही अनुसरण करती है। तथापि बुद्धिमान् मनुष्यों को सोच-विचारकर ही कर्म करते रहना चाहिये।

www.thearyasamaj.org



**आङ्ग्लम्–** The fruit of pleasure or pain in human depends on their action of previous life and the mind also follows the action, yet a wise man should perform action after deep consideration.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

| | | |
|---|---|---|
| कर्मायत्तम् | – | कर्म + आयत्तम् (दीर्घसन्धिः) |
| फलं पुंसां बुद्धिः | – | फलम् + पुंसाम् + बुद्धिः (अनुस्वारसन्धिः) |
| सुविचार्यैव | – | सुविचार्य + एव (वृद्धि-सन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| कर्मायत्तम् | – | कर्मणः कर्मणि वा आयत्तम् (षष्ठी-तत्पु., सप्त. तत्पु. वा) |
| कर्मानुसारिणी | – | कर्म अनुसरति, तच्छीला इत्यर्थे कर्मन् इत्युपपदम्, (उपपद-समासः) |
| सुधिया | – | सुशोभना धीर्यस्य सः सुधीः, तृ.एक. । कर्मवाच्ये अनुक्तकर्तुः तृतीयाऽभूत् (बहुव्रीहि-समासः) |
| कुर्वता | – | कृ + शतृ प्रत्ययः = कुर्वत्, तृ.एक. (सुधिया इत्यस्य वि.) |
| भाव्यम् | – | भू धातोर्ण्यत् प्रत्ययः भावे । भावे औत्सर्गिकम् एकवचनम्, नपुंसकत्वञ्च भवति । यथा– लाव्यम्, पाव्यम्, हास्यम्, धार्यम् (कृदन्तक्रिया पदम्) सुविचार्य – वि✓चर् + णिच् + क्त्वा स्थाने ल्यप् = विचार्य, सु = शोभनं विचार्य (प्रादिसमासः) |
| पुंसाम् | – | पुंस् शब्दः, षष्ठ्यैकवचने रूपम् । |

www.thearyasamaj.org



(ग) पर्यायशब्दाः

बुद्धिः – मतिः, धिषणा, धीः, मनीषा ।

आयत्तः – अधीनः, निघ्नः ।

सुधीः – विद्वान्, बुधः, पण्डितः, मनीषी ।

(ii) छन्दः – शिखरिणी छन्दः

---

## अभ्यासः – 42

## श्लोकः – 92

1. श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–

कर्मायत्तं .................. पुंसां .................. .................. ।

.................. सुधिया .................. .................. .................. ॥

2. सन्धिं विसन्धिं वा लिखत–

(i) कर्मायत्तं फलं पुंसां – ..................

(ii) बुद्धिः कर्म-अनुसारिणी – ..................

(iii) तथापि – ..................

(iv) सुविचार्यैव – ..................

3. विशेषणविशेष्यपदानि अधो लिखत–

.................. .................. .................. ..................

.................. .................. .................. ..................

4. षष्ठ्यन्तं पदम् अव्ययपदानि च नीचैः लिखत–

.................. .................. .................. ..................

..................

www.thearyasamaj.org



5. कृदन्तक्रियापदम् अधो लिखत–

..........................................................

6. प्रश्नानामुत्तराणि दत्त–

(i) कर्मायत्तं किं भवति ?

..........................................................

(ii) बुद्धिः काम् अनुसरति ?

..........................................................

(iii) कर्मायत्तम् इत्यस्य कोऽर्थः ?

..........................................................

(iv) अस्मिन् पद्ये कवेः कः सन्देशः अस्ति ?

..........................................................

7. मूलशब्दविभक्तिवचनलिङ्गनिर्देशं कुरुत–

(i) पुंसाम् – .................. .................. .................. ..................

(ii) सुधिया – .................. .................. .................. ..................

(iii) कुर्वता – .................. .................. .................. ..................

(iv) भाव्यम् – .................. .................. .................. ..................

8. विग्रहवाक्यं समस्तं पदं वा लिखत–

(i) मदायत्तम् – ..........................................................

(ii) धर्मानुसारिणी – ..........................................................

(iii) स्वस्य आयत्तम् – ..........................................................

(iv) स्वेच्छानुगामिनी – ..........................................................

9. समस्तं पदं लिखत–

(i) धृ + शतृ, तृतीयैकवचनम् – ..........................................................

www.thearyasamaj.org



(ii) गम् + शतृ, प्रथमा बहुवचनम् – ..............................

(iii) न वि + चारि + क्त्वा – ..............................

(iv) विधिम् अनुभवति तच्छीला – ..............................

10. प्रश्नयोरुत्तरे लिखत–

(i) फलं बुद्धिश्च किमनुसरति ?

..............................

(ii) सुधिया कथं कार्यं करणीयम् ?

..............................

11. 'ल्यप्' प्रत्ययान्तेन पदेन वाक्यं पूरयत–

(i) बुद्धिपूर्वकं .............................. कार्यं कर्तव्यम्। (वि✓चारि)

(ii) लुण्ठकाः धनं बलात् .............................. पलायिताः। (अप✓हृ)

(iii) नृपाः शत्रून् .............................. अगच्छन्। (सम्✓हृ)

(iv) छात्रान् चित्राणि .............................. पाठयतु। (प्र✓दृशि)

(v) सः .............................. व्याख्यानं करोति। (अधि✓इ)

12. ण्यत्प्रत्ययान्तेन वाक्यं पूरयत–

(i) विदुषा विचारवता ..............................। (भू)

(ii) त्वया .............................. न कर्तव्यम्। (हस्)

(iii) हृदि धैर्यं .............................. भवता। (धृ)

(iv) इदमस्माभिरवश्यं ..............................। (कृ)

(v) निवासस्थलं सर्वैः ..............................। (मृज्)

13. अस्य श्लोकस्यार्थं स्वशब्दैः संस्कृतेन लिखत–

कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी।
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता॥

www.thearyasamaj.org



.............................................................................................................................

.............................................................................................................................

.............................................................................................................................

14. पर्यायशब्दान् लिखत–

(i) बुद्धिः – .............................................................

(ii) सुधीः – .............................................................

(iii) आयत्तः – .............................................................

15. यथोचित-पुंस् शब्दरूपेण वाक्यं पूरयत–

| पुरुषाय, पुरुषाः, पुरुषम्, पुरुषः, पुरुषाणाम् |
|---|

(i) अयं कस्य देशस्य .............................. अस्ति।

(ii) .............................. ध्यात्वा वक्तव्यम्।

(iii) .............................. कार्याणि सम्यक् सन्ति।

(iv) .............................. भवन्ति साधवः।

(v) अस्मै .............................. धनानि देहि।

◆◆◆

www.thearyasamaj.org



## श्लोकः

**गुणवदगुणवद्वा कुर्वता कार्यजातं***
**परिणतिरवधार्या यत्नतः पण्डितेन ।**
**अतिरभसकृतानां कर्मणामाविपत्ते-**
**र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ 93 ॥**

## पदच्छेदः

गुणवत् अगुणवत् वा कुर्वता कार्यजातम्
परिणतिः अवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानाम् कर्मणाम् आविपत्तेः
भवति हृदयदाही शल्यतुल्यः विपाकः ॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| गुणवत् | त. नपुं. प्र. एक. तद्धितान्तं, वि. | पण्डितेन | अ. पुं. तृ. एक. |
| अगुणवत् | त. नपुं. प्र. एक. समस्तम्, तद्धितान्तं वि. | अतिरभसकृतानाम् | अ. नपुं. षष्ठी बहु. समस्तम्, वि. |
| वा | अव्ययम् | कर्मणाम् | न. नपुं. षष्ठी बहु. विशेष्यम् |
| कुर्वता | त. पुं. तृ. एक. शत्रन्त वि. | आविपत्तेः | इ. स्त्री. पं. एक. |
| कार्यजातम् | अ. पुं. द्विती. एक. | भवति | भू + लट्, प्रपु. एक. |
| परिणतिः | इ. स्त्री. प्र. एक. क्तिन्नन्तम् | हृदयदाही | न. पुं. प्र. एक. वि., समस्तम्, कृदन्तम् |
| अवधार्या | आ. स्त्री. प्र. एक. ण्यत्-प्रत्ययान्तक्रिया | शल्यतुल्यः | अ. पुं. प्र. एक. समस्तम्, वि. |
| यत्नतः | तसिलन्तम् अव्ययम् | विपाकः | अ. पुं. प्र. एक. विशेष्यम् |

## आकाङ्क्षा

**अवधार्या ।**

का अवधार्या ? परिणतिः अवधार्या ।

* 'कार्यमादौ' इति पाठभेदः ।

www.thearyasamaj.org



| | |
|---|---|
| परिणतिः केन अवधार्या ? | परिणतिः पण्डितेन अवधार्या । |
| किं कुर्वता पण्डितेन परिणतिः अवधार्या ? | गुणवत् अगुणवत् वा कार्यजातं कुर्वता पण्डितेन परिणतिः अवधार्या । |
| परिणतिः कथम् अवधार्या ? | परिणतिः यत्नतः अवधार्या । |
| परिणतिः (कर्मणां विपाकः) किमर्थम् अवधार्या ? | (यतो हि) कर्मणां विपाकः (परिणतिः) शल्यतुल्यो हृदयदाही च भवति । |
| कर्मणां विपाकः कियत्पर्यन्तं शल्यतुल्यः हृदयदाही (च) भवति ? | कर्मणां विपाकः आविपत्तेः शल्यतुल्यः हृदयदाही (च) भवति । |
| कीदृशानां कर्मणां विपाकः शल्यतुल्यः .... भवति ? | अतिरभसकृतानां कर्मणां विपाकः शल्यतुल्यः .... भवति । |

**अन्वयः**

गुणवत् अगुणवत् वा कार्यजातं कुर्वता पण्डितेन यत्नतः परिणतिः अवधार्या (हि) अतिरभसकृतानां कर्मणां विपाकः आविपत्तेः शल्यतुल्यो हृदयदाही भवति ।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| गुणवत् | सगुणम् | गुणयुक्त | good |
| अगुणवत् वा | गुणरहितं वा | या गुणरहित | or bad |
| कार्यजातम् | कार्यसमूहः | कार्य समूह को | work group |
| कुर्वता | विदधता | करते हुए | doing |
| पण्डितेन | विज्ञेन | पण्डित के द्वारा | by learned man |
| यत्नतः | यत्नपूर्वकम् | यत्न पूर्वक | with afforts |
| परिणतिः | परिणामः | परिणाम | consequence |
| अवधार्या | विचारणीया | अवधारण किया जाना चाहिये | should be considered |
| हि | यतः | क्योंकि | because |
| अतिरभसकृतानाम् | अतित्वरया विहितानाम् | अतिशीघ्रता से किये गए | done in hasty manner |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| कर्मणाम् | कार्याणाम् | कर्मों का | of works |
| विपाकः | फलम् | फल | result |
| आविपत्तेः | मृत्युपर्यन्तम् | मृत्युकाल तक | until death |
| शल्यतुल्यः | बाणाग्रसदृशः | बाण के अग्रभाग के समान | like dart |
| हृदयदाही | हृदयतापकरी | हृदय को जलाने वाला | piercing to heart |
| भवति | जायते | होता है | becomes |

## भावार्थः

**संस्कृतम्**– सगुणं निर्गुणं वा कार्यसमूहं कुर्वन् विद्वान् तस्य कार्यसमूहस्य फलविषये अवश्यं चिन्तयेत् यतो हि अतित्वरया अविवेकेन विहितानां कर्मणां विपाकः (फलं) मृत्युपर्यन्तं बाणाग्रभागवत् हृदयसन्तापकारकः भवति।

**हिन्दी**– गुणयुक्त या गुणरहित कार्यसमूह को करता हुआ विद्वान् उसके फल का विचार अवश्य कर ले। क्योंकि अत्यन्त शीघ्रता में अविवेक से किये गये कर्मों का विपाक (फल) बाणों के अग्रभाग के समान मृत्युपर्यन्त हृदय को जलाने वाला (संतप्त करने वाला) होता है।

**आङ्ग्लम्**– While starting a good or bad work, a wise man should carefully consider about its consequence because the result of a work done in hasty manner without proper decision becomes piercing to the heart like a dart till death.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

गुणवदगुणवद्वा – गुणवत् + अगुणवत् + वा (जश्त्वसन्धिः) यथा– क्रोधाद्भवति। तदयम्।

शल्यतुल्यो विपाकः – शल्यतुल्यः + विपाकः (विसर्गसन्धिः) यथा– ग्रामो गच्छति, रमेशो विरुद्धः।

**(ख) समासः**

अतिरभसकृतानाम् – अतिरभसेन कृतानि (तृ. तत्पु.) तेषां यथा– अतिशीघ्रकृतम्

www.thearyasamaj.org



हृदयदाही – हृदयं दहति तच्छीलः इत्यर्थे (उपपद-समासः) यथा– शूलदायी, हृदयग्राही, मर्मस्पर्शी

शल्यतुल्यः – शल्येन तुल्यः (तृ. तत्पु.) विशेषणम्।

(ग) **तिङन्तः**

विपाकः – वि√पच् + घञ् = विपाकः - कर्मफलम्।

कुर्वता – कृ + शतृ = कुर्वत्, तृ. एक. पण्डितेन इत्यस्य वि.।

अवधार्या – अव√धृ + ण्यत् + टाप् = अवधार्या, कर्मणि ण्यत्।

परिणतिः – परिनम् + क्तिन् (णत्वम्) परिणतिः कर्मपदम्। कुर्वता पण्डितेन परिणतिः अवधार्या इति कर्मवाच्ये वाक्यम्। (अनुक्ते कर्तरि तृतीया, उक्ते कर्मणि च प्रथमा।)

गुणवत् – गुणः अस्ति अस्मिन् इत्यर्थे गुण + मतुप् = गुणवत्, नपुं. प्र. एक. वि.।

अगुणवत् – न गुणवत् (नञ्समासः मतुबन्तगुणवत् पदेन सह) नपुंसकें प्र. एक. वि.।

यत्नतः – यत्नात् इत्यर्थे यत्न + तसिल् = यत्नतः (अव्ययम्)

भवति – भू + लट्, प्रपु. एक. तिङन्तक्रियापदं कर्तरि प्रयोगः।

आविपत्तेः – आङ् इति कर्मप्रवचनीयं, तद्योगे विपत्ति शब्दात् पञ्चमी।

(घ) **पर्यायशब्दाः**

रभसम् – वेगः, हर्षः, त्वरा, शीघ्रम्

www.thearyasamaj.org



| | | |
|---|---|---|
| जातम् | – | ओघः, समूहः |
| (ii) छन्दः | – | मालिनी |

## अभ्यासः – 43
## श्लोकः – 93

1. पदच्छेदं पूरयत–

गुणवत्.................. वा कुर्वता ..................

..................अवधार्या .................. .................. ।

अतिरभसकृतानां .................. ..................

भवति .................. .................. विपाकः ॥

2. सन्धिं विसन्धिं वा कुरुत–

(i) गुणवत् अगुणवत् वा – ..................

(ii) परिणतिः अवधार्या – ..................

(iii) कर्मणामाविपत्तेः – ..................

(iv) शल्यतुल्यो विपाकः – ..................

3. तृतीयान्तपदानि पञ्चम्यन्तपदानि च अधो लिखत–

.................. ..................

.................. ..................

.................. ..................

4. प्रश्नानामुत्तराणि दत्त–

(i) पण्डितेन यत्नतः का अवधार्या ?

..................

www.thearyasamaj.org



(ii) कथंविधेन पण्डितेन परिणामः अवधारणीयः ?

........................................................................................................

(iii) कार्यजातमत्र कीदृशमुक्तम् ?

........................................................................................................

(iv) आविपत्तेः शल्यतुल्यो विपाकः केषां भवति ?

........................................................................................................

(v) केषां विपाकः हृदयदाही भवति ?

........................................................................................................

5. कोष्ठकस्थ-शब्दैः वाक्यं पूरयत –

| विचार्यैव, अगुणवत्, कदाचिदपि, गुणवत्, शल्यतुल्यः, विपाकः |
|---|

(i) अस्माभिः .............................. कार्यमपि .............................. कर्तव्यम् ।

(ii) युष्माभिः .............................. कार्यं .............................. न कार्यम् ।

(iii) अविचारितकर्मणां .............................. भवति .............................. ।

6. पदपरिचयं दत्त–

(i) परिणतिः – ..............................

(ii) अतिरभसकृतानाम् – ..............................

(iii) भवति – ..............................

(iv) हृदयदाही – ..............................

7. विशेषणपदानि लिखत–

(i) कार्यजातम् – ..............................

(ii) पण्डितेन – ..............................

(iii) कर्मणाम् – ..............................

www.thearyasamaj.org



(iv) विपाकः – ..............................

**8. यथोचितं विग्रहवाक्यं समस्तं पदं वा लिखत–**

(i) अतिशीघ्रकृतानाम् – ..............................

(ii) शूलं ददाति तच्छीलः – ..............................

(iii) हृदयग्राही – ..............................

(iv) बाणाग्रेन तुल्यः – ..............................

(v) धनानि सन्ति अस्य इति – ..............................

**9. प्रत्ययान् संयोज्य पदं लिखत–**

(i) अवनम् + क्तिन् – ..............................

(ii) निर् + धारि + ण्यत् + टाप् – ..............................

(iii) ग्रन्थ + पठ् + णिनिः – ..............................

(iv) आयास + तसिल् – ..............................

**10. ण्यत् प्रत्ययं योजयित्वा लिखत–**

(i) तेन कार्यजातम् .............................. (कृ)

(ii) सद्गुणाः सर्वैः हृदये .............................. (धृ)

(iii) श्रमिकाणाम् अवनतिः न .............................. (अव✓धृ)

**11. प्रश्नानाम् उत्तराणि दत्त–**

(i) गुणवत् अगुणवत् वा पद्ये किम् उक्तम् ?

..............................

(ii) यत्नतः का अवधार्या ?

..............................

(iii) अतिरभसकृतानां कर्मणां विपाकः कीदृशो भवति।

..............................

www.thearyasamaj.org



(iv) कर्म केन प्रकारेण कर्तव्यम् ?

.................................................................................................

12. 'अतिरभसकृतानां कर्मणामाविपत्तेः भवति हृदयदाही शल्यतुल्यो विपाकः' इत्यस्य आशयं लिखत–

.................................................................................................

.................................................................................................

.................................................................................................

.................................................................................................

13. विशेषणपदैः वाक्यानि पूरयत–

(i) कार्यजातं .................... एव कर्तव्यम्।

(ii) कार्यजातम् .................... न कर्तव्यम्।

(iii) कार्यं .................... पण्डितेन विचारः कृतः।

(iv) .................... कर्मणां परिणामो न युक्तो भवति।

(v) अस्य कर्मणः विपाकः .................... भवति।

14. कोष्ठकस्थपदानां रिक्तस्थले विग्रहवाक्यं लिखत–

(i) (दुःखदायी) – .................... कालः सम्प्राप्तः।

(ii) (सुखकारी) – .................... अयं जनो विद्यते।

(iii) (हृदयहारि) – .................... इदं दृश्यमस्ति।

(iv) (अतिरभसकृतानाम्) – .................... कार्याणां परिणतिः।

(v) (शूलतुल्यम्) – .................... अस्य वचः।

(vi) (नृपसदृशः) – .................... अयं प्रतिभाति।

15. 'क्तिन्' प्रत्ययं संयोज्य लिखत–

(i) तस्य .................... कथमपि भवेत्। (उत् + नम्)

(ii) अस्मिन् कार्ये मम .................... नास्ति। (गम्)

www.thearyasamaj.org



(iii) अधुना तव .................. क्वास्ति । (स्था)

(iv) भगवति सर्वैः .................. विधेया । (रम्)

(v) ऐश्वर्यस्य अपरं नाम .................. । (वि✓भू)

(vi) गुरोः .................. सर्वेषु अस्ति । (दृश्)

**16. मतुबन्तेन शब्देन वाक्यं पूरयत–**

(i) अयं जनः .................. वर्तते । (धन)

(ii) .................. जनं न कोऽपि पृच्छति । (अधन)

(iii) .................. यानेन वयं गमिष्यामः । (गति)

(iv) .................. गुरवे मम नमः । (श्री)

(v) .................. जनानां भागवते परीक्षा । (विद्या)

(vi) .................. जनेषु सर्वेषामादरो भवति । (ज्ञान)

**17. कर्मप्रवचनीय-आङो योगे पञ्चमीविभक्तिः भवति। नीचैः पञ्चमीं विभक्तिं योजयत–**

(i) आ (मुक्ति) – .................................. संसारः ।

(ii) आ (पाटलिपुत्र) – .................................. जलवर्षा ।

(iii) आ (हिमालय) – .................................. तव गमनम् ।

(iv) आ (धनप्राप्ति) – .................................. न विरामः ।

(v) आ (कार्यपूरण) – .................................. कार्यासक्तिः ।

◆◆◆

www.thearyasamaj.org



**श्लोकः**

स्थाल्यां वैदूर्यमय्यां पचति तिलखलांश्चान्दनैरिन्धनौघैः*
सौवर्णैर्लाङ्गलाग्रैर्विलिखति वसुधामर्कतूलस्य हेतोः ।
कृत्वा कर्पूरखण्डान् वृतिमिह कुरुते कोद्रवाणां समन्तात्
प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपो मन्दभाग्यः ॥ 94 ॥

**पदच्छेदः**

स्थाल्याम् वैदूर्यमय्याम् पचति तिलखलान् चान्दनैः इन्धनौघैः
सौवर्णैः लाङ्गलाग्रैः विलिखति वसुधाम् अर्क-तूलस्य हेतोः ।
कृत्वा कर्पूरखण्डान् वृतिम् इह कुरुते कोद्रवाणाम् समन्तात्
प्राप्य इमाम् कर्मभूमिम् न चरति मनुजः यः तपः मन्दभाग्यः ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् |
|---|---|
| स्थाल्यम् | ई. स्त्री. सप्त. एक. विशेष्यम् |
| वैदूर्यमय्याम् | ई. स्त्री. सप्त. एक. वि. |
| पचति | पच् + लट्, प्रपु. एक. |
| तिलखलान् | अ. पुं. द्विती. बहु. |
| चान्दनैः | अ. पुं. तृ. बहु. वि. |
| इन्धनौघैः | अ. पुं. तृ. बहु. विशेष्यम् |
| सौवर्णैः | अ. नपुं. तृ. बहु. वि. |
| लाङ्गलाग्रैः | अ. नपुं. तृ. बहु. विशेष्यम् |
| विलिखति | वि✓लिख् + लट्, प्रपु. एक. |
| वसुधाम् | आ. स्त्री. द्विती. एक. |
| अर्कतूलस्य | अ. नपुं. षष्ठी एक. समस्तम् |
| हेतोः | उ. पुं. पं. एक. |
| कृत्वा | क्त्वान्तम् अव्ययम् |
| कर्पूरखण्डान् | अ. पुं. द्विती. बहु. |
| वृतिम् | इ. स्त्री. द्विती. एक. |
| इह | अव्ययम् |
| कुरुते | कृ + लट्, प्रपु. एक. आत्मने. |
| कोद्रवाणाम् | अ. पुं. षष्ठी बहु. |
| समन्तात् | अव्ययम् |
| प्राप्य | ल्यबन्तम् अव्ययम् |
| इमाम् | इदम्- म. स्त्री. द्विती. एक. सर्व. |
| कर्मभूमिम् | इ. स्त्री. द्विती. एक. |
| न | अव्ययम् |
| चरति | चर् + लट्, प्रपु. एक. |
| मनुजः | अ. पुं. प्र. एक. विशेष्यम् |
| यः | यत्- द. पुं. प्र. एक. सर्व., वि. |
| तपः | तपस्- स. नपुं. द्विती. एक. |
| मन्दभाग्यः | अ. पुं. प्र. एक. वि. |

* 'पचति च लशुनं चन्दनैरिन्धनाद्यैः' इत्यपि पाठभेदः ।

www.thearyasamaj.org



## आकाङ्क्षा

न चरति।

| | |
|---|---|
| किं न चरति ? | तपः न चरति। |
| यः तपः न चरति सः कः ? | यः (कोऽपि) तपः न आचरति (सः) मन्दभाग्यः। |
| किं प्राप्य (अपि) यः तपः न चरति स मन्दभाग्यः ? | इमां कर्मभूमिं प्राप्य (अपि) यः तपः न चरति स मन्दभाग्यः। |
| यः इमां कर्मभूमिं प्राप्य तपः न चरति (सः) किं करोति (इव) ? | इमां कर्मभूमिं प्राप्य यः तपः न चरति (सः) मन्दभाग्यः तिलखलान् पचति इव। |
| कैः तिलखलान् पचति (इव) ? | चान्दनैः इन्धनौघैः तिलखलान् पचति (इव)। |
| कुत्र (कस्यां) ..... तिलखलान् पचति (इव) ? | वैदूर्यमय्यां स्थाल्यां ..... तिलखलान् पचति (इव)। |
| अपि च किं करोति (इव) ? | सौवर्णैः लाङ्गलाग्रैः वसुधां विलिखति (इव)। |
| (किं) निमित्तं (कस्य हेतोः कृते) .... वसुधां विलिखति (इव) ? | अर्कतूलस्य हेतोः (कृते) .... वसुधां विलिखति (इव)। |
| अपि च किं कुरुते (इव) ? | वृतिं कुरुते (इव)। |
| कुत्र वृतिं कुरुते (इव) ? | कोद्रावाणां समन्तात् इह वृतिं कुरुते (इव)। |
| किं कृत्वा .... वृत्तिं कुरुते (इव) ? | कर्पूरखण्डान् कृत्वा .... वृतिं कुरुते (इव)। |

## अन्वयः

यः मन्दभाग्यः मनुजः इमां कर्मभूमिं प्राप्य तपः न चरति (सः) वैदूर्यमय्यां स्थाल्यां चान्दनैः इन्धनौघैः तिलखलान् पचति, अर्कतूलस्य हेतोः सौवर्णैः लाङ्गलाग्रैः वसुधां विलिखति, कर्पूरखण्डान् कृत्वा कोद्रवाणां समन्तात् इह वृतिम् कुरुते।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| यः | यः | जो | the |
| मन्दभाग्यः | भाग्यहीनः | भाग्यहीन | unlucky |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| मनुजः | मनुष्यः | मनुष्य | person |
| इमाम् | एताम् | इस | this |
| कर्मभूमिम् | कर्मक्षेत्रम् | कर्मभूमि को | world of action |
| प्राप्य | अवाप्य | पाकर | having obtained |
| तपः | तपस्यां | तपस्या | penance |
| न चरति | न करोति | नहीं करता है | does not |
| (सः) | असौ | वह | he |
| वैदूर्यमय्याम् | वैदूर्यमणिनिर्मितायाम् | वैदूर्यमणि से बनी | made by *vaidūryamaṇi* |
| स्थाल्याम् | पात्रे | स्थाली में | in pot |
| चान्दनैः | चन्दनसम्बन्धिभिः | चन्दन के | of sandalwood |
| इन्धनौघैः | काष्ठसमूहैः | काष्ठों से | by woods |
| तिलखलान् | तिलखलीम्/निष्तैल तिलपिण्डीम् | तिल की खली या पिण्डी को | sesamum |
| पचति | पक्वं करोति | पकाता है | cooks |
| अर्कतूलस्य | मन्दारकार्पासस्य | आक पौधे की रुई के | cotton of *Arka* tree |
| हेतोः | कारणात् | निमित्त | for sake of |
| सौवर्णैः | स्वर्णनिर्मितैः | स्वर्ण से निर्मित | gold made |
| लाङ्गलाग्रैः | हलाग्रभागैः | हल के फलों से | by ploughs |
| वसुधाम् | भूमिम् | भूमि को | to earth |
| विलखति | कर्षति | जोतता है | ploughs |
| कर्पूरखण्डान् | घनसारखण्डान् | कपूर के खण्डों को | pieces of camphor |
| कृत्वा | विधाय | करके/काटकर | cut |
| कोद्रवाणाम् | तुच्छधान्यानाम्/ कोरदूषाणाम् | कोदो के/ तुच्छ धान्य के | kodo crop/ inferior crop |
| समन्तात् | चतुर्दिक्षु / परितः | चारों ओर | around |
| इह | अस्मिन् लोके | इस लोक में | in this world |
| वृतिम् | आवारकम् | घेरा | hedge |
| करोति | रचयति | बनाता है | makes |

www.thearyasamaj.org



## भावार्थः

**संस्कृतम्–** यः मन्दभाग्यो नरः इमां कर्मभूमिमागत्य तपसः अनुष्ठानं न करोति सः चन्दनस्य काष्ठ-समूहैः वैदूर्यमणिनिर्मितपात्रे तिलखलीं पचति (इव), मन्दारकार्पासहेतोः सुवर्णनिर्मितहलाग्रभागैः पृथ्वीं कर्षति (इव) तथा च कर्पूरस्य खण्डान् विधाय तुच्छधान्यानां समन्तात् अस्मिन् लोके आवरणं रचयति।

**सन्देशः–** अस्यां कर्मभूमौ सत्कर्मानुष्ठानम् एव मानवस्य परमं कर्तव्यम् अस्ति। यः सत्कर्म न करोति स भाग्यहीन एव जनो भवति इति भावः।

**हिन्दी–** जो मन्दभाग्य मनुष्य इस कर्मभूमि में आकर तप का अनुष्ठान नहीं करता है, वह वैदूर्यमणि से निर्मित स्थाली (पात्र) में चन्दन के काष्ठ समूहों से तिल की खली को पकाता है, अर्क (मन्दार) पौधे की रुई के लिए सुवर्णनिर्मित हल के अग्रभाग से पृथ्वी को जोतता है और कपूर का खण्ड करके कोदो के चारों ओर इस संसार में घेरा बनाता है।

**आङ्ग्लम्–** The unlucky person who does not practise penance after coming on this world of action (*Karma*), cooks the oil-cake of sesamum in the pot made of *Vaidūrya* gems with the fuel of sandalwood, ploughs the earth by the golden plough shares for the sake of cotton of *Arka* plants, cuts down the camphor tree to make hedge around *Kodo* crop.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

चान्दनैरिन्धनौघैः – चान्दनैः + इन्धन + ओघैः
(चान्दनैः + इन्धन → विसर्गसन्धिः) (इन्धन + ओघैः → वृद्धिसन्धिः)

प्राप्येमां – प्राप्य + इमाम्
(गुणसन्धिः)

मनुजो यस्तपो मन्दभाग्यः – मनुजः + यः + तपः + मन्दभाग्यः।
(विसर्गसन्धिः)

www.thearyasamaj.org



(ख) **समासः**

| | | |
|---|---|---|
| तिलखलान् | – | तिलानां खलम् (षष्ठी तत्पु.) तान् |
| इन्धनौघैः | – | इन्धनस्य ओघः (षष्ठी तत्पु.) तैः |
| लाङ्गलाग्रैः | – | लाङ्गलस्य अग्रम् (षष्ठी तत्पु.) तैः |
| अर्कतूलस्य | – | अर्काणाम् तूलं (षष्ठी तत्पु.) तस्य |
| कर्पूरखण्डान् | – | कर्पूरस्य खण्डाः (षष्ठी तत्पु.) तान् |
| मन्दभाग्यः | – | मन्दं भाग्यं यस्य सः (बहुव्रीहिः) |

(ग) **तद्धितान्तः**

| | | |
|---|---|---|
| वैदूर्यमय्याम् | – | वैदूर्यस्य विकारः - वैदूर्य + मयट् + ङीप् = वैदूर्यमयी सप्त. एकवचनम् । यथा– सुवर्णमयी प्रतिमा । |
| चान्दनैः | – | चन्दनस्य इमे, चन्दन + अण्, आदिवृद्धिः । तृ. बहु. यथा– सुवर्णस्य इमे - सौवर्णाः, रौप्याणि । |

(घ) **कृदन्तः**

| | | |
|---|---|---|
| कृत्वा | – | कृ + क्त्वा = कृत्वा (क्त्वाप्रत्ययान्तमव्ययम्) |
| प्राप्य | – | प्र✓आप् + क्त्वास्थाने ल्यप् = प्राप्य यथा– अवाप्य, आदाय, प्रदाय |

(ङ) **तिङन्तः**

| | | |
|---|---|---|
| पचति | – | पच् + लट्, प्रपु. एक. (कर्तरि) |
| विलिखति | – | वि✓लिख् + लट्, प्रपु. एक. (कर्तरि) |
| कुरुते | – | कृ + लट्, प्रपु. एक. आत्मनेपदम् (कर्तरि प्रयोगः) |
| चरति | – | चर् + लट्, प्रपु. एक. (कर्तरि) |

(च) **पर्यायशब्दाः**

| | | |
|---|---|---|
| वैदूर्यम् | – | नीलमणिः, वालवायजम् |

www.thearyasamaj.org



| | | |
|---|---|---|
| कोद्रवः | – | कोरदूषः, तुच्छधान्यम् |
| मन्दः | – | मूढः, अल्पपटुः, निर्भाग्यः |
| वृतिः | – | आवरणम्, वेष्टनम्, आवारः |
| (ii) छन्दः | – | स्रग्धरा |
| (iii) अलङ्कारः | – | निदर्शनालङ्कारः (असम्भवद्वस्तुसम्बन्धिवाक्यार्थ-प्रतिपादनात् अयमलङ्कारः) |

---

## अभ्यासः – 44
## श्लोकः – 94

1. **श्लोकानुसारम् उचितेन पदेन रिक्तस्थानं पूरयत–**

स्थाल्यां ............ पचति तिल............

............लाङ्गलाग्रै............ ............मर्कतूलस्य हेतोः ।

कृत्वा ............ वृतिमिह ............ कोद्रवाणां ............

............ कर्मभूमिं न चरति ............ ............ ............ ॥

2. **सन्धिं विसन्धिं वा कुरुत–**

(i) तिलखलान् चान्दनैः इन्धनौघैः – ............

(ii) सौवर्णैर्लाङ्गलाग्रैर्विलिखति – ............

(iii) वृतिमिह प्राप्येमाम् – ............

(iv) मनुजः यः तपः मन्दभाग्यः – ............

3. **अव्ययपदानि अधो लिखत–**

............

4. **क्रियापदानि लिखत–**

............ ............ ............

www.thearyasamaj.org



5. प्रश्नानामुत्तराणि लिखत–

(i) तिलखलं कैः इन्धनौघैः पचति ?

..............................

(ii) मन्दभाग्यः तिलखलं कुत्र पचति ?

..............................

(iii) कीदृशलाङ्गलाग्रैः मन्दभाग्यः कां विलिखति ?

..............................

(iv) कस्य हेतोः सः मन्दभाग्यः वसुधां विलिखति ?

..............................

(v) मन्दभाग्यो मनुजः कः ?

..............................

6. विशेषणं विशेष्येण सह योजयत–

| | | | |
|---|---|---|---|
| (i) | वैदूर्यमय्याम् | (क) | कर्मभूमिम् |
| (ii) | चान्दनैः | (ख) | मनुजः |
| (iii) | सौवर्णैः | (ग) | स्थाल्याम् |
| (iv) | मन्दभाग्यः | (घ) | इन्धनौघैः |
| (v) | इमाम् | (ङ) | लाङ्गलाग्रैः |

7. पचति, विलिखति, कुरुते, चरति इति क्रियापदानाम् अधो लिखितवाक्येषु उपयोगं कुरुत–

(i) अस्यां कर्मभूमौ यः तपस्यां न .............................. सः मूढः।

(ii) हालिकः भूमिं स्वर्णहलेन .............................. ।

(iii) कर्पूरखण्डान् विधाय अयं मूर्खः कोद्रवाणां समन्तात् वृतिं .............................. ।

(iv) तिलखलीं यः सुवर्णपात्रे .............................. सः निर्बुद्धिरस्ति।

8. श्लोके विद्यमानसप्तम्यन्त-तृतीयान्तपदानि विलिख्य तेषां प्रकृतिविभक्तिलिङ्गानि लिखत–

.............................. .............................. .............................. ..............................

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| ............ | ............ | ............ | ............ |
| ............ | ............ | ............ | ............ |
| ............ | ............ | ............ | ............ |
| ............ | ............ | ............ | ............ |
| ............ | ............ | ............ | ............ |

**9. सन्धिं सन्धिविच्छेदं वा कुरुत–**

(i) चान्दनैः + इन्धन + ओघैः – ............

(ii) प्राप्य + इमाम् + पश्यतु – ............

(iii) वसुधामर्कतूलस्य – ............

(iv) मनुजो यस्तपो मन्दभाग्यः – ............

**10. समस्तं पदं लिखत–**

(i) सर्षपाणां खलानि – ............

(ii) मन्दारस्य कार्पासः – ............

(iii) हतं भाग्यं यस्य सः – ............

(iv) राज्ञां भूमिः – ............

**11. प्रश्नानामुत्तराणि लिखत–**

(i) हतभाग्यः कस्य खण्डान् कृत्वा समन्तात् वृतिं कुरुते ?

............

(ii) यः कर्मभूमौ तपो न चरति सः कः ?

............

(iii) मन्दभाग्यः कस्य हेतोः वसुधां विलिखति ?

............

(iv) अस्मिन् पद्ये कवेः कः सन्देशोऽस्ति ?

............

www.thearyasamaj.org



12. यथोचितं योजयत–

| | | | |
|---|---|---|---|
| (i) | स्थाल्यां वैदूर्यमय्याम् | (क) | कोद्रवाणां समन्तात् |
| (ii) | अर्कतूलस्य हेतोः | (ख) | कर्मभूमिं तपो न चरति |
| (iii) | वृतिमिह कुरुते | (ग) | तिलखलान् पचति |
| (iv) | प्राप्येमाम् | (घ) | वसुधाम् विलिखति |

13. उपयुक्तक्रियापदेन वाक्यं पूरयत–

(i) महापात्रेषु तण्डुलान् पाचकाः .................... ।

(ii) मन्दारतूलस्य निमित्तं भूमिं हलैः .................... ।

(iii) गृहस्य समन्तात् वेष्टनं .................... अयं जनः ।

(iv) यः धर्मं न .................... सः मन्दभाग्यो भवति ।

14. क्त्वान्तेन ल्यबन्तेन च प्रत्ययान्तपदेन वाक्यं पूरयत–

(i) कर्पूरस्य शकलानि .................... विक्षिपति ।

(ii) वृक्षान् कुठारैः .................... पातयति ।

(iii) धनानि बहूनि .................... अहङ्कारी भवति नरः ।

(iv) बहून ग्रन्थान् .................... एकं क्रीतवान् अहम् ।

(v) वसुधाम् .................... बीजं वपति कृषकः ।

15. विकारेऽर्थे मयट्-प्रत्ययं योजयित्वा रूपं लिखत–

(i) चन्दनस्य विकारः – ....................

(ii) सुवर्णस्य विकारः – ....................

(iii) ताम्रस्य विकारः – ....................

(iv) मृत्तिकायाः विकारः – ....................

(v) वैदूर्यस्य विकारः – ....................

www.thearyasamaj.org



**16. इदमर्थे अण् प्रत्ययं योजयित्वा पदं लिखत–**

(i) कर्पूरस्य इदम् = कर्पूर + अण् – ..........

(ii) सुवर्णस्य इमानि = सुवर्ण + अण् – ..........

(iii) रजतस्य इमे पात्रे = रजत + अण् – ..........

(iv) पृथिव्याः अयम् = पृथिवी + अण् – ..........

(v) चन्दनस्य इमे, तैः = चन्दन + अण् – ..........

**17. "प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपो मन्दभाग्यः" इत्यस्याः पङ्क्तेः आशयं संस्कृतेन लिखत–**

..........

..........

..........

..........

◆◆◆

www.thearyasamaj.org



श्लोकः

**नैवाकृतिः फलति नैव कुलं न शीलं**
**विद्यापि नैव न च यत्नकृताऽपि सेवा।**
**भाग्यानि पूर्वतपसा खलु सञ्चितानि**
**काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ 95 ॥**

पदच्छेदः

न एव आकृतिः फलति न एव कुलं न शीलम्
विद्या अपि न एव न च यत्न-कृता अपि सेवा।
भाग्यानि पूर्वतपसा खलु सञ्चितानि
काले फलन्ति पुरुषस्य यथा एव वृक्षाः ॥

पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| न, एव | अव्ययपदे | अपि | अव्ययम् |
| आकृतिः | इ. स्त्री. प्र. एक. | सेवा | आ. स्त्री. प्र. एक. |
| फलति | फल् + लट्, प्रपु. एक. | भाग्यानि | अ. नपुं. प्र. बहु. विशेष्यम् |
| न, एव | अव्ययपदे | पूर्वतपसा | स. नपुं. तृ. एक. समस्तम् |
| कुलम् | अ. नपुं. प्र. एक. | खलु | अव्ययम् |
| न | अव्ययम् | सञ्चितानि | अ. नपुं. प्र. बहु. वि. |
| शीलम् | अ. नपुं. प्र. एक. | काले | अ. पुं. सप्त. एक. |
| विद्या | आ. स्त्री. प्र. एक. | फलन्ति | फल् + लट्, प्रपु. बहु. |
| अपि | अव्ययम् | पुरुषस्य | अ. पुं. षष्ठी एक. |
| न, एव | अव्ययपदे | यथा, एव | अव्ययपदे |
| न, च | अव्ययपदे | वृक्षाः | अ. पुं. प्र. बहु. |
| यत्नकृता | आ. स्त्री. प्र. एक. समस्तम् | | |

www.thearyasamaj.org



### आकाङ्क्षा

**फलन्ति ।**

| | |
|---|---|
| कानि फलन्ति ? | भाग्यानि फलन्ति । |
| कस्य भाग्यानि फलन्ति ? | पुरुषस्य भाग्यानि फलन्ति । |
| कीदृशानि भाग्यानि फलन्ति ? | पूर्वतपसा सञ्चितानि भाग्यानि फलन्ति । |
| पूर्वतपसा सञ्चितानि भाग्यानि कथमिव फलन्ति ? | यथा वृक्षाः काले फलन्ति (तथा) पूर्वतपसा सञ्चितानि भाग्यानि फलन्ति । |
| (तर्हि) किं किं न फलति ? | आकृतिः नैव फलति, नैव कुलं, न (च) शीलं न एव विद्या अपि न च यत्नकृता सेवापि फलति । |

### अन्वयः

आकृतिः न एव फलति, न एव कुलं, न शीलम्, विद्या अपि न एव, न च यत्नकृता सेवा अपि (फलति)। पुरुषस्य पूर्वतपसा सञ्चितानि भाग्यानि खलु काले फलन्ति, यथा एव वृक्षाः (काले फलन्ति) ।

### पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| आकृतिः | शरीररूपम् | सुन्दर रूप | good personality |
| न एव | न च | नहीं | never |
| फलति | फलं निष्पादयति | फलती है | pays result |
| न एव | नापि | और न ही | & nor |
| कुलम् | वंशः | वंश | noble origin |
| न शीलम् | न सदाचारः | न सदाचार behaviour | neither good |
| विद्या अपि | शास्त्रज्ञानमपि | विद्याएँ भी | learning also |
| न एव (फलति) | न च (फलति) | नहीं (फलती है) | not (pays) |
| न च | नापि | और न ही | & not |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| यत्नकृता | प्रयासविहिता | प्रयास से की गई | tried hardly |
| सेवा अपि | परिचर्या अपि | सेवा भी | services also |
| (फलति) | (फलति) | (फल देती है) | (pays result) |
| पुरुषस्य | जनस्य | व्यक्ति की | A man's |
| पूर्वतपसा | पूर्वकृतपुण्येन | पूर्वजन्म में किये गए तप से | in his former birth by penance |
| सञ्चितानि | राशीकृतानि | सञ्चित | stored |
| भाग्यानि खलु | भागधेयानि एव | भाग्य ही | fate |
| काले | कर्मपरिपाकसमये | यथा समय | on appropriate times |
| फलन्ति | फलदायकानि भवन्ति | फल देते हैं | gives result |
| यथैव | येन प्रकारेण | जिस प्रकार | as |
| वृक्षाः | तरवः (पूर्वतः पालिताः) | (पूर्व से पालित) वृक्ष | trees |

**भावार्थः**

**संस्कृतम्–** न सुन्दराकृतिः एव फलति, न कुलं, न सदाचारः, न च विद्या, नापि च यत्नेन कृता सेवा अपि फलदाने समर्थाः भवन्ति। किन्तु मनुष्यस्य पूर्वजन्मसञ्चितपुण्यभाग्यानि एव इष्ट-फलप्रदाने समर्थानि भवन्ति, यथा रक्षिताः सेविता वा वृक्षाः यथाकालं फलानि प्रयच्छन्ति।

**हिन्दी–** न तो सुन्दर आकृति फल देती है, न अच्छा आचरण, न श्रेष्ठ कुल, न ही विद्या और न ही यत्न से की गई सेवा ही फल देने में समर्थ हैं। किन्तु मनुष्य के पूर्वजन्म के तप से सञ्चित भाग्य (कर्म-फल) ही समय पर फल देते हैं, जिस प्रकार कि सेवित व रक्षित वृक्ष समय पर फल देते हैं।

**आङ्ग्लम्–** Neither good personality pays result, nor pays the noble origin; good conduct also does not pay a reward, also the learning does not pay; nor pays the hard services. But, fate acquired by man by means of his previous penance, pays at appropriate time as do the trees.

www.thearyasamaj.org



## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

नैवाकृतिः – न + एव + आकृतिः
(न + एव → वृद्धिसन्धिः) (एव + आकृतिः → स.दी.सन्धिः)

विद्यापि – विद्या + अपि (स.दी.सन्धिः)

(ख) **समासः**

पूर्वतपसा – पूर्वं कृतं तपः, पूर्वतपः (कर्मधारयः) तेन

यत्नकृता – यत्नेन कृता (तृ. तत्पु.)

(ग) **पर्यायशब्दाः**

भाग्यम् – दैवं, दिष्टं, भागधेयम्

(ii) **छन्दः** – वसन्ततिलका-छन्दः

(iii) **अलङ्कारः** – उपमा दीपकश्च

---

## अभ्यासः – 45
### श्लोकः – 95

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

नैवाकृतिः .................... नैव .............. .............. ..................

.................... नैव न च .................................... सेवा ।

भाग्यानि ............................ खलु ....................................

.................... फलन्ति .......................... यथैव .................... ॥

2. **सन्धिं विसन्धिं वा कुरुत–**

(i) विद्या अपि न एव – ........................................................................................

www.thearyasamaj.org



(ii) यत्नकृता अपि – ..................

(iii) नैवाकृतिः फलति – ..................

(iv) यथैव नैव – ..................

3. श्लोकस्थप्रथमान्तपदानि वचनक्रमेण लिखत–

..................

..................

..................

..................

..................

..................

..................

..................

..................

4. अव्ययपदानि अधो लिखत–

..................

5. क्रियापदानि अधो लिखत–

..................

6. प्रश्नानामुत्तराणि दत्त–

(i) मनुष्यस्य आकृतिः कुलसेवादिकं किं न करोति ?

..................

(ii) भाग्यानि केन सञ्चितानि भवन्ति ?

..................

www.thearyasamaj.org



(iii) भाग्यानि केन प्रकारेण समये फलन्ति ?

..........................................................................................................................................................

(iv) भाग्यस्य केन तुलना कृता कविना ?

..........................................................................................................................................................

7. पदपरिचयं दत्त–

(i) आकृतिः – ..........................................................................................

(ii) यत्नकृता – ..........................................................................................

(iii) पूर्वतपसा – ..........................................................................................

(iv) फलन्ति – ..........................................................................................

(v) यथैव – ..........................................................................................

8. सन्धिं सन्धिविच्छेदं वा कुरुत–

(i) सेवाप्यधिका – ..................................................................

(ii) नैवाकारः – ..................................................................

(iii) न + अपि + आकृतिः + फलति – ..................................................................

(iv) विच्छिन्ने लक्ष्मीः – ..................................................................

9. विग्रहवाक्यं लिखत–

(i) कष्टकृता – ..........................................................................................

(ii) देवपूजकः – ..........................................................................................

10. फल्-धातोः लटि रूपाणि लिखत–

प्रपु. ........................ ........................ ........................

मपु. ........................ ........................ ........................

उपु. ........................ ........................ ........................

www.thearyasamaj.org



**11. समाधत्त–**

(i) **मनुष्यस्य किं किं न फलति ?**

........................................................................................................

(ii) **पुरुषस्य कानि फलन्ति ?**

........................................................................................................

(iii) **काले के फलं यच्छन्ति ?**

........................................................................................................

**12. किं शुद्धं ✓ किमशुद्धम् ✗ इति चिह्नेन प्रदर्शयत–**

(i) मनुष्यजीवने आकृतिः फलदायिका भवति। ☐

(ii) कुलेन मनुजः पूजितो भवति। ☐

(iii) सत्कर्मणा मनुजः पूजितो भवति। ☐

(iv) मनुष्यजीवने आकृतिः न फलति। ☐

(v) दुष्कर्मकृतभाग्यानि शुभं फलं ददति। ☐

(vi) सत्कर्मकृतभाग्यानि शुभं फलं यच्छन्ति। ☐

(vii) पूर्वजन्मकृतकर्माणि अस्मिन् जीवने फलन्ति। ☐

(viii) अधुनैव कृतानि कर्मणि जीवने फलन्ति। ☐

**13. अधोनिर्दिष्ट-अव्ययपदैः वाक्यानि रचयत–**

(i) नैव – ........................................................

(ii) अपि – ........................................................

(iii) यथैव – ........................................................

(iv) एवम् – ........................................................

(v) तथापि – ........................................................

(vi) तथैव – ........................................................

(vii) नमः – ........................................................

www.thearyasamaj.org



14. फलधातुरूपैः (लटि) वाक्यं पूरयत–

(i) मम कर्म अधुना न .................... ।

(ii) द्वे अपि कर्मणी सुकृतदुष्कृते .................... ।

(iii) शुभानि अशुभानि कर्माणि .................... अवश्यम् ।

(iv) त्वं कुत्र .................... ।

(v) रे, आम्रवृक्ष ! त्वं .................... ।

15. अस्य श्लोकस्यार्थं संस्कृतेन लिखत–

....................................................................................................

....................................................................................................

....................................................................................................

....................................................................................................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**मज्जत्वम्भसि यातु मेरुशिखरं शत्रूञ्जयत्वाहवे**
**वाणिज्यं कृषिसेवने च सकला विद्याः कलाः शिक्षताम् ।**
**आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परं**
**नाऽभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कृतः ॥ 96 ॥**

**पदच्छेदः**

मज्जतु अम्भसि यातु मेरुशिखरम् शत्रून् जयतु आहवे
वाणिज्यम् कृषि-सेवने च सकलाः विद्याः कलाः शिक्षताम् ।
आकाशम् विपुलम् प्रयातु खगवत् कृत्वा प्रयत्नम् परम्
न अभाव्यम् भवति इह कर्मवशतः भाव्यस्य नाशः कुतः ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| मज्जतु | मस्ज् + लोट्, प्रपु. एक. | आकाशम् | अ. नपुं. द्विती. एक. विशेष्यम् |
| अम्भसि | स. नपुं. सप्त. एक. | विपुलम् | अ. नपुं. द्विती. एक. वि. |
| यातु | या + लोट्, प्रपु. एक. | प्रयातु | प्र✓या + लोट्, प्रपु. एक. |
| मेरुशिखरम् | अ. नपुं. द्विती. एक. | खगवत् | अव्ययम्, समस्तम् |
| शत्रून् | उ. पुं. द्विती. बहु. | कृत्वा | अव्ययम् |
| जयतु | जि + लोट्, प्रपु. एक. | प्रयत्नम् | अ. पुं. द्विती. एक. विशेष्यम् |
| आहवे | अ. नपुं. सप्त. एक. | परम् | अ. पुं. द्विती. एक. वि. |
| वाणिज्यं | अ. नपुं. द्विती. एक. | न | अव्ययम् |
| कृषिसेवने | अ. नपुं. सप्त. एक. | अभाव्यम् | अ. नपुं. प्र. एक. |
| च | अव्ययम् | भवति | भू + लट्, प्रपु. एक. |
| सकलाः | आ. स्त्री. द्विती. बहु. वि. | इह | अव्ययम् |
| विद्याः | आ. स्त्री. द्विती. एक. विशेष्यम् | कर्मवशतः | तसिलन्तम् अव्ययम्, समस्तम् |
| कलाः | आ. स्त्री. द्विती. बहु. | भाव्यस्य | अ. नपुं. षष्ठी एक. |
| शिक्षताम् | शिक्ष् + लोट्, प्रपु. एक. | नाशः | अ. पुं. प्र. एक. |
| | आत्मनेपदम् | कुतः | तसिलन्तम् अव्ययम् |

www.thearyasamaj.org



## आकाङ्क्षा

न भवति ?

| | |
|---|---|
| किं न भवति ? | अभाव्यं न भवति। |
| कस्य नाशः न भवति ? | भाव्यस्य नाशः कुतः। (भाव्यस्य नाशः न भवति) |
| किं करोतु ? (तथापि ...) | अम्भसि मज्जतु (तथापि ...) |
| अपि च किं करोतु ? (तथापि ...) | आहवे शत्रून् जयतु (तथापि ...) |
| किं शिक्षताम् ? (तथापि ...) | वाणिज्यं, कृषिसेवने, सकलाः विद्याः, कलाः च शिक्षताम् (तथापि ...) |
| अपि च कुत्र प्रयातु ? (तथापि ...) | आकाशं प्रयातु (तथापि ...) |
| किं कृत्वा कथं कीदृशम् आकाशं प्रयातु ? (तथापि ...) | परं प्रयत्नं कृत्वा खगवत् विपुलम् आकाशं प्रयातु। (तथापि ...) |
| (तथापि) किम् ? | (तथापि) इह अभाव्यं न भवति। |
| इह कुतः अभाव्यं न भवति ? | इह कर्मवशतः अभाव्यं न भवति। |

## अन्वयः

(मनुष्यः) अम्भसि मज्जतु, मेरुशिखरं यातु, आहवे शत्रून् जयतु, वाणिज्यं, कृषिसेवने, सकलाः विद्याः कलाः च शिक्षताम्, परं प्रयत्नं कृत्वा खगवत् विपुलम् आकाशं प्रयातु, (तथापि) इह कर्मवशतः अभाव्यं न भवति, भाव्यस्य कुतः नाशः!

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| (मनुष्यः) | (जनः) | (मनुष्य) | (man) |
| अम्भसि | जले | जल में | in water |
| मज्जतु | स्तम्भनक्रियया मग्नो भवेत् | स्तम्भनादि क्रिया द्वारा निमग्न हो | may submerge |
| मेरुशिखरम् | सुमेरुपर्वतशृङ्गं | सुमेरु पर्वत की चोटी पर | on peak of *Meru* mountain |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| यातु | गच्छतु | जाये | climb |
| आहवे | युद्धे | युद्ध में | in battle |
| शत्रून् | रिपून् | शत्रुओं को | enemies |
| जयतु | विजयताम् | जीते | overcome |
| वाणिज्यं | क्रयविक्रयादि व्यापारं | वाणिज्य | business |
| कृषिसेवने | कृषिकर्म सेवां च | कृषिकार्य या सेवा कार्य आदि | agriculture or service etc. |
| सकलाः | सम्पूर्णाः | सभी | all |
| विद्याः | शास्त्राणि | विद्याएँ | learning |
| कलाश्च | तथा इतिहासादि-चतुष्षष्टिकलाः | और चौंसठ कलाएँ | and sixty-four arts |
| शिक्षताम् | अभ्यस्यतु | सीखे | learns |
| परम् | उत्कृष्टम् | उत्कृष्ट | superior |
| प्रयत्नं | प्रयासं | प्रयास | efforts |
| कृत्वा | विधाय | करके | doing |
| खगवत् | पक्षिवत् | पक्षियों के समान | like birds |
| विपुलम् | विस्तृतम् | विस्तृत | large/vast |
| आकाशम् | नभोमण्डलम् | आकाश में | in sky |
| प्रयातु | गच्छतु | उड़े | fly |
| (तथापि) | (पुनरपि) | (फिर भी) | (still that) |
| इह | अस्मिन् संसारे | इस लोक में | in this world |
| कर्मवशतः | कृतक्रियानुरोधतः | किए गए कर्म के अनुसार | according to fate |
| अभाव्यम् | न भवितुं योग्यम् | जो होने योग्य नहीं है वह | which is not fated to happen |
| न भवति | न जायते | नहीं होता है | shall never happen |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| भाव्यस्य | अवश्यं भाविनः | अवश्यंभावी फल का | which is destined to happen |
| कुतः | कस्मात् भवेत् | कैसे होगा | how it will happen |
| नाशः | विनाशः | विनाश | destruction |

## भावार्थः

**संस्कृतम्–** मनुष्यः स्तम्भनादिना जले मग्नो भवेत्, सुमेरुशृङ्गं गच्छेत्, युद्धे शत्रून् पराजयेत्, वाणिज्यं कृषिं सेवां चतुर्दशविद्याः = चतुरो वेदान्, अङ्गानि व्याकरणन्यायमीमांसाज्योतिषकल्प-निरुक्तशिक्षादिनि पुराणानि धर्मशास्त्रञ्चेति चतुर्दशविद्याः, कलाः = इतिहासागमप्रभृतिचतुष्षष्टिः कलाः शिक्षताम्, उत्कृष्टं प्रयत्नं विधाय विस्तृते गगने विहगतुल्यं गच्छेत्, पुनरपि अस्मिन् लोके कर्मानुरोधेन अभाव्यस्य फलस्य प्राप्तिं न करोति, भाव्यस्य फलस्य तु नाशः कथङ्कारं भवेत्।

**हिन्दी–** मनुष्य स्तम्भनादि क्रिया द्वारा जल में निमग्न हो जाये, मेरुपर्वत की चोटी पर जाये, युद्ध में शत्रुओं को जीत ले अथवा व्यापार, कृषि सेवा, चौदह विद्याएँ और चौंसठ कलाएँ सीख ले, बहुत प्रयास कर पक्षियों की भाँति विस्तृत आकाश में उड़े, फिर भी कर्म के कारण नहीं होने वाला फल नहीं ही मिलता है, और जो होने वाला फल है, उसका नाश भी नहीं होता है।

**आङ्ग्लम्–** A man may dive into water, climb on the peak of *Meru* mountain, overcome enemies in battle, may learn trade, agriculture, service and all other arts, may fly like birds with great effort in large sky, still that, due to fate, which is not fated to happen shall never happen; & which is destined to happen in this world can not be destroyed.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

मज्जत्वम्भसि – मज्जतु + अम्भसि (यण्-सन्धिः)

शत्रूञ्जयत्वाहवे – शत्रून् + जयतु + आहवे (अनुनासिक-यण्-सन्धिः) यथा– तस्मिञ्जयतीत्यागतः

नाभाव्यम् – न + अभाव्यम् (स.दी.सन्धिः)

भवतीह – भवति + इह (स.दी.सन्धिः)

www.thearyasamaj.org



मेरुशिखरम् – मेरोः शिखरम् (षष्ठी-तत्पु.)
कृषिसेवने – कृषिश्च सेवनम् च इति (द्वन्द्वसमासः)
कर्मवशतः – कर्मणः वशः (षष्ठी तत्पु.) तस्मात्

(ख) **कृदन्तः**

कृत्वा – कृ + क्त्वा = कृत्वा (क्त्वान्तमव्ययं भवति)
प्रयत्नम् – प्र√यत् + नङ् = प्रयत्नः, तम्।
अभाव्यम् – भवितुं योग्यम् - भू + ण्यत् = भाव्यम्, न भाव्यम् अभाव्यम् (नञ् समासः)
खगवत् – खगेन तुल्यः – खग + वतिः = खगवत्

(ख) **पर्यायशब्दाः**

मेरुः – सुमेरुः, हेमगिरिः, हेमाद्रिः
अम्भः – जलम्, वारि, पानीयम्, अम्बु
आहवः – युद्धम्, सङ्गरः, सङ्ग्रामः, अभ्याजित्

(ii) **छन्दः** – शार्दूलविक्रीडितम्

**अवधेयम्**

| | | | |
|---|---|---|---|
| प्रपु. | मज्जतु, मज्जतात् | मज्जताम् | मज्जन्तु |
| मपु. | मज्ज, मज्जतात् | मज्जतम् | मज्जत |
| उपु. | मज्जानि | मज्जाव | मज्जाम |

## अभ्यासः – 46
## श्लोकः – 96

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

मज्जत्वम्भसि .................... मेरुशिखरं ....................

.................... कृषिसेवने च .................... .................... कलाः .................... ।

www.thearyasamaj.org



आकाशं .................. .................. खगवत् .............. ..............परं
ना.............. भवतीह ..............तो .............. नाशः .............. ॥

2. सन्धिं विसन्धिं वा कुरुत–

(i) मज्जतु अम्भसि – ..............................

(ii) शत्रून् जयतु आहवे – ..............................

(iii) नाभाव्यं भवतीह – ..............................

(iv) आकाशं विपुलं प्रयातु – ..............................

3. प्रथमान्तपदानि अव्ययपदानि च अधो लिखत–

..............................................................................

4. द्वितीयान्तपदानि वचनक्रमेण अधो लिखत–

..............................................................................

..............................................................................

..............................................................................

..............................................................................

..............................................................................

..............................................................................

..............................................................................

..............................................................................

..............................................................................

..............................................................................

5. षष्ठ्यन्तसप्तम्यन्तपदानि अधो लिखत–

..............................................................................

www.thearyasamaj.org



6. तिङन्तक्रियापदानि लिखत–

..........................................................................

7. प्रश्नानामुत्तराणि दत्त–

(i) इह अभाव्यं कस्मान्न भवति ?

..........................................................................

(ii) भाव्यस्य च नाशः कथं न भवति ?

..........................................................................

(iii) विद्याः कति सन्ति ?

..........................................................................

(iv) कलाः कति मताः ?

..........................................................................

8. विशेषणपदानि अग्रे लिखत–

(i) .............................. – आकाशम्

(ii) .............................. – विद्याः

(iii) .............................. – प्रयत्नम्

9. यथोचितपदेन वाक्यं पूरयत–

| यातु, आहवे, शिक्षताम्, अभाव्यम् |
|---|

(i) सः मेरुशिखरं .............................. ।

(ii) इह संसारे .............................. न भवति ।

(iii) भवान् सकलाः विद्याः .............................. ।

(iv) पराक्रमेण सः .............................. शत्रून् जयति ।

www.thearyasamaj.org



10. 'भाव्यस्य नाशः कुतः' इत्यस्य भावार्थं लिखत–

........................................................................

........................................................................

........................................................................

11. सन्धिं विसन्धिं वा कुरुत–

(i) निमज्जतु + अत्र – ..............................

(ii) भवतु + आगमनम् – ..............................

(iii) दधीह – ..............................

(iv) नाभाव्यम् – ..............................

12. वति-प्रत्ययान्तेन तसिल्-प्रत्ययान्तेन रिक्तस्थानं पूरयत–

(i) मनुष्याः आकाशे .................. उड्डीयन्ते । (पादविहग)

(ii) अयं जनः .................. आचरति । (साधु)

(iii) .................. त्वमद्य आगतः । (किम् + तसिल्)

(iv) .................. सर्वाणि भूतानि जायन्ते .................. अहमपि । (यत्, तत् + तसिल्)

(v) त्वं कस्मात् .................. आगच्छसि । (ग्राम + तसिल्)

13. जि-धातोः लोटि रूपाणि पूरयत–

| | | | |
|---|---|---|---|
| प्रपु. | जयतु | .................. | .................. |
| मपु. | .................. | जयतम् | .................. |
| उपु. | .................. | जयाव | जयाम |

14. यथोचितक्रियापदेन योजयत–

| | | | |
|---|---|---|---|
| (i) | अम्भसि | (क) | भवति |
| (ii) | आहवे | (ख) | प्रयातु |
| (iii) | सकलाः कलाः | (ग) | मज्जतु |

www.thearyasamaj.org



(iv) आकाशं विपुलम् (घ) जयतु

(v) नाभाव्यम् (ङ) शिक्षताम्

15. पदपरिचयं दत्त–

(i) आहवे – ..........

(ii) कृषिसेवने – ..........

(iii) खगवत् – ..........

(iv) कर्मवशतः – ..........

(v) भाव्यस्य – ..........

16. अधः कोष्ठके प्रदत्तपदानां सहाय्येन वाक्यानि रचयत–

| |
|---|
| अम्भसि, युद्धे, शिक्षताम्, विपुले आकाशे, प्रयातु, पोतः, शत्रून्, निमज्जतु, जयतु, रामः, सकलाः विद्याः, भवान्, खगाः स्वैरम् |

..........

..........

..........

..........

17. मस्जधातोः लोटः रूपैः वाक्यानि पूरयत–

(i) संसारसागरे यूयम् .......... ।

(ii) वयं कस्मिन् सरोवरे .......... ।

(iii) ते रक्षिता वा भवन्तु .......... वा ।

(iv) त्वमत्रैव जले .......... ।

(v) अहं कथमत्र कूपे .......... ।

18. जिधातोः लोट्लकारस्य रूपैः वाक्यानि पूरयत–

(i) महाराज ! भवान् .......... ।

www.thearyasamaj.org



(ii) एतौ नृपौ .................... इति मे वचः ।

(iii) त्वमस्यां परीक्षायां .................... वा ।

(iv) यूयं सर्वे क्रीडायां .................... ।

(v) अहं नूनमेव .................... ।

(vi) एते सर्वे सभापण्डिताः .................... ।

**19. विग्रहवाक्यं प्रदर्शयत–**

(i) मेरुशिखरे – ....................

(ii) कृषिसेवने – ....................

(iii) कार्यवशगः – ....................

(iv) विचार्यकारी – ....................

(v) धनापहारकः – ....................

(vi) मृत्तिकामयम् – ....................

◆◆◆

www.thearyasamaj.org



**श्लोकः**

**वने रणे शत्रुजलाग्निमध्ये**
**महार्णवे पर्वतमस्तके वा।**
**सुप्तं प्रमत्तं विषमस्थितं वा**
**रक्षन्ति पुण्यानि पुरा कृतानि ॥ 97 ॥**

**पदच्छेदः**

वने रणे शत्रु-जल-अग्नि-मध्ये
महा-अर्णवे पर्वत-मस्तके वा।
सुप्तम् प्रमत्तम्, विषम-स्थितम् वा
रक्षन्ति पुण्यानि पुराकृतानि ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| वने | अ. नपुं. सप्त. एक. | प्रमत्तम् | अ. पुं. द्विती. एक. वि. |
| रणे | अ. पुं./नपुं. सप्त. एक. | विषमस्थितम् | अ. पुं. द्विती. एक. वि. समस्तम् |
| शत्रुजुलाग्निमध्ये | अ. पुं./नपुं. सप्त. एक., समस्तम् | वा | अव्ययम् |
| महार्णवे | अ. पुं. सप्त. एक. समस्तम् | रक्षन्ति | रक्ष् + लट्, प्रपु. बहु. |
| पर्वतमस्तके | अ. पुं. सप्त. एक. समस्तम् | पुण्यानि | अ. नपुं. प्र. बहु. |
| वा | अव्ययम् | पुरा | अव्ययम् |
| सुप्तम् | अ. पुं. द्विती. एक. वि. क्तान्तम् | कृतानि | अ. नपुं. प्र. बहु. वि. समस्तम् |

**आकाङ्क्षा**

**रक्षन्ति।**

कानि रक्षन्ति ? पुण्यानि रक्षन्ति।

www.thearyasamaj.org



| | |
|---|---|
| कीदृशानि पुण्यानि रक्षन्ति ? | पुरा कृतानि पुण्यानि रक्षन्ति। |
| पुरा कृतानि पुण्यानि कं रक्षन्ति ? | पुरा कृतानि पुण्यानि सुप्तं प्रमत्तं विषम-स्थितं वा (जनं) रक्षन्ति। |
| पुण्यानि पुरा कृतानि सुप्तं प्रमत्तं विषमस्थितं वा (जनं) कुत्र-कुत्र रक्षन्ति ? | पुण्यानि पुरा कृतानि सुप्तं प्रमत्तं विषमस्थितं वा (जनं) वने रणे-शत्रु-जल-अग्नि-मध्ये महार्णवे पर्वतमस्तके वा रक्षन्ति। |

## अन्वयः

पुरा कृतानि पुण्यानि वने रणे शत्रुजलाग्निमध्ये, महार्णवे पर्वतमस्तके वा सुप्तं, प्रमत्तं, विषमस्थितं वा (जनं) रक्षन्ति।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| पुरा कृतानि | पूर्वं (पूर्वजन्मनि) विहितानि | पूर्व जन्म में किए गए | acquired in previous life |
| पुण्यानि | सुकृतानि | पुण्य | virtuous acts |
| वने | अरण्ये | वन में | in forest |
| रणे | युद्धे | युद्ध में | in battle |
| शत्रुजलाग्निमध्ये | अरिवारिवह्निमध्ये | शत्रु, जल और अग्नि के मध्य | in the midst of enemy, water & fire |
| महार्णवे | महासागरे | महासागर में | in ocean |
| पर्वतमस्तके वा | अथवा पर्वतशिखरे | या गिरिशिखर पर | or on peak of mountain |
| सुप्तम् | शयितम् | सोये हुए | be asleep |
| प्रमत्तम् | असावधानम् | असावधान | careless |
| विषमस्थितं वा | संकटे पतितं वा | या संकटग्रस्त | or in danger |
| (जनम्) | (मनुष्यम्) | (मनुष्य की) | (man's) |
| रक्षन्ति | पान्ति | रक्षा करते हैं | protect |

www.thearyasamaj.org



## भावार्थः

**संस्कृतम्–** पूर्वजन्मकृतानि पुण्यानि वने, युद्धे, शत्रुमध्ये, जलमध्ये, अग्निमध्ये, महासागरे पर्वतशिखरे वा निद्रितम् असावधानं सङ्कटपतितं वा जनं रक्षन्ति।

**विशेषः–** सङ्कटापन्नो जनः पूर्वकृतपुण्यप्रभावात् रक्षितो भवति। अतः अस्माभिः पुण्यानि कर्तव्यानि इति आशयः।

**हिन्दी–** पूर्व जन्म में किये गए अच्छे कार्य (पुण्य) वन में, युद्ध में, शत्रु, जल और अग्नि में, महासागर में या पर्वत की चोटी पर सोये हुए असावधान या संकट-ग्रस्त मनुष्य की रक्षा करते हैं।

**आङ्ग्लम्–** Merits acquired in previous life (in former birth) protect man in a forest, in a battle, in the midst of enemy, water and fire or in a big ocean or on the top of a mountain whether he be asleep, careless or in dangerous condition.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) समासः

| | | |
|---|---|---|
| शत्रुजलाग्निमध्ये | – | शत्रवश्च जलानि च अग्नयश्च इति शत्रुजलाग्नयः (द्वन्द्वसमासः) तेषां मध्ये शत्रुजलाग्निमध्ये (षष्ठी तत्पु.) (द्वन्द्वादौ द्वन्द्वान्ते श्रूयमाणस्य प्रत्येकशब्देन अन्वयो भवति। अतः शत्रुमध्ये जलमध्ये अग्निमध्ये इत्यर्थो भवति।) |
| महार्णवे | – | महान् चासौ अर्णवश्च महार्णवः, (कर्मधारयः) तस्मिन् यथा– महावनम्, महापुरुषः, महादेवः। |
| पर्वतमस्तके | – | पर्वतस्य मस्तकम् पर्वतमस्तकम् (षष्ठी तत्पु.) तस्मिन्। |
| विषमस्थितम् | – | विषमे स्थितः विषमस्थितः (सप्त. तत्पु.) तम् यथा– वनस्थितः, जलस्थितः |
| पुराकृतानि | – | पुरा कृतानि (केवलसमासः) यथा- पूर्वजन्मनि |

www.thearyasamaj.org



(ख) कृदन्तः

| | | |
|---|---|---|
| सुप्तम् | – | स्वप् + क्तः । धातोः वस्य सम्प्रसारणम् उः । यथा– वप् + क्तः = उप्तम् । वच् + क्तः = उक्तम् । |
| प्रमत्तम् | – | प्र√मद् + क्तः = प्रमत्तः, तम् । न ध्याख्यापॄमूर्छिमदाम् इति क्तः तकारस्य नत्वनिषेधः । |
| स्थितम् | – | स्था + क्तः, धातोराकारस्य इत्वम् । द्वितीयैकवचने रूपम् । |
| रक्षन्ति | – | रक्ष् + लट्, प्रपु. बहुवचनम् । |

(ग) पर्यायशब्दाः

| | | |
|---|---|---|
| रणम् | – | संग्रामः, युद्धम्, सङ्गरम्, आहवः |
| महार्णवः | – | महासागरः, महासमुद्रः, महोदधि |
| वनम् | – | अटवी, अरण्यं, विपिनं, काननं, गहनम् |
| पुण्यम् | – | धर्मः, श्रेयः, सुकृतं, वृषः |

(ii) छन्दः – उपजाति-छन्दः

---

## अभ्यासः – 47

### श्लोकः – 97

1. श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–

वने ............ ....................मध्ये

.................... पर्वतमस्तके ............ ।

सुप्तं .................... .................... वा

.................... पुण्यानि .................... ॥

www.thearyasamaj.org



2. सन्धिं विसन्धिं वा कुरुत–

(i) महार्णवे – ..................

(ii) सुप्तम् प्रमत्तम् विषस्थितम् वा – ..................

3. प्रश्नानामुत्तराणि दत्त–

(i) **शत्रुजलाग्निमध्ये जनं कः रक्षति ?**

..................

(ii) **महार्णवे पर्वतमस्तके वा विषमस्थितो जनः कैः रक्ष्यते ?**

..................

(iii) **पूर्वजन्मकृतानि पुण्यानि अन्यत्र क्व जनं रक्षन्ति ?**

..................

4. वाक्ये प्रयोगं कुरुत–

(i) महार्णवे – ..................

(ii) वने – ..................

(iii) पुण्यानि – ..................

(iv) सुप्तम् – ..................

(v) रक्षन्ति – ..................

5. विभक्तिवचनलिङ्गनिर्देशं कुरुत–

(i) जलाग्निमध्ये – ..................

(ii) प्रमत्तम् – ..................

(iii) पुराकृतानि – ..................

(iv) विषमस्थितम् – ..................

www.thearyasamaj.org



6. विग्रहवाक्यं लिखत–

(i) वनाग्निमध्ये – ........................

(ii) महासागरान् – ........................

(iii) पूर्वजन्मकृतानि – ........................

(iv) गिरिशृङ्गे – ........................

7. क्तप्रत्ययान्तं रूपं लिखत–

(i) प्रच्छ् + क्तः – ........................

(ii) वच् + क्तः – ........................

(iii) हन् + क्तः – ........................

(iv) यज् + क्तः – ........................

(v) रम् + क्तः – ........................

(vi) स्वप् + क्तः – ........................

(vii) मद् + क्तः – ........................

8. श्लोकस्यार्थं संस्कृतेन लिखत–

........................

........................

........................

........................

9. अत्र कविः कस्य महत्वं प्रतिपादयति ?

........................

10. सप्तम्यन्तपदेन रिक्तस्थानं पूरयत–

(i) वनवासिनो जनाः ........................ वसन्ति। (वनं)

(ii) असौ बालकः ........................ निमग्नो जातः। (जलं)

www.thearyasamaj.org



(iii) होलिका ............................ दग्धा जाता। (अग्निः)
(iv) पोतः ............................ तरन् गच्छति। (वारिः)
(v) सैनिकाः हिमालयपर्वतरक्षार्थं ............................ तिष्ठन्ति। (हिमालयपर्वतः)

**11. क्तान्तेन पदेन वाक्यं पूरयत–**

(i) ............................ जनं न जागरयतु। (स्वप्)
(ii) ............................ मनुष्यः किमपि लपति। (मद्)
(iii) सः छात्रः अत्रैव मया ............................ । (वच्)
(iv) ............................ सः प्रत्युत्तरं दत्तवान्। (प्रच्छ्)
(v) दुर्गापूजा शारदनवरात्रे ............................ । (यज्)

**12. रेखाङ्कितपदानां पर्यायशब्देन वाक्यं पूरयत–**

(i) <u>महार्णवे</u> – ............................ जलजन्तवो विद्यन्ते।
(ii) <u>रणे</u> – ............................ भारतं जेतुं न कोऽपि देशः समर्थः।
(iii) <u>वनम्</u> – ............................ गच्छतु भवानद्य।
(iv) <u>पुण्यानि</u> – ............................ अस्मान् रक्षन्ति।

**13. विग्रहवाक्यं समस्तं पदं वा लिखत–**

(i) शत्रुजलाग्निमध्ये – ............................
(ii) महार्णवे – ............................
(iii) पर्वतमस्तके – ............................
(iv) विषमे स्थितः, तम् – ............................
(v) वनस्य अग्निः, तस्य मध्ये – ............................
(vi) पूर्वजन्मनि कृतं पापं – ............................
(vii) महान् चासौ सागरश्च – ............................
(viii) महती चासौ देवी च – ............................

◆◆◆

www.thearyasamaj.org



## श्लोकः

भीमं वनं भवति तस्य पुरं प्रधानं
सर्वो जनः स्वजनतामुपयाति तस्य।
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य॥ 98 ॥

## पदच्छेदः

भीमम् वनम् भवति तस्य पुरम् प्रधानम्
सर्वः जनः स्वजनताम् उपयाति तस्य।
कृत्स्ना च भूः भवति सन्निधि-रत्न-पूर्णा
यस्य अस्ति पूर्वसुकृतम् विपुलम् नरस्य॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| भीमम् | अ. नपुं. प्र. एक. वि. | कृत्स्ना | आ. स्त्री. प्र. एक. वि. |
| वनम् | अ. नपुं. प्र. एक. विशेष्यम् | च | अव्ययम् |
| भवति | भू + लट्, प्रपु. एक. | भूः | ऊ. स्त्री. प्र. एक. विशेष्यम् |
| तस्य | तद्- द. पुं. षष्ठी एक. सर्व. | भवति | भू + लट्, प्रपु. एक. |
| पुरम् | अ. नपुं. प्र. एक. विशेष्यम् | सन्निधि-रत्न-पूर्णा | आ. स्त्री. प्र. एक. वि. |
| प्रधानम् | अ. नपुं. प्र. एक. वि. | | समस्तम् |
| सर्वः | सर्व.– अ. पुं. प्र. एक. वि. | यस्य | यद्– सर्व. पुं. षष्ठी एक. |
| जनः | अ. पुं. प्र. एक. विशेष्यम् | अस्ति | अस् + लट्, प्रपु. एक. |
| स्वजनताम् | आ. स्त्री. द्विती. एक. | पूर्वसुकृतम् | अ. नपुं. प्र. एक. विशेष्यम् |
| उपयाति | उप√या + लट्, प्रपु. एक. | विपुलम् | अ. नपुं. प्र. एक. वि. |
| तस्य | तद्- द. पुं. षष्ठी एक. सर्व. | नरस्य | अ. पुं. षष्ठी एक. |

www.thearyasamaj.org



## आकाङ्क्षा

यस्य अस्ति।

| | |
|---|---|
| यस्य कस्य अस्ति ? | यस्य नरस्य अस्ति। |
| यस्य नरस्य किम् अस्ति ? | यस्य नरस्य पूर्वसुकृतम् अस्ति। |
| यस्य नरस्य पूर्वसुकृतं कीदृशम् अस्ति ? | यस्य नरस्य पूर्वसुकृतं विपुलम् अस्ति। |
| यस्य नरस्य पूर्व-सुकृतं विपुलं तस्य किम् ? | यस्य नरस्य पूर्वसुकृतं विपुलं तस्य भीमं वनम् (अपि) प्रधानं पुरं भवति। |
| अन्यच्च तस्य किम् भवति ? | तस्य सर्वः जनः स्वजनताम् उपयाति। |
| अन्यच्च तस्य किम् भवति ? | कृत्स्ना च भूः तस्य (कृते) सन्निधिरत्नपूर्णा भवति। |

## अन्वयः

यस्य नरस्य विपुलं पूर्वसुकृतम् अस्ति, तस्य भीमं वनम् (अपि) प्रधानं पुरं भवति। तस्य सर्वः जनः स्वजनताम् उपयाति, तस्य कृत्स्ना च भूः सन्निधिरत्नपूर्णा भवति।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| यस्य | एतस्य | जिस | which |
| नरस्य | मनुजस्य | मनुष्य का | man's |
| विपुलम् | प्रचुरम् | बहुत अधिक | vast amount |
| पूर्वसुकृतम् | पूर्वजन्मार्जितपुण्यम् | पूर्व जन्म का पुण्य | merits of previous life |
| अस्ति | विद्यते | है | is |
| तस्य | तस्य पुण्यवतो जनस्य | उस पुण्यवान के लिए | for that pious person |
| भीमम् | घोरम् | भयानक | terrible |
| वनम् (अपि) | अटवी (अपि) | वन (भी) | forest (also) |
| प्रधानम् | मुख्यम् | प्रधान | main |
| पुरम् | नगरम् | नगर | city |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| भवति | जायते | हो जाता है | becomes |
| तस्य | पूर्वसुकृतस्य | उसके लिए | for him |
| सर्वः | समः | सभी | all |
| जनः | मनुष्यः | लोग | people |
| स्वजनताम् | आत्मीयजनताम् | आत्मीय जन | friends |
| उपयाति | उपगच्छति | बन जाते हैं | become |
| तस्य | नरस्य | उस जन के लिए | for that person |
| कृत्स्ना च भूः | सकला च पृथिवी | और सारी भूमि | and whole earth |
| सन्निधि-रत्नपूर्णा | श्रेष्ठनिधिभिः | श्रेष्ठ निधि और | full of good jewels/ |
| | रत्नैश्च पूर्णा | रत्नों से पूर्ण | treasure & gems |
| भवति | जायते | हो जाती है | becomes |

## भावार्थः

**संस्कृतम्–** यस्य नरस्य पूर्वजन्मार्जितानि पुण्यानि भवन्ति तस्य कृते भयङ्करं वनमपि प्रधानं नगरं (राजधानी) भवति। सर्वे जनाः तस्य आत्मीयजनाः भवन्ति, सम्पूर्णा चेयं भूमिः तस्य कृते पद्मादिनिधिभिः परिपूर्णा रत्नैश्च पूर्णा भवति।

**विशेषः–** पुण्यात्मनां कृते सर्वाणि प्रतिकूलानि अपि अनूकूलानि एव भवन्ति।

**हिन्दी–** जिस मनुष्य का पूर्वजन्म कृत पुण्य है, उसके लिए भयानक वन प्रधान नगर हो जाता है, सभी लोग उसके आत्मीयजन बन जाते हैं, और सम्पूर्ण भूमि श्रेष्ठ निधियों तथा रत्नों से परिपूर्ण हो जाती है।

**आङ्ग्लम्–** For a man who has acquired a vast amount of previous life merits and virtuous deeds the terrible forest becomes the main city, all people become firendly to him, and the whole earth becomes full of good gems & jewels.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

भीमम् + वनम् + भवति – (उभयत्र अनुस्वारसन्धिः) यथा– पुरम् + प्रधानम् + भवति = पुरं प्रधानं भवति।

www.thearyasamaj.org



| | | |
|---|---|---|
| सर्वो जनः स्वजनताम् | – | सर्वः + जनः + स्वजनताम् (विसर्गसन्धिः) |
| सन्निधिः | – | सत् + निधिः (जश्त्वसन्धिः) यथा– तत् + न = तन्न) |
| यस्यास्ति | – | यस्य + अस्ति (स.दी.सन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| स्वजनसमूहः | – | स्वस्य जनाः स्वजनाः (षष्ठी तत्पु.) स्वजनानां समूहः |
| सन्निधिरत्नपूर्णा | – | सन्तश्च ते निधयः सन्निधयः (कर्मधारयः) सन्निधयश्च रत्नानि च इति सन्निधिरत्नानि (द्वन्द्वः) तैः पूर्णाः (तृ.तत्पु.) |
| पूर्वसुकृतम् | – | पूर्वस्य (पूर्व जन्मनः) सुकृतम् (षष्ठी तत्पु.) यथा– पूर्वपुण्यम् |

**(ख) पर्यायशब्दाः**

| | | |
|---|---|---|
| भीमः | – | घोरः, भयङ्करः |
| पुरम् | – | नगरम्, पूः |
| कृत्स्ना | – | सम्पूर्णा, सकला, समग्रा |

**(ii) छन्दः** – वसन्ततिलका छन्दः

---

## अभ्यासः – 48
### श्लोकः – 98

**1. श्लोकनुसारम् उचितेन पदेन पदच्छेदं पूरयत–**

भीमं .................. .................. तस्य .................. ..................

.................. जनः स्वजनताम् .................. तस्य ।

www.thearyasamaj.org



कृत्स्ना .................. भूर्भवति .................. ..................................................

.................. .................. पूर्वसुकृतं .................................................. नरस्य ॥

2. सन्धिं विसन्धिं वा लिखत–

(i) सर्वः जनः स्वजनताम् उपयाति – ..................................................

(ii) भीमम् वनम् भवति – ..................................................

(iii) यस्यास्ति – ..................................................

(iv) भूर्भवति – ..................................................

3. प्रश्नानामुत्तराणि दत्त–

(i) **तस्य भीमं वनं किं भवति ?**

..................................................................................................

(ii) **स्वजनतां कः उपयाति ?**

..................................................................................................

(iii) **सन्निधिरत्नपूर्णा का भवति ?**

..................................................................................................

(iv) **उपर्युक्तं सर्वं कस्य भवति ?**

..................................................................................................

(v) **मनुष्यजीवने कस्य महत्त्वं विद्यते ?**

..................................................................................................

4. श्लोकात् विशेषणविशेष्यपदानि चित्वाऽधो लिखत–

| विशेषणानि | विशेष्यानि |
|---|---|
| .................................................. | .................................................. |
| .................................................. | .................................................. |
| .................................................. | .................................................. |

www.thearyasamaj.org



5. पदपरिचयं दत्त–

(i) उपयाति – ..........

(ii) स्वजनताम् – ..........

(iii) अस्ति – ..........

(iv) पूर्वसुकृतम् – ..........

6. सन्धिं कृत्वा लिखत–

(i) घोरम् + वनम् + प्रविशति – ..........

(ii) सकलः + नरः + विवेकपूर्णः – ..........

(iii) यस्य + अस्ति + वित्तम् + सः + नरः – ..........

(iv) तस्मात् + न तथा + अस्ति – ..........

7. समस्तं पदं लिखत–

(i) आत्मीयस्य भावः, तम् – ..........

(ii) पूर्वं कृतं च तत् पुण्यम् – ..........

(iii) स्वर्णैः रत्नादिभिः च पूर्णा – ..........

(iv) धनं च धान्यञ्च, तैः रहितः – ..........

8. प्रश्नानाम् उत्तराणि दत्त–

(i) **पूर्वसुकृतस्य जनस्य भीमं वनं किं भवति ?**

..........

(ii) **सर्वो जनः सुकृतिनो जनस्य किम् उपयाति ?**

..........

(iii) **निधिभिः रत्नैश्च पूर्णा भूः कस्य कृते भवति ?**

..........

www.thearyasamaj.org



(iv) यः विपुलसुकृतः सः किं किं प्राप्नोति ?

..................................................

9. यथोचितं योजयत–

| | | | |
|---|---|---|---|
| (i) | यस्यास्ति नरस्य | (क) | भीमं वनं भवति |
| (ii) | सन्निधिरत्नपूर्णा | (ख) | उपयाति तस्य |
| (iii) | सर्वो जनः स्वजनताम् | (ग) | कृत्स्ना च भूर्भवति |
| (iv) | तस्य पुरं प्रधानम् | (ङ) | विपुलं पूर्वसुकृतम् |

10. यथोचितपदेन वाक्यं पूरयत–

(i) पुण्यवतां भयङ्करम् अरण्यमपि आनन्दप्रदं .................... भवति।

(ii) परोपकारिणो जनस्य .................... आत्मीयो भवति।

(iii) उदारचरितानां .................... भूमिः परिवार एव भवति।

(iv) यस्य पूर्वसुकृतमस्ति .................... सर्वं सुलभं भवति।

11. विग्रहवाक्यं लिखत–

(i) स्वजनता – ....................

(ii) सन्निधिरत्नपूर्णा – ....................

(iii) सकलसम्पत्तिदाता – ....................

12. श्लोकस्यार्थं संस्कृतेन नीचैः लिखत–

..................................................

..................................................

..................................................

..................................................

..................................................

..................................................

www.thearyasamaj.org



13. प्रया, अस् इत्यनयोः धात्वोः लोटि रूपाणि लिखत–

| | | | | |
|---|---|---|---|---|
| प्र✓या | प्रपु. | .................... | प्रयाताम् | .................... |
| | मपु. | प्रयाहि | .................... | .................... |
| | उपु. | प्रयाणि | .................... | .................... |
| अस् | प्रपु. | .................... | स्ताम् | .................... |
| | मपु. | एधि, स्तात् | .................... | .................... |
| | उपु. | .................... | .................... | असाम |

◆◆◆

www.thearyasamaj.org

# नवमः पाठः – सद्गुणप्रशंसा

**श्लोकः**

**अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः ।**
**परपरिवादनिवृत्तैः क्वचित्क्वचिन्मण्डिता वसुधा ॥99 ॥**

**पदच्छेदः**

अप्रिय-वचन-दरिद्रैः प्रिय-वचनाढ्यैः स्वदार-परितुष्टैः ।
परपरिवाद-निवृत्तैः क्वचित् क्वचित् मण्डिता वसुधा ॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| अप्रिय-वचनदरिद्रैः | अ.पु.तृ.बहु., समस्तम् | प्रियवचनाढ्यैः | अ.पु.तृ.बहु., समस्तम् |
| | | स्वदारपरितुष्टैः | अ.पु.तृ.बहु., समस्तम् |
| परपरिवाद-निवृत्तैः | अ.पु.तृ.बहु., समस्तम् | क्वचित् | अव्ययम् |
| मण्डिता | आ.स्त्री.प्र.एक. (वि.) | वसुधा | आ.स्त्री.प्र.एक. |

**आकाङ्क्षा**

**मण्डिता (अस्ति) ।**

| | |
|---|---|
| का मण्डिता ? | वसुधा मण्डिता । |
| कुत्र कुत्र वसुधा मण्डिता ? | क्वचित् क्वचित् वसुधा मण्डिता । |
| वसुधा क्वचित् कैः मण्डिता ? | वसुधा क्वचित् अप्रियवचनदरिद्रैः मण्डिता । |
| पुनश्च क्वचित् वसुधा कैः मण्डिता ? | वसुधा क्वचित् प्रियवचनाढ्यैः मण्डिता । |
| अपि च (क्वचित्) कैः वसुधा मण्डिता ? | (क्वचित्) स्वदारपरितुष्टैः वसुधा मण्डिता । |
| पुनश्च (क्वचित्) कैः वसुधा मण्डिता ? | (क्वचित्) परपरिवादनिवृत्तैः वसुधा मण्डिता । |

**अन्वयः**

वसुधा क्वचित् अप्रियवचनदरिद्रैः, क्वचित् प्रियवचनाढ्यैः, (क्वचित्) स्वदारपरितुष्टैः, (क्वचित् च) परपरिवादनिवृत्तैः मण्डिता ।

www.thearyasamaj.org



## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| वसुधा | भूमिः | पृथ्वी | earth |
| अप्रियवचनदरिद्रैः | कटुभाषणरहितैः | कठोरवचनों के दरिद्रों से | with (men who) are the poor of speaking harsh |
| प्रियवचनाढ्यैः | प्रियभाषणशीलैः | मधुरवचनों के धनियों से | with (men who are) rich in speaking sweet |
| स्वदारपरितुष्टैः | स्व-पत्नीपरितृप्तैः | स्वपत्नी से तृप्तों से | with (men who are) content with the enjoiyment of their own (lawful wife) |
| परपरिवादनिवृत्तैः | इतर-निन्दा-विमुखैः | अन्य-निन्दा से विमुख लोगों से | with (men who are) averse to censure others |
| क्वचित् क्वचित् | कुत्रचित् कुत्रचित् | कहीं कहीं | here and there |
| मण्डिता | अलङ्कृता | अलङ्कृत है | adorned (with) |

## भावार्थः

**संस्कृते–** पृथिव्यां सत्पुरुषाः क्वचित् क्वचित् एव सन्ति। तादृशैः सत्पुरुषैः पृथिवी तत्र तत्र अलङ्कृता अस्ति। क्वचित् अप्रियभाषणरहिताः पृथिव्याः/देशस्य शोभां वर्धयन्ति। क्वचित् मधुरभाषिणः स्थानं शोभयन्ति। क्वचित् स्वपत्न्या परितृप्ताः (अर्थात् परस्त्रीषु अनासक्ताः, परस्त्रीः मातृवद् आदरेण पश्यन्तः) सज्जनाः विलसन्ति। केचन च परनिन्दायाम् अनासक्ताः पथिवीम् अलङ्कुर्वन्ति। अर्थात् तादृशसद्गुणवन्तः पृथिव्याः अलङ्कारप्रायाः। ते क्वचित्क्वचित् (कुत्रचिदेव अर्थात् विरलाः) सन्ति इति भावः।

**हिन्द्याम्–** पृथ्वी में सत्पुरुष किसी किसी स्थान में ही होते हैं। वैसे सत्पुरुषों से पृथ्वी वहीं वहीं अलङ्कृत होती है। कहीं अप्रिय भाषण करने में दरिद्र पृथ्वी की शोभा को बडाते हैं। प्रियभाषण में धनाढ्य, स्वभार्या से तृप्त (अर्थात् परस्त्री में अनासक्त, परस्त्रियों को माता जैसे

www.thearyasamaj.org



आदर से देखने वाले) कहीं कहीं ही होते हैं। परनिन्दा से विमुख लोग कहीं कहीं होते हैं। इस तरह के सद्गुणवाले पृथ्वी के अलङ्काररूप है (पृथ्वी के शोभादायक हैं)। वैसे लोग सब जगह दुर्लभ हैं, कहीं कहीं ही होते हैं अर्थात् विरल हैं।

**आङ्ग्ले–** It is only here and there that the earth is adorned with men who are poor of speaking harsh to others, rich in uttering sweet words to their fellow beings, content with the enjoyment of their lawfull wives, and always averse to censure others.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) समासः

अप्रियवचनदरिद्रैः – न प्रियाणि अप्रियाणि (नञ्-तत्पुरुषः), अप्रियाणि च तानि वचनानि अप्रिय-वचनानि (कर्मधारयः), तैः दरिद्राः अप्रियवचनदरिद्राः, तैः अप्रियवचन-दरिद्रैः (तृ. तत्पुरुषः)।

प्रियवचनाढ्यैः – प्रियाणि तानि वचनानि प्रियवचनानि (कर्मधारयः), तैः आढ्याः प्रियवचनाढ्याः, तैः (तृ. तत्पुरुषः)।

स्वदारपरितुष्टैः – स्वेषां दाराः स्वदाराः (ष. तत्पु.), तैः परितुष्टाः स्वदारपरितुष्टाः, तैः (तृ. तत्पु.)।

परपरिवादनिवृत्तैः – परेषां परिवादाः परपरिवादाः (ष. तत्पु.), तेभ्यः निवृत्ताः परपरिवादनिवृत्ताः, (प.तत्पु.) तैः परपरिवादनिवृत्तैः।

### (ii) छन्दः–

आर्या

लक्षणम् – यस्याः प्रथमे पादे द्वादशमात्रास्तथा तृतीयेऽपि।
अष्टादश द्वितीये चतुर्थके पञ्चदश साऽर्या।।

www.thearyasamaj.org



## अभ्यासः - 49
## श्लोकः - 99

1. **विग्रहवाक्यं लिखत-**

(क) मधुररसपूर्णैः - मधुरः च सः रसः मधुररसः, तेन पूर्णाः मधुररसपूर्णाः, तैः।

(ख) स्वादुभोजनतृप्तैः - ............................................................ ........................................................... ।

(ग) शीतजलाभिषिक्तैः - ............................................................ ........................................................... ।

(घ) उष्णदुग्धपूर्णैः - ............................................................ ........................................................... ।

(घ) श्वेतपुष्पयुतमालाभिः - ............................................................ ........................................................... ।

2. **कोष्ठके दत्तपदानि संयोज्य वाक्यानि पठत-**

(अप्रियवचनदरिद्रैः, प्रियवचनाढ्यैः, स्वदारपरितुष्टैः, परपरिवादनिवृत्तैः)

(क) .......................... वसुधा क्वचित् मण्डिता।

(ख) .......................... पथिवी क्वचित् अलङ्कृता।

(ग) .......................... धरित्री क्वचित् शोभते।

(घ) .......................... भूमिः क्वचित् अलङ्कृता।

3. **यथोचितं योजयत-**

| | |
|---|---|
| (क) सुशासनसमर्थैः | (क) शिक्षकः छात्रं प्रेरयति। |
| (ख) करुणार्द्रहृदयैः | (ख) परोत्कर्षः न सह्यते। |
| (ग) असूयाग्रस्तैः | (ग) मन्त्रिभिः किं क्रियते? |
| (घ) आश्वासनचतुरैः | (घ) परोपकारः क्रियते। |
| (घ) प्रोत्साहकवचनैः | (घ) देशोद्धारः करणीयः। |

www.thearyasamaj.org



4. उचितैः पदैः वाक्यानि पूरयत–

**(मण्डितः, विद्यालयः, विद्वद्भिः, पुष्पमालया, मन्दिरं)**

(क) मयूरपिञ्छेन कृष्णस्य केशराशिः ...................... ।

(ख) ...................... सभा मण्डिता ।

(ग) देवविग्रहः ...................... मण्डितः ।

(घ) उत्सवदिने विद्युद्दीपैः ...................... मण्डितम् ।

(घ) सुशीलैः छात्रैः ...................... मण्डितः ।

◆◆◆

www.thearyasamaj.org



## श्लोकः

**लज्जागुणौघजननीं जननीमिव स्वा-**
**मत्यन्तशुद्धहृदयामनुवर्तमानाम् ।**
**तेजस्विनः सुखमसूनपि सन्त्यजन्ति**
**सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम् ।।100।।**

## पदविभागः

लज्जागुणौघजननीं जननीम् इव स्वाम्,
अत्यन्त-शुद्ध-हृदयाम्, अनुवर्तमानाम्,
तेजस्विनः, सुखम्, असून्, अपि, सन्त्यजन्ति
सत्यव्रत-व्यसनिनः न पुनः प्रतिज्ञाम् ।

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| लज्जागुणौघ-जनीनम् | ई.स्त्री., द्विती. एक., समस्तम् | जननीम् | ई. स्त्री., द्विती. एक. |
| | | इव | अव्ययम् |
| स्वाम् | आ. स्त्री. द्विती. एक. (वि.) | अत्यन्तशुद्ध-हृदयाम् | आ. स्त्री. द्विती. एक., सम. |
| अनुवर्तमानाम् | आ. स्त्री. द्विती. एक. (वि.) | तेजस्विनः | न., पु., प्र. बहु. |
| सुखम् | क्रिया-विशे. | असून् | उ. पु. द्विती. बहु. |
| अपि | अव्ययम् | सन्त्यजन्ति | सम्+त्यज्-लट्. प्रपु. बहु. |
| सत्यव्रत-व्यसनिनः | न., पु., प्र. बहु. समस्तम् | न | अव्ययम् |
| | | पुनः | अव्ययम् |
| प्रतिज्ञाम् | आ. स्त्राी. द्विती. एक. | | |

## आकाङ्क्षा

**सन्त्यजन्ति ।**

के सन्त्यजन्ति ? सत्यव्रतव्यसनिनः तेजस्विनः सन्त्यजन्ति ।

कथं सन्त्यजन्ति ? सुखं सन्त्यजन्ति ।

www.thearyasamaj.org



| | |
|---|---|
| कान् अपि सुखं सन्त्यजन्ति ? | असून् अपि सुखं सन्त्यजन्ति । |
| **न पुनः (सन्त्यजन्ति) ।** | |
| कां न पुनः (सन्त्यजन्ति) ? | प्रतिज्ञां न पुनः (सन्त्यजन्ति) । |
| कीदृशीम् इव प्रतिज्ञाम् ? | स्वां जननीम् इव प्रतिज्ञाम् । |
| कीदृशीं जननीम् इव प्रतिज्ञाम् ? | अत्यन्तशुद्धहृदयाम् अनुवर्तमानां स्वां जननीम् इव प्रतिज्ञाम् । |
| अपि च कीदृशीम् प्रतिज्ञाम् ? | लज्जागुणौघजननीं प्रतिज्ञाम् । |

## अन्वयः

सत्यव्रतव्यसनिनः तेजस्विनः, असून् अपि सुखं सन्त्यजन्ति (किन्तु) लज्जागुणौघ-जननीम् अत्यन्तशुद्धहृदयाम् अनुवर्तमानां स्वां जननीम् इव प्रतिज्ञां पुनः न (सन्त्यजन्ति) ।

## प्रतिपदार्थः

| पदम् | संस्कृतम् | हिन्दी | आङ्ग्लम् |
|---|---|---|---|
| सत्यव्रतव्यसनिनः | सत्यव्रतपरिपालनासक्ताः | सत्य के पालन में आसक्त | truth loving |
| तेजस्विनः | वर्चस्विनः/प्रतापिनः | तेजस्वी पुरुष | men with spirit/ energetic |
| असून् अपि | प्राणान् अपि | प्राणों को भी | even life |
| सुखम् | सुखपूर्वकम् | सुख पूर्वक | with ease |
| सन्त्यजन्ति | परित्यजन्ति | छोड देते हैं | abandon |
| लज्जागुणौघजननीम् | व्रीडादिगुण-प्रवाहोत्पादिकाम् | लज्जा आदि गुणों के समूह को उत्पन्न करनेवाली | that which/who tendes to produce modesty & other virtues |
| अत्यन्तशुद्धहृदयाम् | बहुशुद्धमानसाम् | अत्यन्त निर्मल हृदयवाली | having pure heart |
| अनुवर्तमानाम् | अनुकूलप्रवर्तमानाम्/ (शरीरेण सह वर्तमानाम्) | अनुकूल रहनेवाली/ (शरीर के साथ रहने वाली) | kind/candour |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| स्वाम् | स्वकीयाम् | अपनी | own |
| जननीम् इव | मातरम् इव | माता के समान | like (as if) mother |
| प्रतिज्ञाम् | स्वसङ्कल्पितां क्रियाम् | प्रतिज्ञा को | plighted faith |
| पुनः | नु/(किन्तु) | तो/(किन्तु) | but |
| न | नैव | नहीं | never |
| (सन्त्यजन्ति) | (परित्यजन्ति) | (छोडते हैं) | (swerve) |

## भावार्थः

**संस्कृते–** सत्यव्रतपरायणाः तेजस्विनः जनाः स्वप्राणान् अपि सुखपूर्वकं परित्यजन्ति, किन्तु व्रीडा (लज्जा)-आदि-गुणानां बोधयित्रीं शुद्धमानसां (पवित्रमानसां) स्वकीयां मातरम् इव स्वयंकृतां प्रतिज्ञां नैव परित्यजन्ति। अर्थात् स्वप्रतिज्ञाम् अवश्यं पालयन्ति।

**हिन्द्याम्–** सत्यपालन को व्रत के रूप में स्वीकार करने के व्यसन वाले अर्थात् सत्यव्रतपरायण तेजस्वी लोग प्राणों को भी सुखपूर्वक छोड सकते हैं। परन्तु लज्जा आदि गुणों को उत्पन्न करने वाली (बोधयित्री), अत्यन्त शुद्धहृदयवाली तथा अनुकूल रहने वाली अपनी माता के समान प्रतिज्ञा को कभी भी नहीं त्याग सकते हैं।

**आङ्ग्ले–** Truth loving and energitic men may be, ready to abandon even thier life with ease rather than to swerve from their plighted faith wich they cherish like their own mother; for, like her it tends to produce modesty and other virtues in them, and keep hearts full of purity and candour.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) समासः

| | | |
|---|---|---|
| सत्यव्रतव्यसनिनः | – | सत्यस्य व्रतं सत्यव्रतम् (षष्ठी.-तत्पु.), सत्यव्रते व्यसनं येषां ते (बहुव्रीहिः)। |
| लज्जागुणौघजननीम् | – | लज्जा एव गुणाः लज्जागुणाः (रूपकरूपः समासः), तेषाम् ओघः लज्जागुणौघः (ष. तत्पु.), तस्य जननी लज्जागुणौघजननी, ताम् (ष. तत्पु.)। |
| अत्यन्तशुद्धहृदयाम् | – | अत्यन्तं शुद्धं हृदयं यस्याः सा अत्यन्तशुद्धहृदया, ताम् (बहु.)। |

www.thearyasamaj.org



(ii) **छन्दः**

**वसन्ततिलका**

लक्षणम् – उक्ता वसन्ततिलका तभजा जगौ गः।

## अभ्यासः-50

**श्लोकः – 100**

1. **श्लोकस्य अन्वयं लिखत।**

......................................................................................

......................................................................................

......................................................................................

......................................................................................।

2. **विग्रहवाक्यं लिखत–**

**यथा–**

**सत्यव्रतव्यसनी–** सत्यस्य व्रतं सत्यव्रतम्, सत्यव्रते व्यसनं यस्य सः।

(क) सत्कथाश्रवणव्यसनी – ..........................................।

(ख) विद्याव्यसनी – ..........................................।

(ग) शुद्धहृदया – शुद्धं हृदयं यस्याः सा।

(घ) शान्तचित्ता – ..........................................।

3. **श्लोके विद्यमानस्य 'प्रतिज्ञाम्' इत्यस्य विशेषानि लिखत–**

......................................................................................

......................................................................................।

4. **श्लोके 'प्राणान्' इत्यस्मिन् अर्थे किं पदं प्रयुक्तम्?**

......................................................................................

......................................................................................।

www.thearyasamaj.org



5. श्लोके प्रयुक्तं बहुव्रीहिसमासघटितं पदद्वयं चित्वा लिखत–

1. ........................................................................ ।

2. ........................................................................ ।

6. श्लोकात् नकारान्तपदद्वयं चित्वा लिखत–

........................................, ........................................ ।

7. श्लोके सुभाषितकारेण स्वप्रतिज्ञायाः तुलनं कया सह कृता ?

..................................................................................

........................................................................ ।

◆◆◆

www.thearyasamaj.org

# परिशिष्टम्

## अतिरिक्तश्लोकाः

राष्ट्रियसंस्कृतसंस्थानेन प्रकाशिते भर्तृहरिनीतिशतकस्य पूर्वार्धे उत्तरार्धे च आहत्य प्रदत्तश्लोकान् विहाय अन्ये ये केचन अतिरिक्तश्लोकाः विभिन्नप्रकाशकैः मुद्रितग्रन्थेषु यत्र तत्र भर्तृहरिप्रणीतनीतिश्लोकत्वेन उपलब्धाः ते अत्र सूच्यां सङ्कलिताः–

1. **अकरुणत्वमकारणविग्रहः परधने परयोषिति च स्पृहा।**
**सुजनबन्धुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनाम्॥**

**अन्वयः–** अकरुणत्वम्, अकारणविग्रहः, परधने परयोषिति च स्पृहा, सुजनबन्धुजनेषु असहिष्णुता हि इदं (सर्वं) दुरात्मनाम्, प्रकृतिसिद्धम् (अस्ति)।

2. **आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात्।**
**दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम्॥**

**अन्वयः–** खलसज्जनानां मैत्री, आरम्भगुर्वी, क्रमेण क्षयिणी; पुरा लघ्वी, पश्चात् वृद्धिमती च, पूर्वार्द्धपरार्द्धभिन्ना दिनस्य छाया इव भवति।

3. **आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**
**नास्त्युद्यमसमो बन्धुः कुर्वाणो नावसीदति॥**

**अन्वयः–** हि आलस्यं मनुष्याणां शरीस्थः महान् रिपुः। उद्यमसमः बन्धुः न अस्ति, कुर्वाणः न अवसीदति।

4. **उद्भासिताखिलखलस्य विशृंखलस्य प्राग्जातविस्तृतनिजाधमकर्मवृत्तेः।**
**दैवादवाप्तविभवस्य गुणद्विषोऽस्य नीचस्य गोचरगतैः सुखमाप्यते कैः॥**

**अन्वयः–** उद्भासिताखिलखलस्य, विशृंखलस्य, प्राग्जातविस्तृतनिजाधमकर्मवृत्तेः दैवात् अवाप्त विभवस्य गुणद्विषः अस्य नीचस्य गोचरगतैः कैः सुखम् आप्यते ?

5. **एकेनापि हि शूरेण पादाक्रान्तं महीतलम्।**
**क्रियते भास्करेणैव स्फारस्फुरिततेजसा॥**

**अन्वयः–** एकेनापि शूरेण महीतलं पादाक्रान्तं क्रियते। भास्करेण (एकेन) एव स्फारस्फुरिततेजसा महीतलम् (आक्रान्तं) क्रियते।

www.thearyasamaj.org



**6.** **एको देवः केशवो वा शिवो वा**
**ह्येकं मित्रं भूपतिर्वा यतिर्वा।**
**एको वासः पत्तने वा वने वा**
**ह्येका भार्या सुन्दरी वा दरी वा॥**

**अन्वयः–** देवः एकः केशवः वा शिवः वा, मित्रम् एकं हि-भूपतिः वा यतिः वा, वासः एकः-पत्तने वा वने वा, नारी एका सुन्दरी वा दरी वा।

**7.** **को लाभो गुणिसंगमः किमसुखं प्राज्ञेतरैः संगतिः**
**का हानिः समयच्युर्तिनिपुणता का धर्मतत्वे रतिः।**
**कः शूरो विजितेन्द्रियः प्रियतमा काऽनुव्रता किं धनम्**
**विद्या किं सुखमप्रवासगमनं राज्यं किमाज्ञाफलम्॥**

**अन्वयः–** लाभः कः? गुणिसङ्गमः, असुखं किम्? प्राज्ञेतरैः सह सङ्गतिः, हानिः का? समयच्युतिः, निपुणता का? धर्मतत्त्वे रतिः, शूरः कः? विजितेन्द्रियः, प्रियतमा का? अनुव्रता, धनम् किम्? विद्या, सुखम् किम्? अप्रवासगमनम्, राज्यं किम्? आज्ञाफलम्।

**8.** **दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन्।**
**मणिना भूषितः सर्पः किमसौ न भयंकरः॥**

**अन्वयः–** विद्यया अलङ्कृतः सन् अपि दुर्जनः परिहर्तव्यः। मणिना भूषितः असौ सर्पः न भयङ्करः किम्?

**9.** **न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम्।**
**होतारमपि जुह्वानं स्पृष्टो दहति पावकः॥**

**अन्वयः–** चण्डकोपानाम्, भूभुजाम् कश्चित् अपि न आत्मीयः नाम, स्पृष्टः पावकः जुह्वानम् होतारमपि दहति।

**10.** **पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं**
**नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम्।**
**धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं,**
**यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः॥**

**अन्वयः–** यदा करीरविटपे पत्रं न एव (भवति तर्हि अयं) वसन्तस्य दोषः किम्? यदि उलूकः दिवा अपि न अवलोकते (तर्हि) सूर्यस्य दूषणं किम् (किमर्थम्) ? यदि चातकमुखे धाराः न एव पतन्ति (तर्हि) मेघस्य दूषणं किम्? पूर्वं विधिना यत् ललाटलिखितं तत् मार्जितुं कः क्षमः?।

**11.** **मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम्।**
**लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति॥**

**अन्वयः–** जगति लुब्धक-धीवर-पिशुनाः तृणजलसन्तोषविहितवृत्तीनाम् मृगमीनसज्जनानां निष्कारणवैरिणः (भवन्ति)।

www.thearyasamaj.org



12. मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
धृष्टः पार्श्वे वसति च तदा दूरतश्चाप्रगल्भः।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः॥

अन्वयः– (सेवकः) मौनात् मूकः, प्रवचनपटुः (चेत्) वातुलः जल्पकः वा, (यदि) सदा पार्श्वे वसति (तर्हि) धृष्टः, (यदि च) दूरतः वसति (तर्हि) अप्रगल्भः, क्षान्त्या भीरुः, यदि न सहते (तर्हि) प्रायशः नाभिजातः (इति कथ्यते), (अतः) परमगहनः सेवाधर्मः योगिनाम् अपि, अगम्यः (भवति)।

13. रे रे चातक सावधानमनसा मित्र क्षणं श्रूयतां
अम्भोदा बहवो हि सन्ति गगने सर्वे तु नैतादृशाः।
केचिद्वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद्वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः॥

अन्वयः– रे रे मित्र चातक! सावधानमनसा क्षणं श्रूयताम्, गगने बहवः हि अम्भोदाः वसन्ति। सर्वेऽपि एतादृशाः न (सन्ति), केचित् वृष्टिभिः वसुधाम् आर्द्रयन्ति, केचित् वृथा गर्जन्ति, यं यं पश्यसि, तस्य तस्य पुरतः दीनं वचः मा ब्रूहि।

14. लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम्।
सौजन्यं यदि किं निजैः सुमहिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना॥

अन्वयः– लोभः चेत् (अस्ति, तर्हि) अगुणेन किम् (स्वनाशाय किमन्यत् अपेक्षितम्?), यदि पिशुनता अस्ति (तर्हि), पातकैः किम्, सत्यं चेत् (अस्ति, तर्हि) तपसा किम् (किम् अतिरिक्तं प्रयोजनम्?), यदि शुचि मनः अस्ति (तर्हि) तीर्थेन किम्, यदि सुजनता (अस्ति तर्हि) गुणैः किम्, यदि सुमहिमा अस्ति (तर्हि) मण्डनैः किम्, यदि सद्विद्या (तर्हि) धनैः किम्, अपयशः यद्यस्ति (तर्हि मृत्युना किम्)?।

15. शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे॥

अन्वयः– दिवसधूसरः शशी, गलितयौवना कामिनी, विगतवारिजं सरः, स्वाकृतेः अनक्षरं मुखम्, धनपरायणः प्रभुः सततदुर्गतः सज्जनः, नृपाङ्गणगतः खलः, (एतानि) सप्त मे मनसि शल्यानि सन्ति।

इति।

www.thearyasamaj.org

## भर्तृहरिनीतिशतकात् उद्धृताः विशिष्टाः सूक्तयः

भर्तृहरेः नीतिशतके प्रत्येकमपि वाक्यं सुभाषितमेव। अत्र ततः सङ्गृहीता काश्चन विशिष्टाः मनोहारिण्यः विभिन्नसन्दर्भेषु उद्धर्तुं योग्याः सूक्तयः सङ्कलिताः–

1. अतिरभसकृतानां कर्मणामाविपत्तेर्भवति हृदयदाहीशल्यतुल्यो विपाकः।
2. अधोमुखस्यापि कृतस्य वह्नेर्नाधः शिखा यान्ति कदाचिदेव।
3. आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
4. अवस्था वस्तूनि प्रथयति च सङ्कोचयति च।
5. अहह! महतां निःसीमानश्चरित्रविभूतयः।
6. अनुद्धताः सत्पुरुषाः समृद्धिभिः।
7. कदर्थितस्यापि हि धैर्यवृत्तेर्न शक्यते धैर्यगुणः प्रमार्ष्टुम्।
8. कवयस्त्वर्थं विनापीश्वराः।
9. कर्मायत्तं फलं पुंसाम्।
10. किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी।
11. कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम्।
12. छायेव मैत्री खलसज्जनानाम्।
13. प्रारब्धमुत्तमजनाः न परित्यजन्ति।
14. तेजस्विनः सुखमसूनपि सन्त्यजन्ति सत्यव्रतव्यसनिनः न पुनः प्रतिज्ञाम्।
15. दुर्जनः परिहर्तव्यः विद्ययाऽलङ्कृतोऽपि सन्।
16. दैवमेव हि नृणां वृद्धौ क्षये कारणम्।
17. नाभाव्यं भवतीह कर्मवशतः भाव्यस्य नाशः कुतः।
18. नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति।
19. नास्त्युद्यमसमोबन्धुः।
20. न्यायात्पथः प्रविचलन्ति पदं न धीराः।
21. न निश्चितार्थाद्विरमन्ति धीराः।
22. न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्।
23. न खलु वयस्तेजसो हेतुः।
24. नहि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम्।

www.thearyasamaj.org



25. नीचस्य गोचरगतैः सुखमाप्यते कैः।
26. प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते।
27. प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः।
28. प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपोमन्दभाग्यः।
29. बुद्धिः कर्मानुसारिणी।
30. मूर्खस्य नास्त्यौषधम्।
31. मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि।
32. मनस्वी कार्यार्थी गणयति न दुःखं न च सुखम्।
33. विद्याविहीनः पशुः।
34. वाराङ्गनेव नृपनीतिरनेकरूपा।
35. विभूषणं मौनमपण्डितानाम्।
36. विवेकभ्रष्टानां भवति विनिपातः शतमुखः।
37. विभाति कायः करुणापराणाम्, परोपकारैर्न तु चन्दनेन।
38. रक्षन्ति पुण्यानि पुरा कृतानि।
39. सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाऽभ्यर्चनीयाः।
40. सन्तः स्वयं परहिते विहिताभियोगाः।
41. सतां केनोद्दिष्टं विषमसिधाराव्रतमिदम्।
42. सुकविता यद्यस्ति राज्येन किम्।
43. सत्सङ्गतिः कथय किं न करोति पुंसाम्।
44. सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम्।
45. स जातो येन जातेन याति वंशः समुन्नतिम्।
46. सर्वे गुणाः काञ्चनमाश्रयन्ति।
47. सन्तः सन्तप्यन्ते न दुःखेषु।
48. सुधिया भाव्यं सविचार्यैव कुर्वता।
49. सेवाधर्मः परमगहनो योगिनामप्यगम्यः।
50. शीलं परं भूषणम्।
51. होतारमपि जुह्वानं स्पृष्टो दहति पावकः।
52. क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।
53. ज्ञानलवदुर्विदग्धं ब्रह्माऽपि त नरं न रञ्जयति।

◆◆◆

www.thearyasamaj.org

# अकारादिक्रमेण श्लोकसूची


| क्र. | श्लोकः | श्लोकसङ्ख्या | पृष्ठसङ्ख्या |
|---|---|---|---|
| 1. | अयममृतनिधानं | 84 | 285 |
| 2. | अप्रियवचनदरिद्रैः | 99 | 416 |
| 3. | इतः स्वपिति | 65 | 125 |
| 4. | एते सत्पुरुषाः | 62 | 95 |
| 5. | ऐश्वर्यस्य विभूषणं | 77 | 226 |
| 6. | कदर्थितस्यापि | 73 | 194 |
| 7. | कर्मायत्तं फलं | 92 | 357 |
| 8. | करे श्लाघ्यस्त्यागः | 53 | 16 |
| 9. | कान्ताकटाक्षविशिखाः | 70 | 169 |
| 10. | किं तेन हेमगिरिणा | 68 | 153 |
| 11. | क्वचित् पृथ्वीशय्यः | 71 | 177 |
| 12. | क्षीरेणात्मगतोदकाय | 64 | 114 |
| 13. | खल्वाटो दिवसेश्वरस्य | 80 | 253 |
| 14. | गजभुजङ्गविहङ्गमबन्धनं | 81 | 262 |
| 15. | गुणवदगुणवद् वा | 93 | 364 |
| 16. | छिन्नोऽपि रोहति | 76 | 219 |
| 17. | तृष्णां छिन्धि | 66 | 134 |
| 18. | दैवेन प्रभुणा | 87 | 310 |
| 19. | नमस्यामो देवान्नु | 88 | 319 |
| 20. | नम्रत्वेनोन्नमन्तः | 58 | 59 |
| 21. | निन्दन्तु नीतिनिपुणाः | 72 | 186 |
| 22. | नेता यस्य | 78 | 236 |
| 23. | नैवाकृतिः फलति | 95 | 383 |

www.thearyasamaj.org




| | | | |
|---|---|---|---|
| 24. | पद्माकरं दिनकरो | 61 | 86 |
| 25. | प्रदानं प्रच्छन्नं | 55 | 32 |
| 26. | पापान्निवारयति | 63 | 106 |
| 27. | प्रियसख ! विपद्दण्डाघात | 85 | 294 |
| 28. | ब्रह्मा येन | 89 | 328 |
| 29. | भग्नाशस्य करण्डविण्डित | 79 | 244 |
| 30. | भवन्ति नम्रास्तरवः | 59 | 69 |
| 31. | भीमं वनं भवति | 98 | 408 |
| 32. | मज्जत्वम्भसि यातु | 96 | 391 |
| 33. | मनसि वचसि काये | 67 | 145 |
| 34. | या साधूंश्च | 90 | 337 |
| 35. | येनैवाम्बरखण्डेन | 83 | 277 |
| 36. | यः प्रीणयेत् | 57 | 51 |
| 37. | रत्नैर्महाब्धेस्तुतुषुर्न | 69 | 161 |
| 38. | लज्जागुणौघजननीं | 100 | 421 |
| 39. | वने रणे | 97 | 401 |
| 40. | वरं शृङ्गोत्सङ्गाद् | 74 | 201 |
| 41. | वह्निस्तस्य जलायते | 75 | 210 |
| 42. | वाञ्छा सज्जनसङ्गतौ | 51 | 01 |
| 43. | विपदि धैर्यमथाभ्युदये | 52 | 9 |
| 44. | विरम विरमायासादस्माद् | 86 | 303 |
| 45. | शुभ्रं सद्म सविभ्रमा | 91 | 347 |
| 46. | श्रोत्रं श्रुतेनैव | 60 | 78 |
| 47. | सम्पत्सु महतां चित्तं | 54 | 25 |
| 48. | सृजति तदावदशेषगुणाकरं | 82 | 269 |
| 49. | सन्तप्तायसि संस्थितस्य | 56 | 41 |
| 50. | स्थाल्यां वैदूर्यमय्याम् | 94 | 373 |


◆◆◆

www.thearyasamaj.org

# Teach Yourself Samskrit

पञ्चमी दीक्षा
**व्युत्पादिनी**

चतुर्थी दीक्षा
**वाङ्मयावगाहनी**

तृतीया दीक्षा
**वाङ्मयावतरणी**

द्वितीया दीक्षा
**व्यवहारावगाहनी**

प्रथमा दीक्षा
**व्यवहारावतरणी**

**संस्कृतस्वाध्यायः**

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली